श्री वाक्कन्वेप्रणीता

अमरुशतकलीला

(स्वोपज्ञसंस्कृतकाव्यमीमांसारसग्रहणात्मकविशिष्टकृतिः)



भारतीयप्रशासनशिक्षामन्त्रालयाल्लब्धेन
द्रव्यसाहाय्येनेयं कृतिः प्राकाश्यं नीता ।

प्रकाशक
प्रा डॉ व ग राहूरकर
एम् ए, पीएच् डी
भारतवाणी-प्रकाशन-कार्यालय
१४४२-४३, सदाशिव
पुणे (पूना) २

प्राप्तिस्थानम् मोतीलाल बनारसीदास,
जवाहरनगर, दिल्ली ७
मेहरचन्द लक्ष्मणदास,
१ अन्सारी रोड, दरियागञ्ज,
दिल्ली-६, च

प्रथमावृत्ति १९६७

मूल्यम रु ७-००

मुद्रक
श्री दि दा गांगल,
लोकसंग्रह मुद्रणालय,
१७८६, सदाशिव, पुणे (पूना) २

प्रकाशक-निवेदनम्

संस्कृतप्रणयकाव्येषु अमरुशतकं नाम सर्वश्रेष्ठं काव्यम्। प्रणयिनां मनोव्यापाराः, तेषां विविधाः शरीरावस्थाः, उत्तानप्रणयगताः सूक्ष्मच्छटाः इत्यादीनां मनोज्ञं वर्णनम् अस्मिन् काव्ये प्रतिश्लोकं दरीदृश्यते। सप्तशतीप्रभृतिकाव्यापेक्षया अमरुकवेः ईक्षिका सूक्ष्मा गभीरा अन्तरतमभावग्राहिणी च। दीर्घा, नादमधुरा च छन्दोरचना नाम अमरुकवेः वैशिष्ट्यम्। अत एव अमरुशतकं वैविध्यपूर्णं वैचित्र्यपूर्णं च सत् आवर्जयति रसिकानां चेतांसि। आनन्दवर्धनः अत एव 'अमृतकाव्यम्' इदम् इति प्रशंसति। अमरुकवेरेकः श्लोकः प्रबन्धशतायते इति यत् संस्कृतसाहित्यशास्त्रज्ञैः उक्तं तत् न अत्युचितकोटीम् आटीकते।

तदिदं काव्यम् उद्दिश्य स्वोपज्ञा संस्कृतटीका पण्डित-याक् कन्वे-महोदयैः कोरियादेशीयैः आरचिता। मेघदूतविलासाख्येन स्वीयग्रन्थेन श्री याक् कन्वे महोदया न खलु अविदिताः संस्कृतरसिकवृन्दानाम्। तत् संपूर्णं पुस्तकं प्रथमं भारतवाण्याम् अनन्तरं ग्रन्थरूपेण भारतवाणी-प्रकाशनमालायां प्रकाशितम्। इयम् अमरुशतकल्लोला अपि प्रथमम् अशतः भारतवाण्यां प्रकाशिता तदनु च ग्रन्थरूपेण भारतवाणी प्रकाशनमालायाम्। श्री याक-कन्वे-महोदयैः प्रतिश्लोकस्थायाः प्रणयभावनायाः प्रतिक्षणं परिवर्तिन्यः छटाः, तासां तम प्रकाशाधिक्यं, अस्थैर्यं च तत्रस्थं समयस्फूर्तं अनिश्चितपूर्वं च निर्णय इत्यादीनां वर्णना स्वीयेन वैशिष्ट्यपूर्णेन वैदुष्येण संस्कृतलेखननैपुण्येन च तथा नाम कृता यथा सा न केवलं सर्वथा भारतीयानाम् अपि तु निखिलानां विदेशीयानां संस्कृतप्रणयिनां चेतस्सु चमत्कृतिं विदधाति। अलंकारशास्त्रीय विवेचनेऽपि श्री कन्वेमहोदयानाम् अस्ति कापि चातुरी।

अमरुशतके सर्वं व्यञ्जनया ध्वनितम्। अतः तत्र ग्राम्यम् अश्लीलं च किमपि न विद्यते प्रणयवर्णने। तदिदं काव्यम् अधिकृत्य श्री याक् कन्वे-महोदयैः विरचिता इयम् अमरुशतकल्लोला रसिकेभ्यः उपह्रियते।

व. म. राहूरकर,
भारतवाणी-प्रकाशनमालायाः
कार्यवाहः

ग्रंथानुक्रमणिका

अमरुशतकलीला

श्रीवाक्कन्वेप्रणीता

निजदेशं नमस्कृत्य
सस्नेहं न कर्हिचिदपि विस्मृतम् ।
तनोम्यमरुकविलीलां
स्वप्रवासदुःखविनोदाय ॥१॥

कस्य न ह्रियते चित्त–
ममरुकाव्यलीलया ।
लोहवल्लोहकान्तेन
तेन निर्विश्यतामियम् ॥२॥

सर्वजनचमत्कारी
ह विनदतूच्चैरमरुशतकडमरुः ।
संधुक्षितकामाग्नि-
पुष्पधनुषो धनुर्घोष इव ॥३॥

नन्वद्यनापि करीवृत्यमानेषु सहृदयरसिकजनमनोहारिषु समस्त-
लोकप्रशंसितोत्तमकाव्यतापिशुननिर्दोषशब्दार्थालंकारप्रकृष्टगुणम-
धुरिमान्वितरसप्रवाहमयेषु कालिदासपुरस्सरैः श्लाघ्यकविकुलपता-
कायमानहंसधवलकीर्तिभिर्महाकविवृन्दारकैः सुनिर्मितेषु शृंगाररसा

त्मककाव्यरत्नेष्वतिविशालविष्णुपदावतसभूतेष्विव शाश्वती समा देदीप्यमानालोकेषु सप्तर्षिप्रमुखेषु नक्षत्रगणेषु समुद्रमन्थनसमुत्थेन स्वर्गेन्द्रियसुखकरेण शीतलेनापि दुर्निवारमनसिजानलसंधुक्षणक्षमेण हिमांशुनेव कस्य सचेतनस्य विशेषतो हृदयालुशृङ्गारकाव्यामृतरसास्वादलोलुपस्य सर्वंकषप्रभविष्णुहृच्छयाज्ञावशंवदस्य सौकुमार्यमाधुर्यसौक्ष्म्यादिगुणभूयिष्ठचेतोवृत्तिपरिपूर्णं मुनिर्णीतकाव्यगुणदोषादेयपरिहार्यत्वं मनो न काम सुदूरमेव जेह्लीयतेऽमरुकाभिधानकविपुंगवकाव्यनिबन्धनप्रभावसूनितेनाङ्गीकृतपार्थक्यत्वात् पौर्वापर्यसम्बन्धरहितेनापि पृथक्पृथगकैकश श्लोके श्लोके स्वातन्त्र्यशासिसपूर्णार्थसमन्वितत्वान्नूनं निर्वाच्यनिबन्धशतायमानेनापि च 'मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्' इति काव्यादर्शे सदृश्यमाननिर्णयत्वाद्धृदयंगमैः शतसख्यकैः प्रकाशितविविधमनोज्ञकुसुमेषुचेष्टैर्मुक्तकैरेव प्रभास्वरैः मुक्तापलैर्गुम्फितेन मुक्ताकलापेनेव श्लोकशतकेन हृदिस्पृशा को वा प्रबंधसौष्ठवाभिज्ञप्रगुणकाव्यसौन्दर्यसुदूराकृष्टमनस्को भूत्वापि विभावानुभावव्यभिचारिव्यक्तीकृतस्थायिभावभूतेषु हास्यकरुणारौद्रवीरादिषु कवितासुधारसरसिकैः रस्यमाननिजमवेदनासिद्धेषु रसेषु सर्वजनसुलभतया सुकुमारकुसुमायुधधारिणोऽपि प्रभूष्णोश्चेतोजन्मनः सदैव सर्वत्रैव प्रकटितसुरतलीलस्यातिहृद्यत्वाच्चाग्रसररसभूतशृङ्गारविलासतत्पर मनोविमाहनमभागविप्रलम्भशृङ्गारात्मकं यथाशक्ति प्रयुक्ताभिधालक्षणाव्यञ्जनाहृतशब्दार्थशक्तिमाधुर्यादिगुणगणविचित्रालङ्कारमण्डितस्वरूपं दिव्यसगीतसमय स्वभावसुन्दराकृतिविभूषिताप्सरोगणाभिवाद्यमानात्कृष्टवीणाध्वनिवन्मञ्जुमञ्जुमन्दायमानमेतदमरुशतकं श्राव श्राव प्रहर्षातिशयेन पुलकितवपुर्न बोभूयादहो केन वापरेणात्मशृङ्गारिकाव्यमन्येनापि काव्येनानादृशेन सत्रपमीयते निरुपमप्रबन्धविरचनानैपुण्यप्रदर्शितसौन्दर्यपराकृति निरन्तरप्रवृ-

च्छृङ्गारामृतरसनिर्झरसमुक्षितत्वेन स्वादिष्ठमतिमनोग्राहिमन-
मिशयनानाविधलीलायमानमत एव हृद्यतम विशेषान् काव्यगुण-
दोषसमीक्षानिपुणेनालङ्कारिकशिरोमणिना ध्वन्यालोककारेणापि
प्रशस्ततरकाव्योदाहरणरूपेण स्वकीयप्रबन्धे बहुश उदाहृतयोऽस्म
-दिव्यगन्धर्वविद्यालेखवन्मञ्जुल मञ्जुल शोश्रूयमाण श्रवणसुभगं
मान्मथगीतक लावण्यमयमिव स्वसौन्दर्यगर्वितमकरध्वजविला-
सागणमिव सुशोभितमभिनवतारुण्यावतरणमिव प्रमोदोत्फुल्लनेत्र
मनोमोहिशृंगारसर्वस्वनिर्मितस्वरूपमिव सदरीदृश्यमानमन्त गु-
स्वादुमधुरिमबाहुल्येन नूनममृतायमान बहिश्च सौम्यसौन्दर्यविभू-
-षिताकृतिविशेषशालित्वेन बत जनाना मन सु प्रमोदशतायमानम-
मरुकविशार्दूलविरचित मुक्तकशतमूनित काव्यरत्नमिद येन विक-
सितप्रहर्षोत्फुल्लनयनाधिज्यकार्मुकमन्मथलीलापुष्पोऽतृप्तचुम्बना –
लिङ्गनपुरस्सरबहुविधसुरतव्यासक्तयौवनोन्मत्तप्रणयिद्वन्द्वमान्मथ-
विलासाह्लादितरसिकजनहृदयोऽसारे ससारेऽपि निष्पादितकाम-
नामकप्रधान–पुरुषार्थसिद्धिसफलीकृतजीवितसौख्य सभोगशृङ्गारो
विचित्रचित्रवद् वर्ण्यते यत्र चेष्टजनसमागमसुखलाभजनितापूर्णमनो
रथौत्सुक्यमनोविकारव्ययाभूयिष्ठ प्रणयेर्ष्यामूलकलहजविप्रयो-
-गोत्थशङ्कानुशयाङ्गग्लानिसतापातिशयसमी देशान्तरप्रयाणादिकज-
नित––परस्परविरहानलतातप्यमानहृदयसूचिनोत्कलिकाप्रायो हा
जीवितेश हा वल्लभे कदा पुन प्रणयिनोरावयो समागमो भविष्य-
तीति पृथक्पृथग्विश्लेषितस्य साश्रुवदनस्य वियोगवनावदन्दह्यमान-
सर्वात्मनः प्रणयिमिथुनस्य निर्वेदयोगपूर्णक[illegible]
-पमानप्रवासरूपी विप्रलम्भशृङ्गारो [illegible] हृदयान्य-
न्तर्बाष्पधारासपातेन न खलु नार्द्रीच[illegible]
-प्रेमरसनिष्यन्दोत्कर्षहेतुभूतनिर्दोषगुणा[illegible]
संनद्धत्वात् परमार्थत. काव्यविदा [illegible]

णामानन्दजनयितृ निसर्गनिर्मलोज्ज्वलमुक्ताफलग्रथितहारवत्स्वभाववरुचिरनिजाकारशोभिमुक्तकशतगुम्फितत्वात् सदैव नयनोत्सवप्रदमतिमञ्जुलरागरागिणीतरङ्गितगन्धर्वविद्यावन्मनोहररागमयशृङ्गारिपदतरङ्गतरलितत्वात् सर्वदैव श्रवणविवरप्रह्लादनं च बोभवीतीति कोऽत्र संदेहो यस्माच्च नैरंतर्येण पनीपत्यते शृङ्गारजलप्रवाहे सिष्णापूणा कृते मान्मथमदनिर्झरोऽनवरतं च चेक्षिप्यन्ते कामुकजनान् लक्ष्मीकृत्य सुकुमारपुष्पमया अपि निष्ठुरा पञ्चशरपञ्चशरा पौनःपुन्येन च शोश्रूयन्ते सावधानश्राव्याणि निधुवनसमये मामाशब्दपूर्वकसीत्कारसहितभणितानि सुरतनिरताना विलासिनीना, किंबहुना, यस्माच्चामूल्ययौवनप्रमोदप्रकर्षपरिपूर्णः शृङ्गारशेवधिर्निर्व्याजमणिसमूहनिराकुल आकर इव सजाजायते यस्य च प्रणेता पुण्यश्लोकः शाश्वतिककीर्तिमयूखजाज्वल्यमानप्राक्तनभारतीयकविकुलचूडारत्नायमानोऽमरुरितिनाम्ना प्रसिद्ध आत्मकीयकाव्यश्रवस्यवशात्तत्त्वतो मर्त्यधर्माप्यमरयशस्कोटिं समारुरोह तथाप्ययं कविवृन्दारकः कस्मिन् समये स्वजनुषा सह प्रादुर्बभूव कतमं वा भारतवर्षीयभूमण्डलं नन्वात्मना विमण्डयामासेति जिज्ञासाया सत्यामपि सुष्ठु निर्णेतुं न शक्यते किन्तु यत काव्यालंकारसूत्रवृत्तिप्रणेता वामनाख्यालंकारिकेण ख्रिस्तसावत्सराष्टमशतकसमुत्पन्नेनास्य शतकाद् द्विना श्लोका समुद्धधिरे 'मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिन कवयो दृश्यन्ते तथा ह्यमरुकस्य कवेर्मुक्तका शृङ्गाररसस्यन्दिनः प्रबन्धायमाना प्रसिद्ध इव' इति प्रशसता नवमशताब्दकालीनेन ध्वन्यालोककारेणानन्दवर्धनेनापि चानल्पमस्यकान्तदीयश्लोका उदाजह्रिरे ततो नूनमय कवि ख्रिस्ताब्दीयाष्टमशतकात् प्राचीन इति कथचिदनिश्चितमेवानुमीयतेऽपि च तदीयशतकस्य लोके सुप्रसिद्धत्वान्नून प्रोद्भिन्नाविश्रम्भनीया यादृशी निवदन्ती कर्णाकर्णि सप्रत्यप्यनुश्रूयते यद् दिग्विजयप्रयाणस्थेन शंकराचार्येण

दार्शनिकविवादे निर्जितस्य मण्डनमिश्रनाम्नो विख्यातमीमांसकस्य शारदानाम्न्या भार्याया. कामशास्त्रविषयकप्रश्ने त्वात्मन आजन्म-ब्रह्मचारित्वेनापरिचितानङ्गरहस्येन सपदिप्रतिवक्तुमसमर्थेन स्वाल्प-ज्ञतालोकप्रतीतिपरिजिहीर्षयैव मासमात्रं तत्प्रश्नोत्तरदानावधि कृत्वाचिरेण पञ्चता यातस्यामरुकाभिधस्य कस्यचिद् भूपतेः कलेवरे परकीयदेहप्रवेशनशक्तिप्रयोगात् प्रविश्य प्रमुदितान्तः पुरवरारोहा-भिर्विविचित्रमनोज्ञसभोगसुखान्यनुभूय तत. परिचितकामतत्त्वेन सम्यगु-पलब्धपुष्पधन्वपरिगूढरहस्यमर्मणा तेन सन्यासिवरेणैतच्छतकं निर-मायीति तादृश्यामसवद्धाया विवेकदृश्वना परिहासास्पदभूतायां कस्यचिदप्यविद्यमाने सति विश्वासावकाशलेशे यो वा को वाऽप्यवमरुः स्वकीयशतकरत्नस्य सर्वैः काव्यमीमांसकप्रमुखैः श्रेष्ठकाव्यस्थाने समारोपितत्वाच्छृङ्गारिकाव्यकृता वरण्योऽस्माभि-समादर्तव्यो यथा कालिदासभवभूतिबाणभर्तृहरिभारव्यादयो महाकः विकुञ्जराः रघुवंशमालतीमाधवकादम्बरीशतकत्रयीकिरातार्जुनी-यादीना स्वस्वकृतीनां सुविख्यातानां वशादेव प्रभास्वरकीर्तिभाजोऽभू-वन्, किलेति सर्वथा विचार विचार विकसिताद्भुतमान्मथकेलिसुम नोवृन्दं गाढनिगूढासूर्यंपश्यकदर्परहस्यनिधिगह्वर सान्द्रप्रेमरससंसि-क्ततारुण्यमधुमत्तनरीनृत्यमानस्त्रीपुंसजेगीयमानमीनकेतनसाम्राज्य क्वचित् प्रमोदप्रदेन सभोगसौख्येन सानन्दाश्रु क्वचिच्छोकानलोद्दी-पकेन विप्रलम्भदौर्भाग्येण सदैन्यवाष्प कर्हिचिदन्योन्यसगमेन सजात-पुलक कर्हिचित् परस्परविरहेण निर्विण्णमिव निदाध्यायमानमेतदी-यशतक विवृत्यातिमधुरशृङ्गाररसुधामारासिस्वादयिषया मधुलेन मधुना मधुलिह इव स्वयमेव स्वैरं स्वैरमाचरीकृप्यमाणा परित्यक्तान्यव्या-पारा सन्त. कियत्कालक्षेपेणातिहृद्यमान्मथामृतरसणनसुखमुपभुन-जामहे यया बुद्बुदवत्क्षणनश्वरे जीवलोकेऽस्मिन् फल्गुनि शृङ्गारवर्जं किमप्यन्यत् सारवत्तर नूनं भवति हि ।

अथो प्रारम्भे निर्विघ्ननिजप्रबन्धसृष्टिकार्यपरिसमाप्तीप्सुना न कविनाशीर्युगलं प्रयुज्यते ।

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥

कोदण्डशिञ्जिनीकर्षणाय तर्जनीमध्यमामध्यगतस्य पुखम्यानामिकाङ्गुलीमयोगादङ्गुष्ठेन पीडनार्थं सन्निवेशितस्य खटकामुखाकारभाजा हस्तस्योर्ध्वभागं चपलायमानेन धवलकरजमयूखजालेन कर्बुरितं तथा मुकुलितकिसलयमयकर्णावतंसाय स्पृहया भ्रमणं कुर्वतः षट्पदस्य विलासमुद्वहच्छ्रूवल्लभायाः पार्वत्या अपाङ्गवीक्षणं (कर्तृ) त्वां रक्षतादित्यत्र चतुर्थपादे श्रुतिवैचित्र्यनिष्पादनार्थमेव भ्रम-भ्रम भ्रमेति व्यञ्जनावृत्तिमूलकः काव्यशोभाहेतुकः शब्दालङ्कारोऽनुप्रासः प्रयुक्तः पुनश्चात्र ललितविभ्रमशालिसितेतरभ्रमरकटाक्षयोरुज्ज्वलधवलनखांशुमञ्जर्योः कामम्लारुणपाणिपल्लवयोश्च परस्परसादृश्यसाधर्म्यप्रतीतिसंपादनेन कल्पितोपमा नामार्थालङ्कारोऽपि प्रदर्शितो यथाष्ट विशेषणैरुपमेयं परिकल्प्य तादृशमेव सिद्धमुपमानमुपात्तमिति लक्षणात् । वृत्तं तु वसन्ततिलका । शृङ्गारैकरसकाव्यप्रारम्भे किमर्थं वीररसाभासशंसिनी शम्भुप्रियाया अधिज्यधनुराकृष्टिचेष्टा व्यक्तीकृतेति जायमानाशङ्कां संशये ब्रूमो यत् पूर्वतो ज्याकृष्टिद्वारा किंचिदाविर्भवन्नपि वीररसलवः स्वप्राणेश्वरमर्येन्दुमौलिं प्रति ललितमान्मथलीलायमानेन सान्द्रप्रेमार्द्रहृदयायाः गिरिजाया मनोज्ञतरशृङ्गाररसव्यञ्जकेन कटाक्षेण निरस्यत उत्तरत

च शृङ्गाररसस्वरूपाया वश्यमुखीवेषधारिण्यास्तस्याः कुसुममार्गण-सहितैक्षवधनुर्धारिण सुप्रसिद्ध च पुनश्च तथाभूता पार्वती कविनात्र विवर्णयिषितेति।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥

अन्यस्त्रीगमनेन सद्योऽपराद्ध कामुक इवावलोलोक्यमान-स्तासा करावसक्तोऽसह्यमन्युजवाष्पधाराजर्जरितेन्दीवरवच्छोभ-मनयनशालिनीभिस्त्रिपुरवास्तव्यदैत्यवनिताभिर्निरस्तोऽपि वस्ना-ञ्चलमवलम्बमानो बलात्कारेण ताडितस्तत शिरोरुहपाशेषु सहिल-ष्यन्नपहृतस्तदनन्तर विहितपादनिपतनोऽपि सक्षोभवेगेन नावलोकि-तस्तत आलिङ्गन विदधदपाकृतस्तादृश पाशुपतविशिखवह्निर्युष्माक कल्मष दहनेन विनश्यतु । श्लोकेऽस्मिन्नुभयोरार्द्रापराधकामिरौद्रशरा-नलयोरत्यन्तनिर्वारसतापप्रकर्षोत्पादकत्वेन समानभावे खलूपमित-त्वात् साम्य नामालकार उपमालकारो वात्र चैकार्थवाचकाना हस्तावलग्नेत्यादीना पदानामनेकार्थद्योतकोऽर्थश्लेषोऽपि व्यक्तीकृतो येनात्र सद्य कृतपरवनितासगमस्यापराधमत एव यथाकथचिन्निज-वल्लभासान्त्वनार्थमेव हस्तावलम्बनकेशग्रहपुरस्सरचरणनिपतनादि-चेष्टननिमग्न कामिनमुद्दिश्य क्षिप्तोऽवधूत इत्यादिना दानव-विलासिनीनामीर्ष्यामानहेतुको विप्रलम्भशृङ्गार प्रकटीकृतोऽत्र च पुरा विश्वकर्मप्रख्यमयासुरनिर्मितत्रिपुरविध्वसार्थं दिविषद्भिः

वीर्यप्रतापोत्कर्षव्यञ्जको वीररस साश्रुनेत्रोत्पलाभिरितिशब्देन च दानवेन्द्रवरवर्णिनीना दयितजनविनाशजनितमन्युसूचक , करुणा- रस इत्यभि सङ्कीर्णैरपि परस्पराविरुद्धै रसैरर्थश्लेषेण साक रसवद- लङ्कारमयाङ्गभावन प्राधान्यभूतस्य वाक्यार्थस्योपबृहण विदेधीयते। वृत्त स्रग्धरा। न केवल काव्यग्रन्थगतायमानमपि तु रसवत्काव्य- रसग्रहाणा मनासि चिन्त्रीयमान श्लोकमिम पाठ पाठ चित्रेऽर्पितस्येव वराकस्यापरवनिताभिगमनन दुर्निग्रहप्यमानारुणीकृतनयनाम्बुजा स्वप्रिया तच्चरणनिरतनादिनिरुपायशतै सानुनय सान्त्वयितु यतमानस्यापि दुर्मनायमानया तया मृशमुपेक्षितस्य कामिनोऽनन्या शोचनीयामुत्प्रेक्षितु कथ न शक्नुम ?

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डल
किञ्चिन्मृष्टविशेषक तनुतरैः स्वेदाम्भस शीकरैः ।
तन्व्या यत्सुरतान्ततान्तनयन वक्त्र रतिव्यत्यये
तत्त्वा पातु चिराय किं हरिहरस्कन्दादिभिर्दैवतैः ॥ १ ॥

पुरुषायितनिधुवनसमये चटुल्लोला व्याकीर्णां चिकुरमाला दधान चञ्चलकर्णायतसमृत् सूक्ष्मतरैः श्रमजलकणैरीषन्मृदितमालतिलक- शालि मुकुलितपर्यन्तमान श्रमातम्रलोचन तनुमध्यायाः वरारोहाया यद्वक्त्र तत्त्वा चिरकाल रक्षतु शिवविष्णुकार्तिकेयपुरस्सरैर्निर्जरैः कि प्रयोजनम् ? ननु मम संसारे परमसुखदायिनि विरस्वरलावण्य- विलासिनि ललितरम्भास्तम्भमन्दो विद्यमाने नयविद्यमानेऽनाध्ये परलोके मृगतृष्णिकानन्दमनाश्यसिद्धिमपादेय मत्तेनाप्रमुख कि प्रयोजन भवेत् तस्माच्छृङ्गाररसनिर्वचनीय पीनस्तन्यो नितम्बिन्य एव सेव्या इत्युपदिशन्त्यत्र श्लोके प्राक्तनमान्यानितय मनारा पीन- श्रोणाया इत्यासपा पुरुषायितसुरतवर्णनात् सम्भोगशृङ्गारो

बहुश प्रवहत्यत्र च पुरयायमाणायास्तस्या स्वाभाविकक्रियाप्रदर्शनान स्वभावोक्तिर्नामालङ्कार उपनिबध्यते । वृत्तं तु शार्दूलविक्रीडितम् ।

अलसवलितै प्रेमार्द्रार्द्रैर्मुकुलीकृतै
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखै ।
हृदयनिहित भावाकूत वमद्भिरिवेक्षणै
कथय सुकृती कोऽय मुग्धे त्वयाद्य विलोक्यते ॥ २ ॥

अपरिचित युवान प्रति प्रथमानुरागाङ्कुर रुचिरै साभिप्रायैरपाङ्गवीक्षणैर्दर्शयन्ती कामपि युवति प्रति सख्या नमगर्भा प्रौढोक्तिरियम् । अभिनवयौवनसुलभकातर्यनपातिशयन मन्दमन्दसाचीकृतैरन्तरनुरागद्रवीकृतमनस्कत्वाद बहिर्निर्गतस्नेहनिर्झरस्नापितैर्दर्शनप्रीत्या पौन पुन्येन स्तोकनिमीलितैस्तथापि विलोकनपरमानन्दानुबुभूषया मुहूर्त समुखीकृतै प्रथममुकुलितप्रेमवशात् सुकुमारकन्यास्वभावजनितव्रीडाकातरैस्तथाप्यवलोकननैरन्तर्यलोभादुन्मेषतत्परहृदयकूपस्थापित रागसकल्प निष्यन्दयद्भिरिवापलक्ष्यमाणैर्वीक्षणैरघुना त्वया विशापण योऽवलोक्यतेऽय समुदितसौभाग्य क: ब्रूहि हे मुग्धे ।

प्रथमानुरागपिशुनचक्षु प्रीतिस्मेरमतस्काया युवत्या प्रथमावस्था सूचयति चारुणि पद्यऽस्मिन् सुकृतीति स्पृहणीयन किंचितर्मस्फोटद्योतकेन पदेन प्रथमकालोन्मिषत्स्मरस्मरपुष्पैर्दर्शनस्पृहोल्लासिभिर्हर्षौत्सुक्यदायिभिर्लज्जावतर्याभिलाषादिनानाभावमर्बुरितहृदयया कमनीयया बालया मन्दनुन्मेषणन्दीवरैर्लक्षीकृतम्य यूनो धन्यभाव प्रकर्षेण प्रथमित पुनश्च मुग्धे इति सबोधनशब्देन स्तोकनर्मगर्भेण वयस्या प्रौढोक्तिव्यक्तीकृ तार्थशक्ति-

व्यञ्जयन यस्मादेव मुग्धा त्वं सौभाग्यभाज दर्शनीयाकृतिं युवानं साभिलाषं सुचिरं पश्यसि तस्मान्मुग्धापि खल्वमुग्धासीत्यर्थान्तरमपि व्यज्यते । अन्यथानुपपादनीयेनावलोकनव्यापारेण प्रस्तुताया युवत्या अनुरागरूपस्य जिज्ञासितार्थस्य प्रतीतिवर्णनादनुमान नामालङ्कारोऽत्र दृश्यते । वृत्तं तु हरिणी ।

> अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं
> तूष्णीं रोदिषि कोपने बहुतरं फूत्कृत्य रोदिष्यसि ।
> यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
> निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ३ ॥

बहिर्दर्शितानुरागेणापि सदा वनितान्तरलालनादिमानसव्यथाजनकविप्रियशतमाचरता सुपरिशीलितशाठ्येन स्वकीयकामुकेन वञ्चितत्वादीर्ष्यासूयाकोपातिशयेन रुदन चेष्टीयमाणा नायिका तेन कामिनस्य सुचिति रहसि शिक्षिता काचित् सहचरीगणस्य भेदसञ्जयोपायद्वारा मानं परित्याजयितुमेनमभिभाषतेऽपि साधनेऽङ्गुल्यग्रनखेनाश्रुपातं मुहुर्मुहुरपनायमपनाय किमर्थमनल्पं रोदिषि? परमुखदर्शनविद्वेषिणा प्रणयिबन्धभञ्जना पिशुनजनाना द्विजिह्वाना दुर्जनाना दुष्टापवादप्रपञ्चप्रलापैर्यस्यास्तेऽर्थाजनि ते माने मर्यादामुल्लङ्घिते सति मानवन प्रति सोऽतिभूतमनास्त्यक्तसङ्गमस्य गमिनो यन्त्रणां यदा त्वा प्रत्यौदासीन्यं प्राप्स्यति तदा दुर्गमस्य तस्य पुनर्लाभाभावादतिमात्र मुहुराक्रन्द सर्वदैव नूनमानन्दापसोन्यत्र सुवसा पश्चात्तापसन्तप्ता प्रणयिना मनसाऽपि पिशुनवर्जनेषु विश्वासाभावेऽपि नम्रत्वस्वरूपस्यानुगमिन वैयिकः सन्मार्गोपगतारस्यपि गापनं प्रत्ययमानं अपि, यदि त्वमोऽन्येन मानं न जाया-स्य तर्हि स्वदनुनये निगमान्तेन न रहसा गमी दयितेना भवन्ति

भावोऽपि सूचितोऽत्र च 'गच्छ गच्छसि चेत् कान्त तत्रैव स्याज्ज-निर्मम'इत्युदाहरणवत् किं तूष्णीं रोदिषि बहुतर फूत्कृत्य रोदिष्य-सीति विधौ व्यक्तीकृतेऽपि मा रुदिहीति निषेधस्य तिरोहितत्वा-दाक्षेपो नामालङ्कार प्रणयमानरूपेण विप्रलम्भशृङ्गाररसेन परिपो-षितो देदीप्यते। वृत्तं तु भवति शार्दूलविक्रीडितम्।

दत्तोऽस्या प्रणयस्त्वयैव भवतैवेयं चिर लालिता
दैवादद्य किल त्वमेव कृतवानस्या नव विप्रियम्।
मन्युर्दु सह एव यात्युपशम नो सान्त्ववादै स्फुट
हे निस्त्रिंश विमुक्तकण्ठकरुण तावत्सखी रोदितु ।।४।।

शाठ्यप्रसृतेनानेकस्त्रीचौरेण कामिना निष्पादितेन परयोषिल्लाल-नादिकेन विप्रियेण ह्रद्वेधिमन्यकोटिमधिरूढा कान्ता दर्शं दर्शं करुणार्द्रमनास्तत्सहचरी त सोपालम्भ निन्दति हे वीतकरुण क्रूर-हृदय पूर्वं स्वयमेव त्वयास्यै प्रेम वितारितं न त्वन्येन, किञ्च त्वयैवेयं दीर्घकालमुपलालनेनानुरागपूर्वं प्रीणिता किन्त्वहो दौर्भाग्य-योगात्त्वमेव न त्वपर एतस्या हृच्छित् कष्टतममभिनवमप्रियमद्या-कार्षीरिति वार्तानुश्रूयते, तदेतत् स्फुट यदसह्य एव त्वदीयविप्रियजो मानातिशयो मानापनयनोपायपटुकपुरस्सरै प्रसादनानुनयवचन-शतैरपि प्रशान्ति न गमिष्यति तेन कारणेन यावदात्मनो हृदय-शोकातिरेकं स्वय चिरात् प्रशाम्यति तावदस्मत्सखी विशेषतो मुक्तकण्ठ सकरुण चोच्चैरुच्चैः क्रन्दतु। पद्येऽत्र किलशब्द सार्थको वस्तुत शठस्वरूपेण नायकेन विहितस्य दुर्वारमानजयिष्णुदुराचारस्य सुविदितत्वेऽपि सोऽयं तादृश दुराचार न कुर्य्य इति वक्रोक्ति किंचिद् व्यनक्तीवाय चातिमानध्मापितमुखवाष्पातिशयस्फुटित-कटुक्त्यायेन निजकान्तनिष्पादितदुरितजमन्युप्रकर्षपरिपूर्ण नायिका-

हृदय क्रन्दनेनोच्चैस्तरेण स्फोटं गमिष्यत् स्वयं प्रशमिष्यति तदैव सामादय उपायाः प्रयोक्तव्या इति निगूढाभिप्रायोऽपि नूनमुत्प्रेक्ष्यते पुनरत्र चेयं चिरं लालिता तथाप्यद्यास्या विप्रियं त्वया कृतमिति लालनविप्रिययोरननुरूपयो. ससर्गोपवर्णनाद् विषमसंज्ञकोऽलङ्कार आविष्कृत. शार्दूलविक्रीडितवृत्तेनेर्ष्यामानरूपिणा विप्रलम्भशृङ्गाररसेन च सार्धम्।

> लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
> निराहाराः सख्यः सततरुदितोच्छूननयनाः।
> परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
> स्तवावस्था चेयं विसृज कठिने मानमधुना ॥५॥

अयि निर्मोन्नतपाषाणवत्कठिनहृदये मम्य, तव प्रियतमो जीवितेश्वरो बाह्यस्थले नम्रवदनस्त्वद्गतचिन्तानिरन्तरव्याकुलीकृतमनस्त्वेन गृहीतमौनो निरर्थकं क्षितितलमालिखन् वरीवर्त्यते, तदेदृशं दशान्तरं दृष्ट्वा मद्वयस्योऽपि त्वदीयक्रोधाग्रहेण भृशं दुःखायमाना अविश्रान्तेन रोदनेन स्वयथुविकृतनेत्रा दूरीकृतभोजनव्यापारा बोभुवति तथा च पञ्जरस्थैर्बालैरपि लीलाशुकैः पूर्वाभ्यस्तं निखिलं गपरिहासवाग्व्यवहारं गयम्य यावयमनागेवेनीयते, तेऽप्यत्येवमि-स्थभूता वीनयीभ्वन एव गर्भजनतु गगारणे मन्यु गप्रति गम्यजेनि यवनरोनिनाधिव रमाननगुशणक्षमरान्ताषगयोरेवगनयम पि दरिहन्नी विभागरावभूना गनी नावितो मान त्याजस्तु यर्थीनि। ननु मन्यामहे दहनेनापदेनावपमा चन्तुन पटोनापि नीरना गान्तभूषिता न्यवस्थिनुभ्यामगपर्भा क्षणेन, पि पुनश्चेशाननान् मृदुलहृदया मानमनिकर्मणा। हे मानिनि स्वप्नधर्मिणि गर्वजनं-पिरस्तनीत्वदीयमोहैः गोरापाशं नीनावदनानन्दोपाधिभिः ममानुग-

दुर्मनायमाणे खलु शोकतिरेकोऽनुभूयत इति श्रुत्वापि का मानुषी स्वीय प्राणवद्दयित दयित प्रति तदीयापराधजनितमानाभिनिवेश निरन्तर धारयत् । अथ खलु प्रवन्धायमानो मानकृतविप्रलम्भशृङ्गाररसात्मक श्लोक एव भावणसौष्ठवेन मानस्य निषिद्धत्वादाक्षेपालङ्कारेण विभूष्यते शिखरिणीवृत्तेन सह ।

भार्या मुग्धशठा हरन्ति रमण तिष्ठन्ति नो वारिता-
स्तत्किं ताम्यसि किं च रोदिषि मुधा तासां प्रियं मा कृथा.।
कान्त' केलिरुचिर्युवा सहृदयस्तादृक्पति कातरे
किं नो बर्बरकर्कशैः प्रियशतैराक्रम्य विक्रीयते ॥६॥

वल्लीभिर्युवतिभी ररम्यमाणस्य प्रकटितकैतवस्य स्वदयितस्य दुराचारकदर्थितान्त करणामीर्ष्यामन्युग्रस्ता वीतधैर्यां वररोहा दर्श दर्श कोप जहाहि अस्त्युपायो रमणस्य प्रत्युपार्जने, इति वल्लभप्रतिलाभयोग्या प्रतिक्रिया शिक्षयन्ती परस्परविश्लेषितस्त्रीपुरुषसयोजनवैदग्ध्यनिधिस्तत्सखी ब्रवीति यदङ्गना प्रकटितबाह्यमौग्ध्या अप्यान्तरशाठ्यपरिपूर्णा अप्सरोवद्रमणीयाकृतयाऽपि द्विजिह्वसरीसृपवत्कुटिलहृदया सत्य प्रियतम त्वत्सकाशादपहृत्य स्ववशे स्थापयन्ति, मा मा प्राणवल्लभ मेऽपहार्ष्ट यूय निस्त्रिंशा इति माक्रोश निषिद्धा अपि नोपरमन्ति तस्मात् किमर्थं वृथा सतापज्वरेणात्मान परिशोषयसि, किमर्थं वान्याचौरितस्वीयकान्ता सती व्यर्थक क्रन्दसि, तव चिन्ताकुलतारोदनादिक्रमात्ममात्कृतत्वदीयरमणाना तस्करीणामभीप्सित भवत्यत एव तासा प्रियहतुव मौग्ध्यं मा कार्षी, अयि भीरु ! ते प्राणेश्वरस्तादृग्स्य कमनीयवपु सुरतलीलासक्तो मनोहरयौवनस्थश्च बोभवीति यो वैराग्यजनकान्यथमपरुषवचनानि परिहृत्य ताभ्यो मुग्धशठाभ्य आच्छिद्य मनस्तुष्टिकरं चाटुशतैर्विक्र-

ययोग्यस्त्वद्वशंवद म्रियते, एवं कर्तुं वर्वरकर्कशैरस्माकं वचोभिः किमपि प्रयोजनं नास्ति। दुष्टान्ययुवत्यपहृतदयितसमाकर्षणविषयेऽरण्यरुदितादिकं व्यर्थकचेष्टनं परिहाय वैदग्ध्यमेव प्रयोक्तव्यमित्यर्थान्तरं संसूचयति मानजविप्रलम्भशृङ्गाररसस्यन्दिनि पद्येऽस्मिन् प्रियशतदानेन रमणावर्जनरूपस्य विनिमयस्य द्योतितत्वात् परिवृत्तिर्नामालंकारः। शार्दूलविक्रीडितवृत्तम्।

कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥७॥

वनितान्तराभिगमनजनिताद् दुर्निवारमन्युप्रकर्षात् सुकुमारचञ्चलभुजवल्लरीरज्ज्वा निष्ठुरं निबध्य वसतिगृहं समानीय व्रीडापनयनयोग्यत्वात् सायंतनसमये प्रियसहचरीणां समक्षमेव पुनरपि त्वमित्थमपराधमकार्षीरिति कण्ठगतगद्गदगद्गदयन्त्या सव्यथयापि सुकुमारया वाचा तद्दुराचारं व्यज्य, नाहमपराद्ध इति स्वदुर्विनयप्रत्याख्यानतत्परः पुण्यराशिर्हासस्मेरवदनः प्रियतमः रुदन्त्या प्रेष्ठया ताड्यत एवेति मधुररसप्रतिपादनरसिकेनामरुकविना प्रगल्भाधीराया ईर्ष्याक्रोधारुणितनयनोत्पलाया अभ्यसूयन्त्या नायिकाया व्यलीकृतान्याङ्गनासंगमरूपदुश्चेष्टितस्य निगृह्यमाणस्यापि शठस्य धृष्टनायकस्य चापहास्यचेष्टा स्वभावसमेनालंकारेण मुग्धवर्णिता। वृत्तं तु शार्दूलविक्रीडितम्। पुनरत्र कोमललोलबाहुलतिकापाशेनेति पदेन स्वकान्तस्यान्यासक्तत्वमाननाद्विप्रयोगात्स्वरूपानुरागेन नायकस्य दर्शनाद् दयितरूपादोषपूर्णाभिलाषव्यञ्जने रूपकमिति

शब्देन च प्रकटितनिजदुर्विनीतत्वनिह्नवनसूचितकौटिल्यस्य रमणस्य धार्ष्ट्यं धन्यशब्देन च दयिताप्रतिपादितनिग्रहतर्जनताडनानामपि हृदयंगमसौभाग्यवत्ता किमुत सस्नेहचुम्बनालिङ्गनादीनामिति निगूढाभिप्रायोऽपि । अत्रासूर्यंपश्यमानस्त्रीवत् प्रागल्भ्योच्छ्रायोपेता प्रभविष्णवो महिला स्त्रीजितान् पुरुषान् न वशीकृत्य न कर्हिचित् सहेरन् । .

यातः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥८॥

स्वकीयप्रियभार्यावात्सल्यातिशयसत्यक्तविदेशप्रवासार्थंप्रयाणाध्यवसायः केवलमेकजायाधीनत्वादनुकूलस्नेहार्द्रचित्तवृत्तिः कश्चन प्रियवयस्यानुयुक्तप्रयाणत्यागकारण एव वक्ति यदयि मत्तकाशिनि ! प्रोषिता देशान्तरप्रवासं समाप्य निजदेशं प्रत्यागता जनाः स्वस्वरमणीभिर्दन्दह्यमानविरहशोकाग्निशोषितदेहाभिः पुनर्दयितजनसमागमोत्कलिकाकीलितावशहृदयाभिः सुखेन किं न सङ्गच्छन्ते ? अवश्यं सङ्गच्छन्त एव, एवं मनसि दृढबद्धपुनःसमेलनाशापाशया त्वयान्यथा मदर्थे क्वापि चिन्ता न कर्तव्या, भाविवियोगचिन्तया सुतरामधुनापि तनूकृततनुरसीत्येवं बाष्पपूर्णनेत्रे मयि सदयं ब्रुवाणे सति व्रीडामन्दीकृतकनीनिकाशालिना सत्वरनिगूढबाष्पबिन्दुना नेत्रेणाय निस्त्रिंश इत्यभूता प्रणयिनी मां परित्यज्य दूरवर्ति देशान्तरं यियासतीति मनसि विधाय मामवलोक्याचिरेणावश्यभाविमृत्युनिश्चयः शुष्कस्मितेन सह तयाव्यक्तीकृत इति । भाविविप्रलम्भशृङ्गाररसद्रवीकृतसहृदयरसिकमनसि श्लोकेऽस्मिन् पूर्वार्धे प्रश्नरूपे

नायकवचसि श्रूयमाणे सत्युत्तरार्धेन भाविमरणोत्साहपिशुनेङ्गितरूपस्योत्तरस्य प्रतिपादनादुत्तरं नामालंकारस्तेन च कान्तप्रस्थाननिवारणोपायस्य संसूचितत्वादाक्षेपालंकारोऽपि, अथवात्र केनचित् सुहृदा प्रयाणं कस्माद्धेतोस्त्वया त्यक्त इति प्रस्तुतकार्ये पृष्टे प्रियाया भाविमरणोत्साहरूपिणोऽप्रस्तुतस्य कारणस्य वर्णनादप्रस्तुतप्रशंसालंकारोऽपि । वृत्त तु पूर्ववद् भवति । उत्प्रेक्षामो यत् पूर्वपादद्वयं कार्यादिप्रयोजनवशात् परदेशं जिगमिषोर्दयालुहृदयस्य वल्लभस्य भार्यास्नेहप्रकर्षं काव्यरसिकमनासि तत्त्वत आवर्जयतितरां किं चोत्तरपादद्वये दरीदृश्यमानमिव स्वप्रस्थानानन्तरभाविदयितात्मव्यापादनसंकल्पणसि कृपास्पदायमानं निर्वचनचेष्टितं साक्षीकृत्यापि दयिता विहाय प्रयाणमार्गे प्रतिष्ठेत निर्दयोऽपि कः ?

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयो—
स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
पाणिभ्यां च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा यत्कञ्चुके संधयः ॥९॥

विहितपर्याप्तलालनस्पदुराचारं स्ववासगृहे समायातं दयितं प्रत्येवमेव स्वयाप्यनुयायिनोध्यवसानार्थं विधातव्यमिति विदग्धप्रियवयस्याभिर्दुर्विगाहपुष्पसायकरहस्यकोविदाभिः पूर्वमेवोपदिष्टापि स्वाभाविकमौग्ध्यविजितत्वात् तदीयप्रत्यागमनमहोत्सवजनितप्रहर्षातिरेकात्कान्तगवेषयुद्धृदयत्वाच्च तथाकर्तुमक्षमया मुग्धया तदानींतनीमात्मनोऽवस्थां तास्यो मुग्धा वर्णयति यत् प्राणेश्वरे समायाते सति तदानीं तदीयवदनसंमुखमेव लज्जयेव मया निजास्यमवनमितं, संवर्धमानतद्दिदृक्षानिवारणाय स्वनयनयोरधस्ताद्

दृष्टिः प्रक्षिप्ता, तस्य संभाषणवचनश्रवणकौतूहलव्याकुलितौ स्वीयकर्णौ पिहितौ, तद्दर्शनपरमानन्देन कपोलयोः स्वच्छन्दं निस्यन्दमानो रोमाञ्चसहितः स्वेदप्रादुर्भावः कराभ्यां सछादितस्तथापि हे वयस्याः! शृणुध्वम्, प्रियतमसदर्शनसमुत्थप्रहर्षसमुल्लासवेपमानरोमाञ्चितस्तनाभोगाध्मापितानि मदीयकञ्चुलिकायाः स्यूतस्थानानि शतधा विदलन्ति स्म, इत्थंभूतेऽत्राहं किं करवै? अत्र संभोगपर्यवसायिशृङ्गाररसमये पद्ये कृतापराधतया दुस्सहकोपास्पदीभूतस्यापि प्रियस्य सान्निध्ये प्रियाया मानाभासोऽपि बलीयसा तत्संगमजनितेन प्रीतिविकासेन भृशं दूरीक्रियमाणस्तिरस्क्रियते। ननु पतिप्राणानामधिगुणानामङ्गनानां जीविते स्वभर्तृसमागमादधिकतरश्रेयस्करं किं भवितुमर्हति? अत्रेष्टजनसंगमसिद्धिसमुत्थप्रहर्षसंसूचनात् प्रहर्षणालंकारो नायिकाया इङ्गिताकारोपलक्ष्यस्यानन्दातिशयरूपस्यार्थस्य सौक्ष्म्यात् सूक्ष्मो नामालङ्कारश्च पद्यभूषणत्वे दर्शितौ। वृत्तं तु पूर्ववत्।

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा
किमुत सकले याति वाह्नि प्रिय त्वमिहैष्यसि।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥१०॥

हे दयितहृदयेश्वर! यामस्य पर्यवसाने पूर्वाह्णेऽत्र त्वं प्रत्यागमिष्यसि माध्यंदिनसमये वा ततोऽपि परेऽपराह्णे वाहोस्वित् समस्ते वासरे व्यतिक्रान्ते वा समायास्यसीति शतसंख्यकदिवसव्यत्ययगम्यं सुदूरवर्तिनं विदेशं प्रति प्रतिष्ठासतः स्ववल्लभस्य प्रयाणमतिमुग्धा तरुणी निपतदश्रुप्रवाहकलुषितैः सगद्गदस्वरैः कृपणैः

प्रलापैर्लम्पतीतीह सचारिभावप्रकारान्तरभृतदैन्यातिरेकव्यञ्जके श्लोके दिनमेकमपि हे प्रष्ठ त्वामन्तरेण हताशा जिजीविषाम्यहमिति काव्यसौक्ष्म्यनिगूढाभिप्रायो नायिकाया वितर्क्यतेऽत एव मा गा मा परिहायेत्यनुक्तेऽपि नायकस्य प्रवासवुद्धि कथ न स्वयमेव सह्रियते यथैव निर्वीर्यत्वात्सन्यक्तसग्रामोत्साह पौरुषहीन परिपन्थिन दृष्ट्वा वीररवस्य चन्द्रहास-कोपे पुन प्रतिक्षिप्यते । अहो को दयालुवात्सल्यार्द्रार्द्रान्त करण एकपत्नीप्रेमानुकूलो विप्रकृष्टभूमण्डलस्थपरजनपदप्रयाण निजनियोगवशादन्यस्माद्धेतोर्वा चिकीर्षु सज्जीकृतप्रयाणसभारोऽपि हा प्रिय कदागमिष्यसि वासरेऽस्मिन्नेव प्रत्येष्यसीति स्वकीयचरणारविन्दद्वयस वाष्पपूर भविष्यत्कान्तविरहमन्युवशान्निपातयन्त्या अश्रुवर्षणदुर्दिनायमानवदनायास्तस्या सदैन्य वारवार स्नत्स्पद प्रलाप श्राव श्राव प्रस्यातु शक्नुयात् ?

अयि कान्त मा यासीरितीह वक्तुमिष्टेऽप्यवाक्यवक्तव्यतया गमननिषेधस्यानुमितत्वादाक्षेपालकारोऽथवा स्वप्रियप्रयाणसमये भाविविप्रयोगातुराया कान्तायास्तादवस्थ्योपवर्णनाज्जातिनामालकारोऽपि विप्रलम्भरसोपबृहणाय प्रयुक्तो हरिणीवृत्तेन सार्कम् ।

घोर वारिधरस्य वारि किरत श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिर ध्यायता ।
अध्वन्येन विमुक्तकण्ठमखिला रात्रिं तथा क्रन्दितं
ग्रामीणैं पुनरध्वगस्य वसतिर्ग्रामे निषिद्धा यथा ॥११॥

प्रयानप्रग द्रुमभुवनवान्ताय माग वेनागमयपञ्चशरशरजर्जरितत्रोत्पितजनमन मधोनपनीले दयितामभागमोत्कलिकागहर्दिवरविरहजमनोव्यथामरीमृजमानमपि विरहिनिठुरत्वं सहृस्वृग्न

पोपूर्यमाणे मेघागमसमये निर्विनोदत्वान्नून प्रहरत्रयसमितायामपि प्रहरशतायमानायामिव सशय्यमानाया त्रियामाया शोश्रूयमाणेन मेघाडम्बरध्वनिनातिगम्भीरेणातिमात्रसर्वाधितोत्कण्ठातिरस्कृतसुपुप्स कश्चिदध्वग स्वप्रियादिदृक्षयोच्चैस्तरा रुरोदेति मनोज्ञशृङ्गाररसनिष्पादनैकतानोद्योगेन प्रवासिजनहृदयमर्मपारदृश्वना न कविना चित्रवदुपवर्ण्यते, तमिस्राया निशीथिन्या वर्षाम्बु वर्षतो जलमयस्यापि प्रोषितचेतस्तापनस्य धाराधरस्य गम्भीरं स्तनित श्राव श्राव दृष्टिगोचरातीते मयि प्रणयिनि सा मे कामिनी केन प्रकारेण सप्रति वियोगानलदन्दह्यमानमात्मान विनोदयतीति सदीर्घोल्मणोच्छ्वसित विप्रयुक्तामवला ता दीर्घकाल सोत्कण्ठ चिन्तयतोद्गतबाष्पमुखेनाध्वनीनेन यथा प्रमुक्तकण्ठमुच्चै कृत्स्ना निशामरोदि तथा विरहासहिष्णुप्रोषितचित्तवृत्तिविशेषाविशेरन्यथाशङ्किभिर्जनपदैस्तत्ररवैर्हन्त ग्रामे पथिकस्य पुनर्वासस्तव्य न्यषेधीति। वृत्त शार्दूलविक्रीडितम् ।

> धृतो दूरादेव स्मितमधुरमभ्युद्गमविधि
> शिरस्याज्ञा न्यस्ता प्रतिवचनवत्यानतिमति ।
> न दृष्टे शैथिल्य मिलन इति चेतो दहति मे
> निगूढान्त कोपा कठिनहृदये सवृतिरियम् ॥ १२॥

येन पूर्व प्रीतिस्निग्ध हृदय मे स्वप्रेम्णाकारि यश्च मे निरुपमानुरागपात्र भूत्वा जीवितसम आ सप्रत्यभूत् सोऽय परयोपिदभिगमनपानवर्द्धिता निर्लज्जो निस्त्रिशो भूत्वा गृहमागत इति प्रतिकूलप्रभञ्जनवलोत्थापितसमुद्रकल्लोलदोधूयमान यानपात्रमिवाननुकूलनिजकान्तस्वैरविहितस्नेहभङ्गव्यसनझञ्झावातसामन्थ्यमानमपिशोधालुदावानलज्वालादन्दह्यमान दाडिमफलमिवाभ्यसूयाकोपा-

यमानेव सकरुणमाह हे सहचरि तदानीमाकस्मिकप्रणयविग्रहजकपट-क्रोधाद्धेतोस्त्वं गच्छेति मया कथंचित् प्रोक्ते सति वास्तविकेन रोषेणेयमित्थं वदतीति मत्वा दारुणचेतोवृत्तिरसौ मे कामी लीलातल्पं परित्यज्य बलात्कारेण, न जाने, कुत्रापि निष्क्रान्त इत्येव हठाद्विनाशितानुरागाय कृपारहिताय तस्मै वीतलज्जं मे हतमनः साभिलाषं स्पृहयतेऽत्र किं मया कर्तव्यमिति।चाटुकारमपि प्राणनाथं रोषादपास्य या पश्चात्तापमवाप्नोति कलहान्तरिता तु सेति साहित्यदर्पणे दृश्यमानलक्षणान्विता नायिकात्मनो निर्विचारत्वेन हृदयवल्लभं लीलाकोपान्निरस्य खल्वनुशयातिरेकमनुभवन्ती तद्दर्शनोत्कण्ठयेनाभिबोभूयमानास्त इति विषादोपेतस्वभावोक्त्यलंकारहरिणीसंज्ञकवृत्तशालिनानेन प्रणयकलहजविप्रलम्भरसस्वादुना श्लोकेन सुष्ठूपवर्ण्यते। वयमनुयुयुक्षामहे रे रे दुर्विदग्धे कथं नाम चिरमहवासपरिचयसुविज्ञाततदीयचित्तवृत्तिरपि त्वं स्वीयं रमणं मौर्ख्येण निराकृत्यदानीं दुर्मनायसे ?

दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतः श्रुत्वैव तारं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम् ॥१४॥

अहो कीदृशी सेयं लोकोत्तरा सर्वथैव नुतायमानश्रेष्ठ-काव्यस्वादलेहलम्पटगिलरसिकमनोह्लादिपद्यनिर्माणैकपुण्यमूलभूता शेमुषी कविवरेण्यस्य यया स्वप्रभाजाज्वल्यमानस्वरूपं सर्वलोकचमत्कारि मुक्तकरत्नमिदं निरमायि, अहो यौवनोन्मत्तवामलोचनाव्रीडाव्यभिचारिभावपरिपुष्टसंभोगशृङ्गारामृतरसनिष्यन्दित्वेन संभाव्य-

माना सुस्वादुता कवितासृष्टिकार्यप्रावीण्योपेतप्रभास्वरप्रतिभादेदीप्यमानेनामरुणा यशस्विना निपुण प्रतिपादितमनोहरशोभाशालित्वेन चातिरुचिर रूपमस्य श्लोकस्य य पाठ पाठ प्रीतिविकाशोत्फुल्लनेनस्य कस्य चेतोऽतिस्वादुतयातिचारुतया च न द्रवीक्रियत इति मनसि विधाय वयमपि तद्रसचर्वणेनास्मान प्रह्लादयिष्यामोऽधुना। प्रणयिस्त्रीपुसमुरतक्षणदाया ह्यस्तन्या क्षणदायामन्योन्यचुम्बनालिङ्गनलालनवस्त्रापनयनपुरस्सरे सस्नेह रहसि सलपतो स्मेरस्मरविलासप्रमोदितयार्जपत्याविच्यावाच्यचाटूक्तिकण्ठकूजितमणितादिशब्दसमन्वितमनुरागमय यद्वचन गृहस्थलीलाशुकेन सावधान कर्णेऽकारि तद्वचन प्रातस्तरा श्वशुरश्वश्रूप्रमुखाना गुरूणा सान्निध्ये विस्पष्टमुच्चैरुच्चारयतस्तस्यैव शुकस्य नोटिसपुटे स्वसुरतरहस्यप्रकाशनन खलु लज्जारुणितमुखी वधूर्दाडिमबीजव्यपदेशान्निजश्रवणपाल्यवलम्बि कर्णावितसभूत पद्मरागखण्ड निधाय मौनव्रततत्परसन्यासिवत्त्वमपि हे वाचाल वाचयमो भवेतीव तम्य पक्षिहतकस्य वाङ्मुद्रण विधत्त। शार्दूलविक्रीडितवृत्तमय मुक्तकमिद सुरतमर्मगुप्तय गुरजनातिमधानस्य विहितत्वादवगम्यमानो युक्तिर्नामालकाराऽलचरीकर्ति।

अज्ञानेन पराङमुखीं परिभवादाश्लिष्य मा दु खिता
किं लब्ध शठ दुर्नयेन नयता सौभाग्यमेता दशाम्।
पश्यैतद्दयितापुचव्यतिकरोन्मृष्टाङ्गरागारुण
वक्षस्ते मलतैलपङ्कशवलैर्वेणीपदैरङ्कितम् ॥१५॥

पार्श्वमति प्रिया यस्या अन्यासभोगचिह्नित सा खण्डितेति कथिना धीरैरीर्ष्याकषायितेति विश्वनाथेन प्रावेलक्षणान्विता रजस्वला खण्डितमुपति स्वर्तुव्यपगमपर्यन्त वियन्तमपि काल सभोग-

लोलुपा नियन्तुमशक्यत्वात् कृतान्याङ्गनाभिगमनं रतिलम्पटं कामुकं न्यक्कृत्य सरोषमभिभाषते यदरेऽरे वीतलज्ज धूर्त योषिदन्तरेऽनुरक्तस्य तेऽपमानादत्यन्तनिर्विण्णामरुच्या खल्वसमुखीमानुकूल्यविहीना मामविवेकेन पृष्ठे समालिङ्ग्य, कथय, तिरस्कारार्हेण दुर्विनयेनान्यासंगमरूपदुराचारजमात्मनः सौभाग्यभावमीदृशीं गर्हणीयामवस्था गमयता त्वया किं फलमवाप्तं, न किमपि, यतस्ते प्रियायास्तस्याः स्तनाभोगपरिमर्दनेनानुलिप्तो योऽङ्गरागस्तेन पूर्वमरुणीकृतं पश्चात् स्नानार्थमेव लिप्ताभ्यां मलीमसतैलकर्दमाभ्यां कर्बुरैर्मम प्रवेणीलक्ष्मभिर्लाञ्छितमात्मनो भुजान्तरालं पश्येति। इहान्तिमपादे मलतैलपङ्कशबलैर्वेणीपदैरित्यनेन स्वीयकामिनोऽपरासङ्गव्यसनरूपेण दुर्ललितत्वेन नूनं शतधा खण्डिताया ईर्ष्यामानकोटिमधिरूढाया प्रगल्भनायिकाया स्वर्तुसमये सद्य पर्यवसिते सति स्नानार्थं सज्जितत्वं समर्थ्यते येनास्याः कामी सुरतोत्सवनिरतो वनितान्तरमुपभुक्तवान्। यदा स्त्रीविषये कैतवप्रयोगचतुरो दौष्ट्योल्लङ्घितविनयमर्यादोऽन्यया सह मान्मथकेलिं निर्विश्य नखसभागलक्ष्मलाञ्छितं स्वकीयरमणीसमीपमागत्य तामपि सभावनं सचाटु यतेत तदा सा रोषातिरेकस्फुटितहृदया कथं न भवेत् ? तादृश्या खण्डिताया रोषावतारवत्मुद्भशार्दूलविक्रीडितवृत्तनियमितोऽन्यसूयामन्युजनितविप्रलम्भरससमसिक्तोऽयं श्लोको विभूष्यते हेतुमता हेतुवर्णनमिति लक्षणोपेतेन हेत्वलंकारेण।

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ १६ ॥

अनेकस्त्रीनिष्ठे योपिदन्तरलालनेन कृतापराधे वल्लभे गेहागते तद्भार्यां धैर्येण धैर्येणान्तर्मन्यु निग्राह निग्राह प्रत्युत्थानादिरूपेण मृपाप्रश्रयेण स्वागतानर्हमपि त स्वागतीकृत्य सहासनपरिग्रहसभापणसम्श्लेपपुरस्सरमनुरागचेष्टित विधित्सन्त त सविनयं परिहृत्य च मान सिद्धार्थीकृतवतीति नो मान्मथमर्मपारदृश्वा कविवरो वर्णयति यद् गृहागतमपराधिन भर्तारमप्रत्युद्गमनीयमप्यारात् प्रत्युद्गत्य तच्छरीरसपर्कपरिजिहीर्षयैव समाने पीठे सहोपवेशन तया मानिन्या निपुणेन निवारित ताम्बूलपात्रमानयामीति व्याजेन तस्य सबलात्कारालिङ्गनोद्यमोऽपि कुशलबुद्धया तया विश्वसित सामीप्यवर्तिन परिवारमिदमिद कुरुतेति विविधेपु कार्येपु चतुर नियुञ्जानया तया सलापावकाशोऽपि तस्मै न दत्त इत्येवप्रकारेण स्वीय रमण लक्षीकृत्य कपटसन्धियाद्वारा निपुणया तया मनसि निगृहीत क्रोधः सफलीकृत इति । दुर्ललित भर्तारमुद्दिश्य निन्दाभिर्लंघनादिव्याख्यापव्यक्तियर्जम क्लीवृत्तगुपादरया स्थिरधैर्यनिपेर्जायायास्तादृग्विधावसरयोग्य चातुर्यं शार्दूलविक्रीडितवृत्तयुजि रमणापराधजनितविप्रलम्भसमय भुवनाभ्युदयअभिनावसरगोपनगर्भयुक्तिमयपाल्यारादप्यधिरनरमन्नारविनोपायत इति मे मति ।

वृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छल ।
ईपद्वक्रितकन्धर सपुलक प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां घुम्बति ॥ १७ ॥

एवं समानासन समुपविष्टे समानानुरागवत्यौ मानिनीयुगल दृष्टिमार्गे ह्यस्य पृष्ठाद्गत्वा नवदनमुद्गृह्य दुर्लभ-

मदनकलहोत्थमानप्रशमनाय सानुनयं च ... दाक्षिण्यानुकूल्यसमुपेत निजवल्लभं प्रसादनप्रत्यादेशात् कर्कशवचनोच्चारणाच्च विरक्ति गतमपास्य ततोऽनुशयाभिभूतहृदयाया दैन्यातिरेकमुपवर्णयन् नानाविधमदनावस्थाकोविदोऽतिरुचिरशृङ्गाररसैकतानकविसार्वभौमोऽमरुरित्थं यथावस्तु यावन्निगदति यद् यदा पादप्रणाममप्य तस्या निराकृतया सान्त्वने निराशो निगूढकैतवसमाचारैकरसो रे रे धूर्तहतकेति सोल्लुण्ठ सोपालम्भं तया प्रोक्तेन वचसा परमार्थतोऽपमानितस्वान्तरुषा कर्कशीकृतान्त.करणस्तस्यां चिरानुरक्तोऽपि विरज्यमान. प्राणदयितो गृहाद्बहिर्निरयासीत् तदा पश्चात्तापतातप्यमाना सकरुण दीर्घनि.श्वास कृत्वा विरहातुरतया वेपमानकुचकुम्भनिहितपाणिः शोकविकलाश्रुबिन्दुक्लिन्नां दृष्टिमित्यभूतेऽत्र को योग्य. प्रतिविधि स्यादितीव प्रियवयस्यासु न्यपीपतत्। हे किंकर्तव्यताविमूढे मानिनि ! अकारणप्रणयकलहकोपितामीर्ष्याल्लु यथाशक्ति त्वा चरणनिपतनेनाप्यनुनिनीषुं निरुपमानुरागातिशयशालिनं कामिनं निन्दारोपव्याकुलमनसा सुदूरीकृतकोमलस्त्रीस्वभावया पारुष्यप्रसृतचित्तवृत्त्या त्वया निर्घृणं निरस्याधुनानुशयानमया मर्मच्छिद् विरहोऽनुभूयतेतमामित्येतदहो अकाण्डवज्रनिपतनमिवोपलक्ष्यते तथापि किमपि प्रतिविधेयमत्र न स्यात्। नायिकाया स्वाभाविकव्यापारवर्णनसमुत्थेन जातिसंज्ञकेनालंकारेणाथवा विरहरूपानिष्टार्थजन्मभूतकेन विषादनालंकारेणाय हरिणीवृत्तशोभमानोऽपि कान्तनिराकृतिजविप्रलम्भशोकसमुद्रनिमग्न. श्लोको निभूष्यते।

काञ्च्या गाढतरावनद्धवसनप्रान्ता किमर्थं पुन–
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति।

मातः स्वप्तुमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोऽवकाशस्तया ॥१९॥

प्रदोषवेलाया गृहागतस्य प्रणयिनो भर्तुर्भावाकूतावबुभुत्सया नूनं मिथ्या निद्राणा भार्या कथमिय वरारोहा मत्तकाशिनीत्थं निद्राती परिवारमनुयुञ्जानस्य तस्यैव निगदितमाकर्ण्य मदनमदज्वर-व्याकुलितसर्वाङ्गालसा मधुरिमातिशयमीनकेतनकेलिलिप्सया परिवर्तितपार्श्वभागा तस्मै तस्यावकाशमदादिति परम्परानुरक्तमिथुन-सूक्ष्मेङ्गिताकारज्ञाननिष्णातेन सलीलमुक्तकशतमयमकरध्वजविरुदानलीनन्दितसर्वलोकेनास्मदीयेन कविपुंगवेन सरसं व्याह्रियते मन्मेखलागुणेन सुदृढतरमाप्रपदीनाधोवस्त्राञ्चलं निबध्य वामलोचना सवर्णिनी किमर्थं पुनर्निद्रातीति तदीयानुजीविनं परिच्छदं शनैः शनैरनुयुञ्जाने प्रियतमे सति हेऽम्ब मे निद्रासुखमप्यत्र सोऽयं विघ्नयत इति सौजन्यप्राकृतिकमृपाकाशभावितद्वारेण साकूतप्रकाशित-कोपपार्धनिमीलितालसनेत्रया तया कपटनिद्राव्याजेन मन्दमन्दं परिवृत्य विलासशयनीयके तस्यावकाशोऽदायीति । इह गाढतरावनद्ध-वसनप्रान्तशब्देन काञ्चीगुणोच्छ्वसनपुरस्सरवस्त्रापनयनरूपमान्मथलीलायितप्रस्तावमापूर्वकं सरसपीवरनितम्बबिम्बस्पर्शतृष्णा सम्भोगाभिलाषुकस्य कान्तस्य हृदि सजायेत, किमर्थं स्वपितीत्यनेन रम्भोरुः स्तुतप्रियभावजिज्ञासा द्योत्यते, आहितक्रोधयेति पदेनार्थपरिणामात् प्रीतिविवास कान्ताया व्यज्यते, अवकाशो दत्त इत्यनेन च तस्या मनोऽभिराममैथुनपीयूषरसास्विदिषा निभृतं समूच्यते । सम्भोगशृङ्गाररसतन्मयेऽत्र शार्दूलविक्रीडितवृत्तयुजि पद्ये पुनोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाशयते, धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षत इति मम्मटकृतलक्षणोपेत सूक्ष्मालंकार शरीर-

परिवर्तनरूपेणङ्गितेन शयनपार्श्वेऽवकाशदानात्काभिन्य।. सुरताभिलापरूपं सूक्ष्मार्थं व्यक्तीकुर्वाण उत्कृष्टभूषणायते ।

> एकस्मिञ्शयने विपक्षरमणीनामग्रहे मुग्धया
>
> सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि ।
>
> आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा–
>
> न्मा भून्म्लान इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥२०॥

कस्याचिन्निशीथिन्यामेकत्रशयनीयके भार्यया सह शयानेन नूनं स्वप्नायमानेन भर्त्रा वाक्स्खलनात् सपत्नीयमानायाः प्रतिनायिकाया हितेतरमनभीष्टं नामधेयमुच्चारितं सैंहिकेयाग्रहेण राकेव तन्नामग्रहेण सहसा विच्छायता गता सा भार्या सासूया रोषज्वरेण विमुखीभूय प्रसादनानुनयतत्पराणि लालनवचांसि बहून्यभीक्ष्णं प्रयुञ्जानमपि दुर्वारेर्ष्याग्रहग्रस्तत्वात् क्रोधवेगादवहेलिष्ट किञ्च तदनन्तरमेव सामविधौ निराशत्वाद्धृदये गृहीतमूकभावे सति मद्धेतुकचिन्ताव्याधिना मे वल्लभो ग्लानमदृशोऽप्यस्वस्थसंकाशोऽपि मा भूदिति प्रभविष्णुप्रेमबलविजितावलेपरण्टका झटिति शिरोधरा विवर्त्य न पुनरद्राक्षीदित्यन्योन्यासक्तप्रणयिमिथुनेर्ष्यामानस्पोपदशमिश्रितशृङ्गारपीयूषरसप्रोक्षणप्रीणितसहृदयजनमनसामूल्यमुपलक्षणीयमयकाव्यमुक्तावलीगुम्फनामुपार्जितसारस्वतश्रवस्येन शार्दूलविक्रीडितवृत्तप्रियेण कविवरेण्येनामरुणातिरुचिरचित्रवदुपवर्णितेऽत्रेर्ष्यामानात्मकविप्रलम्भानन्तरसञ्जातसंभोगशृङ्गारस्याङ्गभूतया स्मरणकोपचिन्तौत्सुक्यभावना दाम्पत्या निर्मितेन नायनवल्लवारेण शोभमाने मुक्तके विपक्षरमणीनामग्रहणादेन नायकस्य प्रतिनायिकास्मरण कोपपराङ्मुखं ग्लपितयेत्यनेन नायि

कायाः कोपाविर्भावस्तूष्णींस्थितपदेन चिन्ता पश्चिमपादेन चौत्सुक्यं पृथक्पृथगभिव्यज्यन्ते पुनश्चात्र कोपपराङ्मुखं चामन्दवलितग्रीवं चेति क्रियाविशेषणद्वयं वर्तते।

एकस्मिञ्शयने पराङ्मुखतया वीतोत्तरं ताम्यतो–
रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम्।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो–
र्भग्नो मानकलिः सहासरभसं व्यावृत्तकण्ठग्रहः ॥२१॥

सैव क्षणदा परस्परानुरागिणोर्जायापत्योः क्षणभङ्गुरप्रणयकलहभङ्गेन यथार्थतो हृदयंगमसंभोगक्षणदा समजनि यस्यामादौ सर्वंकषस्वपराक्रमोत्सिक्तप्रणयिस्त्रीपुंसकलहप्रियकदर्पदर्पजनितो निष्कारणोऽपि हृदयंतपः प्रणयकलिस्तावपीपिडदित्येवमीर्ष्यामानजकलहात्मकविप्रलम्भदुःखदीर्घीक्रियमाणत्वात् त्रियाममयीमपि यामशतयमानां क्षणदामप्यक्षणदां निशां प्रस्तुतजपत्योः कृते सर्वाङ्गपूर्णेन मनोमोहिना संभोगरसेन यथाशीघ्रं यापयितुमिवास्मत्कविर्वर्णयति यत् समानशय्यायां शयितयोरपि कोपाद् वैमुख्येन व्यपेतप्रतिवचनं यथा तथा दुर्मनायमानयोः सान्त्वनेच्छायामितरेतरस्य मनसि विद्यमानायामपि लघिमपरिजिहीर्षया गरिमाणमाश्रयतोस्तदनन्तरमीपदीपदपाङ्गव्यावर्तनेन शनैः शनैः संयुज्यमानदृशोर्जायापत्योः प्रणयकलहः सस्मितं सत्वरं परिवृत्तयोः परस्परकण्ठयोः समाश्लेषेण विध्वस्त इति। इह जात्यलङ्कारशार्दूलविक्रीडितवृत्तशालिनि मानजविप्रलम्भानुगामिसंभोगशृङ्गारामृतरसमधुरितेऽस्मिन् पद्ये ननु क्षणिकप्रणयकलिः प्रणयमूलकत्वेन प्रणयेनैव प्रशान्तिं सपदि नीयते, नान्येनेति न्यायेन पूर्वार्धेऽनुमीयमानः कलहहेतुकदौर्मनस्यमुत्तरार्धे प्रादुर्भूतेन प्रीतिप्रकर्षेणाभिभूयत इति प्रशस्यसदाचाराश्रितस्त्रीपुं

धर्मानुकूल सर्वत्रानुसृतलोकचारित्रपथाविरुद्धः प्रणय एव प्रमाणम्। किं बहुना, सर्वत्र सर्वदमविजिगीषुमदनमदज्वरोद्दीपककण्ठाश्लेषेण नानारूप दुःखकदम्बकं चिरन्तनमपि दुस्सहमपि विस्मर्यते किं पुनरकिंचित्करप्रणयमानज दुःखम् ?

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥२८

यादृच्छिकप्रणयकलहसमुत्थेन कोमलहृदयशिरीषकुसुमरूपिणा वैमनस्येन सर्वथा व्याप्तं स्वयमनुभूतं दुर्वाच्यवैलक्ष्यपरिपूर्णं विचित्रावस्थान्तरं यथातथं वर्णयन् मधुरमधुरिमसहचरयौवनोद्भेदस्मेरवदनः केनचिद् विश्वासपात्रीभूतेन सुहृदा जिज्ञासया ननु पर्यनुयुक्तः कोऽपि रमणः सरसं ब्रवीति यदकृतमभयस्याप्यकस्मात् सजातस्य निष्कारणस्यापि वैकल्यदायिनः आवयोस्तरुणदम्पत्योः प्रणयकलहस्याद्भुतमकाशे प्रसङ्गेऽधुनैषा मे भार्या मद्विषये किं नु समाचरितुं प्रक्रमिष्यते पश्येयमिति परीचिक्षिषया चिरसहिष्णु धैर्यं मया प्रतिपन्नम्, किं न खलु निष्ठुरहृदयोऽयं धूर्तो मां नाभिभाषत इति गाढोत्कलिकाविमनीकृतया तया रोष उरसि कृतस्ततः कियत्यपि चितातपे काले व्यतीते सति परस्परवैलक्ष्यापाङ्गवीक्षणमनोऽभिरामे तादृग्भूते विकृतदशाविशेषे किंचिदकिंचित्करं मुधा व्यपदिश्य मया वैलक्ष्यस्मितं कृतं तत्क्षणं च तेन स्मितेन विद्राविनरोधान्हृदयया तया स्वीयमानजनितस्थैर्यंनुरं वैमनस्यनुदं नेत्राम्बु निपातितमिति। हन्त निसर्गविशुद्धमुक्ताफलयम्

पममेतन्मुक्तव भावसौक्ष्मसमन्वितप्रणयमानाभिनयकुशलस्त्रीपुंसप्रयुक्तनाट्यप्रेक्षणकवत्प्रेक्षणीय मनोमथनकोपात् किंचिन्निर्वेदकरमपि पुनर्मदनोल्लासप्रादुर्भावात् सन्तुष्टिप्रदं सव्याजं हसितं मया धृतिहरो मुषनस्तु वाष्पस्तयेत्यनेन मञ्जुलेन पादेन व्यक्तीकृताया प्रणयकलहजविप्रलम्भसमनन्तराविस्कृतसंभोगशृङ्गारस्याङ्गभूताया कोपशान्तेर्निमित्ताज्जनितेन समाहितालंकारेण सुमण्डितं पुनः शार्दूलविक्रीडितशोभि कस्य रसार्द्रं चित्तं न समाचरीकृप्यते ?

परिम्लाने माने मुखशशिनि तस्या करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
तया पक्ष्मप्रान्तध्वजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथित. ॥२३॥

प्रयत्नतो नानाविधोपायद्वारेण सुचिरमनुनेनीयमानाया अपि प्रसन्नतामभजमानाया अमर्षव्यभिचारिभावकलुषीकृतान्तरात्मन आत्मनीयदयिताया मदनकोपेन विलक्षचेताविकारसभवमवस्थान्तरमनुभूतवान् कश्चिद् युवा परस्पररहस्यभजनसभावितायं विश्वसनीमाम सुहृद यथावस्तूपाख्यति यन्मदपराधसभवे मनोमथनशीले तस्या म प्राणदयिताया अमर्षे स्वयं परिशुष्यमाणकुसुमवद् ग्लानी प्रशान्तप्राये, तस्मिन्ने गगन समुदितकुमुदबान्धववर्तिनिरूपितत्वादतिचारुणि मदीये चेतसि सदा विकसितत्वादतिमनोज्ञ वदने निरन्तरुच्या तया सोत्कण्ठमिव हस्तनिहिते सति मया प्रियचाटूक्तिसान्त्वनादीना सर्वेषामुपायाना परिक्षयेण इक्वत्रुपायान्तरविरहिते मयि गत्यन्तराभावात्तच्चरणयो केवल प्रणिपातमात्रैकाश्रये सति पक्ष्मलाना पक्ष्मणामक्षिलोम्ना प्रान्ता एव ध्वजास्तेषा

संपुटेऽवरुद्धेनापि तत्रावरोधयितुमशक्यत्वेन प्रकामतः प्रवहताचिरेण पीवरमञ्जुलवक्षोरुहाभोगे सर्वत्र जर्जरितेन मूकेनापि तस्या नेत्राम्बुना मयि प्रसन्नता सहर्षमहनाय समुद्घोषितेति । ननु क्रोधकालुष्येऽपि हृदयमाधुर्यं धारयन्त्या मानिन्या बाष्पमोचनसमकालमेव प्रशान्तिं प्राप्तस्य प्रणयमानस्योपवर्णनोत्थो मुखशशिशब्दनिरूपितरूपकालङ्कृतिसहितो मानसमनन्तरजगभोगरसाङ्गभूतः समाहितालंकारो मान्मथरससारनिष्यन्दिपीनोन्नतस्तनजघनविशिष्टशिखरिणीवद्रुचिरशिखरिणीवृत्तोपेतमेन श्लोकं मण्डयति ।

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतम् ॥२४॥

ह्यस्तन्या विभावर्यां कुत्रचिद्बहिर्गत्वा मदनातुरया प्रतिपक्षस्वामिन्या सार्धं मनोहरकण्ठाश्लेषचुम्बनालिङ्गनपुरस्सरमन्मथलीलामहामहं यथातृप्ति निर्विश्य प्रभाते गृहागते त्वयि किंरूपो वृत्तान्तः समजनीति साभिप्रायं महाशयेन केनचित् परिपृष्टोऽतिपृष्टप्रहर्षोत्फुल्लनयनः समुपजोपमनुभूतकांताद्वयसमुपभोगस्मरणसंतुष्टिस्मेरवदनो जिह्माग्रेणोष्ठपुटं लीढ्वा साटोपमभिभाषते प्रतिपक्षरमण्याः सुरतमृदितायास्तस्याश्चन्दनकुङ्कुमादिमयेन निबिडतराङ्गरागेणानुलिप्तस्य कुचकुम्भयुगलस्य परिरम्भणचिह्नेन प्रतिलाञ्छितं भुजान्तरालस्थलं मच्चरणप्रणिपातव्यतिरश्मिव्याजव्यपदेशेन स्वयमपह्नुषे इति मदीयमार्यया सासूयं निगदिते कुत्र तद् वर्तते इति परिहासपूर्वं व्याहृत्य सपदि तदङ्गरागलाञ्छनमेव परिमार्जितुं, स

ता परिरब्धु, मया सावेग सा समालिङ्गिता विञ्च मदालिङ्गनप-मानन्दवशवदत्वादितरस्या अङ्गरागचिह्नमपि तया विस्मृतमिति। नितान्तराभिगमनस्पस्यमर्मगोपनार्थमेव सभोगचिह्नाङ्कित वक्ष ादप्रमाणमच्छलेन कामुको निगूढवानिति युक्त्यलङ्कारोऽथवा सुरत-चह्नसमसूचितस्य गूढवृत्तान्तस्य प्रणिपातापदेशात् कान्तासमालिङ्ग-च्छायास्तच्चिह्नसप्रमार्जनव्याजाच्च साकूतपिधान विहितमिति पहितालङ्कारो न. कवेरभिप्रेतशार्दूलविक्रीडितवृत्तयुजोप्यमानन-र्नर्मप्रीतिप्रकर्षगर्भे मानानन्तरजनितसभोगरसस्वादुनि पद्येऽत्र सुतरा मव देदीप्यते, किञ्चात्र योषिदन्तरसगमदूषितेऽपि निकृष्टाचारेऽपि-कामिनि दृढबद्धेनानुरागेण समूलघात प्रणयमानस्य विध्वसितत्वाद् यय ससेदमिव वृमहेऽयि युवतय ! सर्वा यूयमबला इत्युच्यध्वे खल्वित्यत्र किमाश्चर्यम् ?

> त्व मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
> लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासस्पृशि ।
> शय्योपान्तनिविष्टसस्मितवधूनेत्रोत्सवानन्दितो
> निर्यात. शनकैरलीकवचनोपन्यासमालीजन ॥ २५ ॥

कदाचिच्चित्तापहारिमदनमदद्रवीभूतसर्वावयवस्य गाढप्रेमबन्ध-सदानितचेतोवृत्ते स्वकीयमुग्धश्यामलोचनामनिर्वचनीयशारीरकमुप-मामोसुम्भमाना सस्नेह दर्श दर्शमकुत सभवमदातिरेकदर्पितपुष्प-धन्वसहेलप्रक्षिप्तपौष्पबाणताताड्यमानस्य कान्तस्य वान्तासबुभु-क्षालक्षण वाच्यातिरिक्तव्यङ्ग्यार्थ रुचिरध्वनिहेतुकमर्थव्यञ्जनाश-क्त्याश्रयेण सुरसमधुरिमवाहध्वनिमयकाव्यरत्ननिर्माणचतुरेणास्म-दीयेन कविना सरनर्मभिधीयतेऽयि चारुलोचने कञ्चुलिकापराह्नस्त-

नाशुकमन्तरेणापि पीवरोच्छ्रितवक्षोरुहकुम्भयुगलकस्य चक्षुस्त्वगिन्द्रियपरमसुखदायित्वान्मनोविमोहिनी प्रकृतिप्रभावती स्तनशोभा त्व जुषस इत्येवप्रकारेण साभिलाष व्याहरति प्रेष्ठे प्राणेश्वरे स्तनांशुक विमोचयितु तद्बन्धनग्रन्थि सस्पृशति सति युष्मत्समक्षमेवाय मेऽनुरक्तभर्तेदृश चापल्य समाचिचरिष्यतीति व्रीडानतया शयनप्रान्तदेशोपविष्टाया विलम्बितविकस्वरवदनारविन्दाया यद्वा भाविसुरतोत्सवचिन्तनमना निमीलितनयनप्रमादप्रमुदितस्तदीयसखीजनस्ती दपती परस्पररिरंसा सफलीकारयितुमेव कार्यान्तरव्यपदेशेन विनयमुक्त्वा मन्थरगतिस्तत स्थानाद्बहिर्निरयासीदिती। 'देहि मत्कन्दुक राधे परिधाननिगूहितम्, इति विस्रगवन्नीयो तस्याः कृष्णो मुदेऽस्तु न' इतिवदन पूर्वपादद्वयसमूचितेन कञ्चुलिकापहरणव्याजेनाभिलषितसभोगार्थसाधनम्, 'यामि चूतलता द्रष्टु युवाभ्यामास्यतामिह' इतियदुत्तरपादद्वये व्यक्तीकृतेनालीकवचनच्छलेन निर्याणोभि सखीभिस्तयोर्दम्पत्योरभिप्रेतरतिमर्यस्य सपादन कृतमिति निरूपित पर्यायोक्ताख्यालङ्कारः प्रदृष्टभूपायने पुनरपि चात्र पूर्ववच्छाद[illegible]यित्रीदितवृत्तशालिनि काव्यग्रन्थगतायमाने सुवनपल्ले मृगाक्षीति [illegible] वराङ्गनाभिलोभनार्थं प्रयुक्तो, विनेय [illegible] [illegible]

[illegible]

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ २६ ॥

निजहृदयस्यापि कामुकस्यापराङ्गनालापनादिशाठ्यदोषेण खण्डितयात एव दुर्निवारेर्ष्यामर्षमतापवचायितलाञ्छनया त्वया दुर्ललित त प्रति सम्भ्रूभङ्गमानानुभावप्रकाशनार्थमेवमेव क्रियतामिति प्रौढसखीभिरध्यापितरोषानुभावप्रकाराप्यतिमुग्धतया वा तस्मिन् कामयितरि सुतरामनुरक्तत्वेन वा तया कर्तुमसमर्था भूत्वा मुग्धयुवतिस्ता अभिभाषते हे प्रियसख्य ! स मे रमणः दृष्टिगोचरे कृत्वा प्रणयक्रोधप्रकटनाय कथमपि भ्रुकुटिरचनाया विहितायामपि स्नेहव्यक्तिपेशला दृष्टिर्ममीलुत्वयाधिक्येन मोत्सुकं तं जनं निरीक्षते तदातिमर्यादैनापराधेन क्रुद्धाह न विभाषिष्य इतीव वाचयमतायां वृत्त्याद ङ्गीकृतायामपि तद्दर्शनानन्दनेद हतमुखं विकसितस्मितं सजायते, कथमप्यभिनयनद्वारा मनसि काठिन्यं प्रापिते न तु स्वयं प्राप्ते शरीरं यथातृप्ति तदवलोकनप्रीतिप्रकर्षेण पुलकयतीत्य नयनोत्सवरूप तस्मिञ्जने वीक्षिते सत्यस्यमूयामर्षविकारा कथं मभवितुमर्हतीति । ननु वरीयसा भर्तृवात्सल्याविषयेन सर्वथा पराजीयमानस्य भ्रूचापभञ्जनादीङ्गितानारचेष्टितैर्यथाशक्ति बहिर्व्यक्तीकृतस्यापि प्रणयकोपानुभावस्य कुत सामर्थ्यम् ? कितवाचारोऽपि निकृष्टप्रकृतिरपि स धन्यो य प्राणदयित इति बहुमन्यते स्नेहपूर्वं सभाजयते चेत्यभूत श्लाघ्यममाचार प्रवृत्तस्वभाव मृदुलमृदुलेनेतोवृत्ति कमनीय स्त्रीरत्नं यदीयसुकुमारस्वभाववर्णनादयमपि शार्दूलविक्रीडितवृत्तपद्यं स्तोरविप्रलम्भव्यञ्जनमिश्रितहृद्यसंभोगरसशाली श्लोक स्वभावोक्त्यलङ्काररत्नेन शोभनेतराम् ।

सा पत्युः प्रथमेऽपराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः ॥ २७ ॥

आमरणपरस्परात्मसमर्पणशासिनित्याविप्लुतस्नेहभक्तिव्रतमहित — स्यापि विवाहोत्सवस्य निरुपमप्रीतिविकासपूर्वमनुष्ठितस्य काले कियति सजाते प्रेमपात्रे परिणेतरि दौर्भाग्ययोगादपराद्धे सति प्राथमिकेन तस्यैव प्रणयापराधेन जात्वपरिचितत्वादुताहोस्विदात्मनो मौग्ध्यातिशयाद् वाक्कृत्रिममर्षकिंचित्करमात्मानमनुशोचन्ती किंकर्तव्यतामूढचेतसं नवोढा तरुणीमुपविवर्णयिपुणा परमाणुवत्सूक्ष्मयौवतस्वभावपारदृश्वना कविवरेण सकरुणमभिधीयते यन्निजप्रियोद्वोढुः प्रथमे मन्मथविषयकदुश्चरितावसरे विश्वसनीयया प्रगल्भया सख्या दीयमानमुपदेशमन्तरेण प्रणयमानविषये नूनमात्मनोऽकिंचिज्ज्ञत्वाद्विलाससहितमुलसितशरीरपरिवर्तनसाकूतभङ्गीभणितैः करणीयमपि तदपराधावबोधकं विधिं किंचिदपि नावगच्छति सा येन स्वभर्तृकर्तृकप्रणयभङ्गजनितातिशयमन्युवैश्वानरपरिदन्दह्यमानस्वान्तत्वेनाति-मात्रनिर्वेददैन्यसञ्चारिभावपरावीभूयमानहृदयसौकुमार्यत्वेन च सौवितकधवलैः सद्योदुग्धदुग्धवदवदातगण्डभित्तिच्युतैरजस्रपतत्पतय-मानचलोदबिन्दुभिरश्रुभिः सर्वतोव्याप्तनयनेन्दीवरशोभिनी तरुणी केवलमेव सशोकं रोदिति । तन्वय प्रणयमन्युजकरुणविप्रलम्भशोकविकासोऽपि श्लोको निरन्तरनिपतदश्रुपूरपरिपूर्णनेत्रोत्पलाया मुग्धसुकुमारस्वभावव्यापकेन पर्यन्तनेत्रोत्पलेतिपदसूचितरूपकगर्भितेन स्वभावोक्त्यलंकारेण विभूष्यतेऽपि चास्य वृत्तं तु पूर्ववच्छार्दूलविक्रीडितम् ।

भवतु विदितं व्यर्थालापैरलं प्रिय गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥ २८ ॥

प्रबलवनितान्तरप्रसवितप्रकटितप्रातिकूल्यस्य सान्द्रानुरक्तस्वीगायावात्सल्यनिरपेक्षानुमेयनिरनुक्रोशमनोवृत्ते सर्वथा मृषावादित्वाद् विश्वासानर्हस्यान्यत्रगतमनस्कत्वान्निर्दयस्य प्रियभाषिणोऽपि परातिसंधानशीलस्य स्वभर्तुर्निष्ठुरप्रणयभङ्गेन हृदयतपेन खण्डशःखण्डितत्वात् संजातजीवितनैराश्या तथा निश्चितप्राणपरित्यागाध्यवसाया यथापूर्वं वृथाप्रसादनवचनशतैः पौनःपुन्येनानुनयप्रयत्नं विदधानं तं निर्विण्णा काचिन्नायिका सावज्ञं ब्रवीति, प्रिय ! बहुशो विहितान्ययोषिदभिगमनपापेन त्वयेदानीं यद् यदभिधीयते तत्तत्तथैव तिष्ठतु सर्वमेतत् तव दुश्चरितवृत्तान्तकदम्बकं सम्यग्ज्ञातमेवैतस्माद्वेलोर्मेऽपराध एको मर्षयितव्यस्त्वदायत्ते मयि विमुखो मा खलु भूरित्यादिभिर्मृषाप्रलापैः मोघीभूतं कृतम्, एतादृशानि वृथावचांसि पुनर्मा कृथाः, यत्र तेऽनुरक्ता प्रेयसी निवसति तत्रैव सर्वात्मना झगिति त्वया साध्यताम्, स्वल्पमप्यत्र ते स्खलितं नास्ति किन्तु भागधेयमावयोरननुकूलमेव, तेन प्रकारेण परिबृंहितं ते प्रेम महिलान्तरसंगमेनेयतीमवस्थां प्राप्तं स्याच्चेत्तर्हि निसर्गभङ्गुरे दग्धजीवने व्यपेतेऽपि का तीव्रवेदना स्यात्, न कापीति । इह पराङ्गनासंभोगलक्षणे प्रियस्यागसि व्यक्तीकृतेऽपि तत्प्रतिषेधमनुक्त्वा केवलं गम्यतां का पीडा गते हतजीवित इत्यादिनात्मव्यापादननिश्चयशंसिना वचसा निषेधगर्भार्थविशेषस्याक्षिप्तत्वादाक्षेपालंकारविभूषिते हरिणीवृत्तयुजि पद्ये प्रिय तनुरपि न ते दोष इत्यनेन

सोत्प्रासवचसा परमार्थतोऽप्रिय ते दोष सुमहानिति विपरीतं वगम्यते प्रकृतितरले हतजीवित इत्यनेन वैराग्यख्यापनेन भ जीवलोकस्य क्षणनश्वरत्वं च। बलवान् खलु स्त्रीणाम् यदर्थममूल्यमन्यमपि स्वस्वजीवितं तान्तृणवदुपेक्षेरन् प्रति प्रतिविधेये प्रणयभङ्गे सति यथैव स्वदेशभक्ता सत्पुरुषा देशविप्लवे।

उरसि निहितस्तारो हारः कृतो जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ २९ ॥

शोभिनि श्लोके 'मञ्जीरा स्वेषु गात्रेषु मूकीकृतविभूषणा, अवगुण्ठनसवीता कुलजाभिसरेद्यदि' इति साहित्यदर्पणप्रकटितलक्षणान्वितया कुलजाभिसारिकया सुष्ठु भवितव्यं न तु 'विचित्रोज्ज्वलवेषा तु रणन्नूपुरकङ्कणा प्रमोदस्मेरवदना स्याद् वेश्याभिसरेद्यदि' इतिवदिति समूचितमत्र च त्वमाहतडिण्डिमेति सोल्लासनर्मगर्भितेन पदेन मदकलहंसकण्ठध्वनिवत्किलकिलशब्दकराभरणजालस्याप्रशस्तत्व चरमपादेन च तस्या अभिसारिकाया कुलत्वमुत्पन्नत्व पृथग्विज्ञाप्यते । नन्वियमतिमौग्ध्येन सुरतलोभेन वावधीरितयोग्यावल्पा स्यादथवा केवलमात्मानं सोत्कण्ठं प्रतिपालयन्त रमणं सतोष यितुमेवप्रकारेण सुमण्डितसर्वाङ्गसुन्दरी स्यादिति मन्यामहे ।

मलयमरुता व्राता वाता विकासितमल्लिका—
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटय त त्व नि स्नेह य एव निवर्तते
प्रभवति गवा किं नश्छिन्न स एव धनंजय ॥ ३० ॥

भृशमानन्दितमारसनिकुरम्बाभिनन्दिनेऽभिप्रमुदितवलाधिकदम्बप्रताण्डवाडम्बरे नवपयःप्रोक्षित मतापनापितप्रायशाड्वलविस्तरोज्जीवनपृति नैदाघतपनतप्त क्लेशचिरतृषितनि शाचम्यावरजङ्गमम्महाप्रमोदिनि दीर्घकालविरहितप्रणयिस्त्रीपुरुषसयोजयितरि सौरभ्य्रोऽर्पेक्षितागमे वर्षासमये दार्ढीभूतविप्रयोगमन्युमुदितत्वान्ता काचित् प्रोषितभर्तृका प्राणवल्लभं भर्तारं समानतु वाञ्छाह सकरुणं प्रार्थयते यन्मन्मथमथिताना मनाना कामानलोद्दीपनदीप्ताना मलयाद्रिचन्दनसमीरणाना निवहा दक्षिणादशामितुस्तथापि स मे दयितो नायासीत् समुन्मेषितमल्लिकापुष्पसौगन्ध्यतर्पितघ्राणेन्द्रियो निदाघोदि

यत्यपीत् तथापि स न प्रत्यागमत्, हे जलद ! संप्रति त्वत्समय
समागतस्तेन त्वमुत्साहवान् भवसि चेत् तर्हि त्वमनागमनप्रकटित
नेरपेक्षं निरनुक्रोशं तं मया सह सयोजय, किमस्माकं च्युतं भवेत्
र किमपि, यथा य एव धनसदृश गोत्रजं प्रत्यानेतु शक्नोति र
एव धनंजयस्तथा त्वद्विधा जलमुग्वरा मादृक्षीणा विरहिणीन
द्वितीय-जीवितभूतानां प्रोषितानां भर्तॄणां समानयने खलु पारयन्ती
ति मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेत. कण्ठाश्लेषप्रणयिनि
जने किं पुनर्दूरसंस्थ इति कालिदासीयमेघदूते समुपलभ्यवचनवत्
प्रावृषेण्यवारिदसंदर्शनेन कान्ताविरहातुराः प्रवासिनस्तत्समागमौ
त्सुक्यातिशयेनाग्रेऽग्रे प्रेर्यमाणा. कृच्छ्रेणापि विप्रकृष्टविदेशादपि
सत्वर विप्रयोगसमयानुपभुक्तनानासंभोगार्थयथातृप्ति ... ेव
निजगेहं प्रति धावन्तीत्यर्थ ध्वनयति विरहजनितविप्रल ... रस,
ससिक्त हरिणीवृत्तसदानितं मुक्तकमेतद् ' भुजङ्ग एव जा ... भुजङ्ग
चरण सखे ' इतिवद् ' य एव गवा निवर्तने प्रभवति स एव ...
इति प्रसिद्धलोकोक्तौ यथा गोधनं व्यावर्तयितु प्रभूष्णुरर्जुन ...
समर्थस्तथा धनादिलिप्सामुद्दूरापहृत प्रणयिन भर्तारं समानेतुं प्रभ-
विष्णुस्त्वं मेघ एव शक्नोमीति छेकोक्त्यर्थान्तरस्य गर्भीकृतत्वाच्छे-
कोक्तिमञ्जकेनालङ्कारेण समलङ्क्रियते च ।

> प्रातःप्रातरुपागतेन जनिता निर्निद्रता चक्षुषो—
> मन्दाया मम गौरवं व्यपगतं प्रोत्पादितं लाघवम् ।
> किं तद्यन्न कृतं त्वया मरणभीर्मुक्ता मया गम्यतां
> दुःखं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तच्छ्रोष्यसि ॥ ३१ ॥

प्रतिरात्रमनभिमतप्रतिपक्षकामिन्या समं विविधमन्मथकेलिकलापं

यथारुचि स्वैर स्वैर समुपभोज समुपभोज केवल प्रभातसमये वसति-
निकेतनमागत्य निम्नप दर्शितात्मान न कर्हिचिदपि निधुवनसभोगा-
वकाशलेशमपि ददान निस्त्रिशमन्याप्रसक्त धव दृष्ट्वा सजातहृद्वेदना
विरहज्वरतात्तप्यमानसर्वावयवा शारीरकरोगेण सर्वथार्दिता मन्देव
मानसिकपीडया सर्वतो मृदिता मन्दभागधेया सकरुणमर्थान्तरशसिव-
क्षोभितन्यासेनोपालभते प्रतिप्रभात स्वास्थ्यविशेषपिपृच्छिषया
समायातेनाशीष्टजनरूपिणा त्वयैव निद्रालसाभ्या नेत्राभ्या दिवा-
निष्टा निद्रा सुखेनापनीता रोगिण्या ममास्वास्थ्यगरिमा व्यपेतो
जनितविशेष शारीरकलघिमा त्वदुपकारेण दिष्ट्या सजातो मे
स्वास्थ्यसपादनार्थं यद्यद् विधेय तत्तत् किं न त्वया दयालुना न कृत,
कृतमेव, मन्ये मतिविशेषलाघवलाभेन भयानकमृत्युभीति सम्यङ्मया
दूरीकृतात एव प्रत्याशादृढीकृतमनस्काह जीविष्यामि, कथ दु ख-
मास्ते, भवानधुना प्रमुदितमना साधयतु, यद् योगक्षेमयाय समी-
हित करिष्यामि तत् त्वमपि नचिरेणाकर्णयिष्यसीत्यकमवरार्थ समू-
चयन्ती पुनरपि, निशि निशि प्रतिद्वन्द्विवनिताभिगमन कार कार
प्रभाते प्रभातेऽन प्रत्यावृत्तन कृतैनसा त्वया शतयामायमानाया त्रिया-
माया त्वद्विरहदु खेन जागर जागर प्रातस्तन समय कथ चिल्लब्ध-
निद्रासुखाया मे चक्षुर्भ्या स्वप्न इत्थमपनीतो मन्दभागिन्या मम
गौरवमदृश्यता शमित किञ्च तुच्छत्वमेव प्रोत्पादित मा सावहेलमु-
पेक्षितु त्वया यद्यत् कर्तव्य तत्तत् सर्वं किं न कृतमत एव त्वया निष्ठुर-
हृदयेन त्यक्तया मयापि भवत्प्रपञ्चनामयमधुनैव त्यक्तम्, कथ
सखेदमास्से, स्वीयकामिन्या तया नानासुरतविशेषान् पुनरनु-
भविष्यता त्वया निवसतु झटिति गम्यता, यत् ममोहितात्मव्यापाद-
नलक्षण पथ्य विधास्यामि तदचिरेण श्रवणे करिष्यसीति हृदि
कृतप्रधानार्थमभिव्यञ्जयन्ती । आत्महत्याध्यवसायपिशुनेनैव विधेन
वचसा भर्तुरङ्गनान्तरसङ्गमो निषिद्ध इत्याक्षेपालङ्कारसमुन्मण्डिताकारे

तथा शार्दूलविक्रीडितवृत्तसनद्धपादचतुष्टये खण्डिताया धीरप्रगल्भ नायिकाया कान्तविरहाभिशाचनपरसिनि श्लोकउत्प्रोपमालङ्कार भूषितस्य मन्दाया इतिशब्दस्य निरुपमा शक्ति पूर्वसूचितार्थयुगल सरस प्रकाशयन्ती स्वप्रभया देदीप्यते।

सा बाला वयमप्रगल्भमनस सा स्त्री वय कातरा
सा पीनोन्नतिमत्पयोधरयुग धत्ते सखेदा वयम्।
साक्रान्ता जघनस्थलेन गुरुणा गन्तु न शक्ता वय
दोपैरन्यजनाश्रयैरपटवो जाता स्म इत्यद्भुतम् ॥ ३२ ॥

यथैव बाल्ये मनसोऽप्रागल्भ्य युक्त भवति तथैव सा दरमुकुलितसुमन कलिकेव यौवनारम्भस्था षोडशवर्षदेशीया साम्प्रतमप्यक्षतयोनि वन्या वय च तथाभूत कन्यारत्न कथमवाप्नुयामेति चिन्ताग्रस्तत्वादधृष्टचेतसो यथैव स्त्रीस्वभावे कातर्य साम्प्रत विद्यते तथैव सा पुरुषतरा दुर्लभा दुराक्रमणीया नारी वय च केन प्रकारेण ता हस्त कुर्वीमहीति समयापन्ना दुर्विदग्धा यथैव गरीयोभारवहने खद सजायते तदैव सा गिरीय पीवराच्छितवक्षोरुहकुम्भयुगलमस्मद्धस्तसम्पर्काश्लेषार्ह वहति वय चापि कदा परिस्पर्शनीयपीवरस्तन्यास्तस्या गाढकण्ठाश्लेषो भवितुमर्हतीति निश्चयराहित्येन परिखिन्नहृदया बोभूमा यथैव चातिशयभारानातस्य जनस्य गमनेऽसौष्ठवमुत्पद्यते तथैव सा नूनमतिभारायमाणेन गरिष्ठेन श्रोणीबिम्बेन समाक्रान्तात्सगजगामिनी पुनश्च वयमप्यस्मद्धस्तस्पर्शसवाहनयोग्यस्य तस्या पीवरनितम्बफलकस्यालाभेन दु खितत्वादेकमपि पद निक्षेप्तुमसमर्था इत्थ जनान्तरसमाश्रयिभिर्दोषै सर्वतोऽस्वस्था सवृत्ता स्म इति यत् महदाश्चर्यमिति लोभनीयाकृति

विप्रोषशोशुष्यमाने कस्मिश्चित् कन्यारत्ने स्वयं स्निह्यता तदवाप्ति-लोलुपेन केनचिद् यूना सवितर्कं साशङ्कं चाभिधीयते ।

'विषं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः' इत्युदाहरणवत् सा बालेत्यादिकारणानां वयमप्रगल्भमनस इत्यादिकार्याणां चान्योन्यविरुद्धत्वस्य भिन्नदेशस्थत्वस्य शसनेन भिन्नदेशतयात्यन्तं कार्य–कारण–भूतयोः युगपद्धर्मयोर्यत्र स्याति स्यात्सङ्गतिः।' इति काव्यप्रकाशकारोक्तलक्षणान्वितोऽसंगतिरलंकारः एन शार्दूलविक्रीडितवृत्तनिबद्धश्लोकं विभूषयति । अत्र च दोषैरिति शब्दोऽर्थवैपरीत्येन गुणैरित्यभिप्रायोऽवगम्यतेपुनश्चात्र लंकेश्वरस्य दशमुखस्य रामवल्लभां सीतां प्रति स्वयं प्रदर्शितैकानुरागलक्षणवच्छृङ्गाराभासस्येव कस्य चिद् यूनोऽप्रकटितप्रभावाया स्पृहणीयायामपि प्रच्छन्नहृदयाया कस्याचिदनुरक्तास्यैकानुरगित्वस्योभयानुरागवर्जितत्वात् कोऽप्यास्वादनीयरसोपन्यासो न दृश्यते तथाप्ययं श्लोको मदनमदरुचिरतारुण्योन्मत्तस्य यूनो दयनीयप्रेमभावप्रदर्शनेन हृदयंगमोत्तमकाव्यप्रबन्धायमान इव दरीदृश्यते इति कोऽत्र संदेहलेशावकाशः ?

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ।।३३।।

केनाप्यविज्ञातेन कारणेन दूरवर्तिदेशान्तरगमननिश्चितमनसि निरुपमस्नेहास्पदीभूते प्राणदयिते भर्तरि भविष्यद्विरहदौर्भाग्यमसहिष्णुतयेन्मनायमाना तं विना निमेषमात्रमपि न जिजीविषुर्वैमनस्यनैराश्यातिशयविह्वला स्वदग्धजीवितं सनिर्वेदं निन्दन्ती काचिदचिरवाप्यचिरभाविना तदीयप्रवासेन विधवासदृशी स्वयमेवात्मानमुद्दिश्य प्रल-

पति हे जीवितहतक! श्रेष्ठे प्राणेश्वरे प्रवासायात्यनुरक्तामपि मा भार्यां परित्यज्य प्रस्थातुं कृतव्यवसाये सति कनकवलयभ्रंशरिक्तप्रकोष्ठस्य मेघदूतनायकस्य वलयवत् सुचिरधृतत्वात् प्रियसखसमानैरङ्गैरपि तद्विप्रयोगासहत्वेनेव भाविविरहशोकाग्निजनितेन दौर्बल्यान्वित कार्श्येन हस्ताभ्यां गलद्भिः प्रयाणकृत दुस्सहविप्रलम्भवेदनया सहभाविभिः प्रियमित्रैः पतयालुभिर्बाष्पैरपि प्रस्थित चिरकालसहवासित्वान्मित्रीभूतेन धैर्येणापि मुहूर्तमात्रमप्येकाकिनासितुमनिच्छताग्रे प्रयात मम हृदये सुचिरमुषितत्वात् समीहितसुहृद्भूतेन चेतसापि पुरस्ताद् भर्त्रा सह यातुं दृढमध्यवसितमित्थं सर्वैं बहुमताः सुहृद समकालमेव प्रयाणं कृतवन्तस्तस्माद्धेतोर्हतजीवित! त्वयाप्यवश्यं यातव्ये किमर्थं त्वयैवभूतानि वलयादिमित्राणि ननु पश्चादित्यन्ते, तैः सह त्वमपि प्रस्थास्यमानेन भर्त्रा साकं प्रयाहीति।

'गुणप्रधानभावावच्छिन्नमहार्थसम्बधोक्ति' इति रसगङ्गाधरकृतलक्षणवत् तृतीयान्तशब्दैर्वलयादिभिः सहशब्दस्य प्रकाशितत्वात् सहोक्तिसञ्ज्ञकालङ्कारसमलङ्कृते शोचनीयदैन्यसञ्चारिभावपुरस्सरभाविप्रवासजनिष्यद्विप्रलम्भशृङ्गाररसनिष्यन्दिनि शार्दूलविक्रीडितवृत्तकल्पितपादे श्लोकेऽत्र प्रोषितभर्तृकाभावे स्थातुमशक्ताया स्निग्धप्रेमरससाराद्रीकृतान्तःकरणाया भार्याया जीवितनिरपेक्ष सहृदयानामस्माकं हृदयानि सान्द्राश्रुप्रवाहेणार्द्रीकरोतीत्यत परं किं विस्तरेण?

सदष्टेऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता।
सीत्कारास्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥३४॥

क्षीरवारिधिविलोडनसमुत्थेनापि पीयूषेण किं प्रयोजनं लोकोत्तरचमत्कारिरसविशेषशालिनि मनोहारिणीनां रुचिरदृष्टिविभ्रमशोभिवदनेन्दुविजितचन्द्रबिम्बानां स्पृहणीयपीवरोन्नतस्तनीनां स्पर्शनीयजघनभारालसगतीनां नयनोत्सवप्रदरम्भोरूणां विलासिनीनां सर्वजित्यप्यतिशयप्रदिमपरिपूर्णे सर्वदमेऽप्यतिरुचिररससारस्वादिममयेऽधरपल्लवेऽमृतायमाने विद्यमाने सतीति शृङ्गारामृतरसज्ञो रसिकलोकैः शश्वदुपश्लोकितस्वर्धुनीहसायमानयशा अस्मदीयः कविः कामपुरुषार्थस्यानिर्वचनीय फलमवबोधयन्नाह यत् सुरतक्रीडारसलोलुभैर्दन्ताग्रैराहते किसलयसुकुमारेऽधरे चकितचकितकिलकिञ्चितपूर्वकमग्रहस्त दोधूयमाना मा कृथा मा कृथा अलमल मा विमुञ्च धूर्तेत्यलीकरोपवचोभि साकं विरचितसलीलभ्रुकुटी चुम्बनपरमानन्दोच्चारितसीत्कृतिपूर्वं दरकूणितनेत्रद्वयी रतिलीलास्यरूपा वरवर्णिनी कामातुरैः कामिभिः ससम्भ्रमावेग परिचुम्बिता तैरेव वास्तविकं पीयूषं समर्जितमेव किन्तु मुर्खैर्दिविषद्भि सुरासुरैः केवलं परिखेदाय दुग्धाब्धीर्वृथा मथित इति। अत्र यैदचुम्बिता मानिनीति वाक्येन रतिशूराणामनेकपुरुषाणां पण्यविलासिन्यामिवैकस्याः स्त्रिया सान्द्रप्रसक्तिः स्त्रीपुरुषन्यायपथविरुद्धत्वादश्लीलजनकत्वाच्च कविना न विवक्षिता परन्तु मानिनीति जातावेकवचनप्रयुक्तेन शब्देनैकैकैरमणैः स्वकस्वकरमण्यः परिचुम्बिता इति विस्पष्टार्थः सुसूचयिषितः किञ्चात्र मनोज्ञसभोगशृङ्गारसुधारसनिर्झरोक्षिते पूर्ववच्छार्दूलविक्रीडितवृत्तकल्पिताकारे श्लोके यथातथममृतमपह्नुत्य स्वादिष्ठाधरपल्लवस्यामृतत्वे निरूपितत्वादपह्नुत्यलङ्कारः प्रभासत इति नूनं योषितामोष्ठविम्बमेवासारे ससारे सारवस्तु

सुप्तोऽयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावेशितया मया तरलया न्यस्तं मुखं तन्मुखे।

ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यं क्रमं ॥३५॥

निद्रासुखनिमग्नोऽय ते प्रियतमो हे प्रियसहचरि त्वयापीदानी सुप्तिसौख्यमनुभूयतामिति मा प्रति भाषित्वा शीघ्रसुरतसमुपभोगतृष्णयास्मान् बहिर्निगमयितु कृतच्छतकनिद्राव्याजोऽय वञ्चनशील इति सम्यग्ज्ञाततदीयगूढभावा सख्य निरयासिपुस्ततस्तासा निर्गमनात्समनन्तर सर्वकपमन्मथाभिनिवेशग्रस्तया रिरसातरलायमानचेतसा मया परिचुम्बनाय स्ववदन तदीयवदने सानुराग न्यधायि तेन च मुखन्यासेन प्रहृष्टपुलकोद्गमाद् वञ्चकस्यापि हृदयस्य तस्य निद्राव्यपदेशसहिते नेत्रयो कपटमुकुलने विदिते सति समकालमेव मे व्रीडा समजनि परन्तु सापि क्षणिकतया तेन पुष्पायुधरहस्यकोविदेन दयितेन तत्समयक्षमैर्निधुवनप्रस्तावशसिभिश्चुम्बनालिङ्गनवस्त्रापहरणगानसवाहनादिभिर्विधानै सुदूरमपाहारीति यथदनङ्गरङ्ग प्रसङ्गे तदानी समुवन तत्तत् सर्वं विश्वासपात्रभूतायै सहचर्यै सहर्ष निवदयति तत्स्मरणस्मेरवदनारविन्दा मन्मथवशवदा वासस्थानुकूलरमणसहवासमुदिता काचन तरुणी ।

लल्विहादिमपादन विजने कान्तासभोगप्रमोदप्रेप्सया प्रदापसमय दृष्टियुगल मुकुलीकृत्य सुप्तागुप्तस्य कान्तस्य निगूढाभिप्राय सविध त तया सह निर्विघ्न मदनललित रहसि यथेच्छ निर्वेशयितु वयस्याभिर्निर्यातमिति, द्वितीयपादेनाय मे प्रेष्ठोऽवितथ निद्रित इति मत्वौत्सुक्यमचारिभावाभिभूतत्वात् तन्मुख निर्वितर्क परिचुम्ब्य यामिन्या राग उद्दिपित इति, तृतीयतुरीयपादाभ्या च प्रहृष्टपुलकपुरस्सर परम्परानुरागिणोर्मन्मथमदातुरयोस्तयो सुरतिमहामह मजात इति निःसशय वितनयते । निद्राव्यपदेशेन नयन निमील्य नायकेन सभागाभिलाषस्य प्रच्छादितत्वाद् यथायथ 'व्याजोक्तिरछ-

यनोद्भिन्नरूपवस्तुनिगूहनम्' इति काव्यप्रदीपकृतेन लक्षणेन 'निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्ति' इतिकाव्यप्रकाशकारसंपादितेन लक्षणेन चान्वितो व्याजोक्तिसंज्ञकालंकारं परिपूर्णसंभोगरसव्यञ्जकं शार्दूलविक्रीडितवृत्तोपेतं श्लोकमेनं समलंकरोति।

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः॥३६॥

कदाचिन्निर्मर्यादेन वनितान्तराभिगमनादिकदुश्चरितेन कृतेनसे वल्लभाय क्रुध्यन्ती तदपराधातिशयखण्डिता धैर्यप्रागल्भ्यनिधिः प्रौढयौवना काचिद्भामिनी सामाद्युपायकदम्बकेन साग्रहं तेन सुचिरमनुनेनीयमाना चरमे तितिक्षया तदीयस्खलितमसह्यमपि कथंचिन्मर्षयितुकामा विदग्धोक्तिद्वारेण तमभिभाषते शृणु यत्र प्रेम्णि तरङ्गितभ्रुकुटिबन्ध एवामर्षं सतर्जनताडनादिकेनाविनीतेन रोषप्रकाशनस्याप्राप्तकालत्वान्मनस उद्वेजकत्वाच्च यत्र प्रेम्णि तूष्णींभावाङ्गीकार एव यथापराधदण्डो न तु काष्ठमयदण्डप्रयोगो वाक्पारुष्यकरणं वा, तादृगम्य प्रणयस्खलितेऽयोग्यत्वाद् यत्र प्रेम्णि परस्परस्मितिरेव स्वाभाविकी सफलानुनीतिर्नानाविधसान्त्वनोपायप्रयुक्त्या निश्चितानुनयसिद्धे सदानपेक्ष्यत्वाद् यत्र प्रेम्णि स्नेहपूर्वकदृष्टिनिक्षेप एव सफलीभूतः सानुग्रहः प्रसाद उपहारदानप्रार्थनादिप्रक्रमेणापि सर्वदा मादृक्षीणां मानिनीनां प्रसन्नताया अलभ्यत्वात् तादृशस्यानिर्वचनीयस्य प्रशंसनीयस्य प्रेम्ण एवंविधो विध्वंसस्त्व-

त्कर्तृकप्रणयभङ्गेनाधुना सवृत्त , पश्य, मामनुनिनीषुस्त्वं मदीयचरणौ समया प्रणिपातेन पाशुले भूस्थलपृष्ठे खल्वकुलीन इव परिलुठनं करोषि तथापि दुष्टाया मम कोपपरित्यागो न सजायत इति । इह दृष्टिपात प्रसाद इति तुरीयवाक्ये यत्रशब्दस्य त्रुटिदोषोऽन्तिमपादे खलाया इत्यात्मनिन्दाशब्देनापराधिन· खलत्व चानुमीयते किञ्चानेर्ष्याक्रोधान्वितप्रणयमानजनितविप्रलम्भरसकलुषिते तथा *मन्दाक्रान्तवृत्तसदानतचरणे मुक्तके मन्युमोक्ष करिष्यामीति* विवक्षितस्य प्रधानार्थान्तरस्य विशेषसपादनार्थं निषिध्य त्व पादान्ते लुठसि न च मे मन्युमोक्ष खलाया इति मानिन्योक्तत्वात् खलु समुत्पद्यत आक्षेपालकारस्तथापि वक्रोक्तिकुशलाया विदग्धाया युष्मदीयनायिकाया मन्युमोक्षोऽचिरेण भवितेति विदित्वा भो ललितसभागरसरसिका ! विषण्णा मा भूत यूयम् ।

> सुतनु जहिहि मौन पश्य पादानत मा
>
> न खलु तव कदाचित्कोप एवविधोऽभूत् ।
>
> इति निगदति नाथे तिर्यगामीलिताक्ष्या
>
> नयनजलमनल्प मुक्तमुक्त न किंचित् ॥३७॥

अत्रत्र्योऽन्यप्रमदाभिगमनादि[illegible]प्रसिद्धस्य दयित- [illegible] धूर्त[illegible] [illegible] [illegible] [illegible] निगूढ[illegible] [illegible] [illegible] [illegible] [illegible] ।

वदिति भर्तरि व्याहरति सति साचिदरमुकुलितदृष्ट्या तया कोपनया स्वकोपप्रशमनदासि प्रचुर बाष्प निपातित किन्तु किंचिदपि नोच्चारितमिति । खन्विहादिमपादेन वामलोचने सुदति ! निसर्गसुकुमारमालतीजालपवत्प्रकृतिमृदुलसुवृत्तशीलापि कथ वामशीलेव दरीदृश्यसे ? त्वच्चरणयो सकरुण निपतितमपराद्धमपि जनमिम प्रमन्नतास्मेरदृष्टिविक्षेपामृतसारेण सिञ्चती मधुरमधुरवचनपीयूषदानेन मम दयस्वेति द्वितीयपादे न खलु तव कदाचित् कोप एवंविधोऽभूदिति वाक्येनानेन भर्तु पीन पुनिकप्रणयभङ्गदूषितत्वमनवापराधत्व चेति चरमपादेऽनल्पाश्रुमोचनेन सदयहृदयाया भार्याया गत्यन्तराभावेन कोपशान्ति सुचिरादुदपादीति च विद्मो वयम् । अत्रत्यमानिनीत्वम्मृदुस्वभावोपेतमालिनीवृत्तमण्डितमेन रुचिर श्लोक रामन्नुरतेऽमर्षप्रशान्तिसमुत्य समाहितालङ्कारो यद्द्वारा प्रणयमानजनोच्चविप्रलम्भरम्योऽपि नूनमतिहृद्यमभागशृङ्गारामृतरसेन पुरा परिणमतीत्यत्र का शङ्का ?

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु
किम् ॥३८॥

अहो परमार्थतोऽद्भुतमेतत् यदनिर्वचनीयनिर्दोष–निरुपमरागोद्रेकव्याप्तमनोहारिणि नानाविधानुभावानिरन्तरगलितघृणा सानन्दमनन्तप्राप्त्यनुगुणदोषतारतम्यगम्भीरस्तननिपातानाम स्मार सर्वदसम्पूर्णरागरञ्जनसमुदग्रमदानिनानि मान्मथप्रमोदव्यतिरेकनिर्मोहितान्यन्तरमनांसि मनांस्यपि सुदूरेऽपहृत्य सर्वतोर-

मोहनमनोजन्मरागसागरे चमत्कारिणि मनोज्ञविचित्ररसतन्मये निमज्जयत् तत्रैव विलाययति नून पद्यनिबन्धसहस्रायमान निर्वाच्यकाव्यसुपमाजाज्वल्यमानसुविरचितसर्वाङ्गप्रदर्शनजनितरसिकजनलोमहर्पण सुस्वादुसभोगशृङ्गारमदजलोपहारि श्लोकरत्नमेतद् यस्मिन् सुभग कश्चिद् युवा हृदयगमचेतोभूमहोत्सवपर्यवसाने चैतन्यनाशजडीकृतेन्द्रियग्रामामिव सर्वावयवप्रहर्पयित्नुसुरतज्वरद्रवीभूता स्ववरारोहा सावधान दर्शं दर्शमित्थादुपवर्णयति यन्नीरन्ध्रेण मदीयसमालिङ्गनेन दृढतरमृदितयोर्वक्षोरुहमण्डलयो प्रहर्पातिशयात् स्वय प्रोद्भिन्नेन रोमहर्पणेन शोभमाना तया निर्भरप्रेमनिर्झरप्रकर्पणातिस्पर्शनीयपीवरश्रोणिबिम्बाद् विलसमानेनाधोवस्त्रेण नग्नप्राया समनन्तरमेवापि मदभिमानच्छिद् 'मेव कृथा खलु मा पिपीडो मामतिमात्रमलमिति मदालिङ्गनप्रत्याख्यानव्याजेन हृदिस्पृग्मन्मथयुद्धरसद्योतकमर्षाक्तदुर्बलवचन सहस्ताक्षेप प्रलपन्तीव हृदयदयिता विश्लथीभूतगात्रलता कि नु निद्रिता कि नु प्रलय गताथवा मनसि मे निमग्नाहोस्वित् सभोगरससायुज्य प्राप्तत्वाद् द्रवीभूता नु किमिति मदायानां यथायोग्य निश्चेतुमपि न शक्नोम्यहमिति । इत्यपरमत्र 'जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नता कि कनिष्ठा किमु ज्येष्ठा घटीयन्त्रस्य दुर्जना इति ध्रुवस्यानन्दाह्लादभोद्धृतोदाहरणवत् सुप्ता कि नु मृता नु किमित्यादिना ममनयनातिशयांचितगर्भेणान्तिमपादेनानिर्णयस्योपवर्णनात् मदेहाल्ङ्कारविभूषिते शार्दूलविक्रीडितवृत्तनियमितचरणे दत्तावरत्न मा मा मानद माति मामिति चेतोहारिणमदमदनयुद्धव्याकुलितापाङ्गी तया पिपीड इत्यादिभिर्यापदन्तूनतापि रतिगमानिशमयोनरतया गुणवती मनो ध्वच श्रवणेया योभोगरिरम्य पद्यस्य प्रकृष्टमधुरिमाणमास्वादमास्वाद रगवद्रागधारिणो यवगणि निमग्ना कि नु रिगोता रि निति न निरिचनुमहे ।

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥ ३९ ॥

क्षणनश्वरे मृगतृष्णिकाभसीवेहरये निर्बले जीवलोकेऽपि यावज्जीवं जीवमाफन्यसाधनैरमार्गभूतादामुक्तिसमर्पितपरस्परात्मना परिणयोत्सवादनन्तरं विश्वासपात्रीभूतसहचरीजनसमक्षमपि पुण्यसाधकनिर्दयविमुक्तप्रथमसाध्वसाहृतस्याभिनवविवाहजनितरतिरागमित्यादिपया प्राग्वधमदनकेलिप्रस्तावनस्य पाणिग्रहीतुरतिवेलक्षयजनकेन नर्मणानीव ह्रीणा नवपरिणया वधूः किं करोतीति तस्या अक्षतनव्यभावाया एव दयमानेनसम्मतरविना सरस व्याहृपते यदुल्लसद्रागपारवश्यवशीभूते परिणेतरि वैवाहिकपरिधानाग्रपटावलम्बिनि निर्तव्यनाव्याकुलहृदयवत्तया केवलमाकारगोपनाय समाश्रितविनया वदनमवनमय्यावस्थिते तस्मिन् सरभस दोर्भ्यां परिरब्धुं कामयमाने सति सा तूष्णीमङ्गानि तस्मादन्यत आवर्तयति प्राथमिके वैवाहिकनर्मविधाने निर्भर्त्स्यैल्क्षलज्जाकुला किंचिदपि वक्तुमक्षमया लज्जालुदृष्टिविक्षेपेण स्मेरमुखी सखीस्तिर्यक् पश्यन्ती व्रीडानिर्वेदेन नवोढा वधूस्तान्यतितमामिति । सम्प्रत्यप्रक्षतमदनाल्यान्याभावत्वात् सर्वथा गत्वपरिचितसंभोगविद्यामायाम्नायानिमोष्यात् तत्काचितमायोपचारतातुर्यविहीनाया गात्रसंयोजनगात्रविमुखपूर्वान्तर्गतचेष्टितवर्णनमुत्पन्न आत्मन्यारोपणया स्वभावोऽपि रुप्रागेण रक्षयत्नरनङ्गमोन्यसंभोगशृङ्गारस्यास्य निम्नरितोरुतमतञ्चादनुष्टपां स्त्रीरोऽपत्यभिनरातङ्गमतापूर्णेन स्वाभिज्ञाना चेनापि प्रमोदयितुं विमृश्यमान शोभते ।

नापेतोऽनुनयेन यः प्रियसुहृद्वाक्यैर्न यः संहृत
यो दीर्घं दिवसं विषह्य विषमं यत्नात् कथंचिद्धृतः ।
अन्योन्यस्य हृते मुखे निहितयोस्तिर्यक्कथंचिद्दृशो :
स द्वाभ्यामतिविस्मृतव्यतिकरो मानो विहस्योज्झित. ॥ ४० ॥

इतरेतरसान्द्रानुरागानुकूलयोरपि प्रणयिस्त्रीपुंसयोर्दुर्वार-निर्वेददौर्मनस्यवैलक्ष्यजनकेन किसलयसुकुमारहृदयदाहकेन प्रणय-कलहेन, न तु कारणान्तरेण समुत्पादितोऽसहनीयोऽपि दुर्निग्रहोऽ-निष्टोऽपि दुर्दम्यो मन.संतापनोऽपि दुरुच्छेदो दग्धमानो न केनाप्यु-पायेन न केनापि प्रकारेण न केनाप्यन्येन प्रतिक्रियाविधानेन वा प्रशान्तिं प्राप्नोति किन्तु *प्रणयकलहजत्वेन केवलं प्रणयस्मितिसमु-न्मेषेणैव स्वयं समुपजोषं प्रशाम्यतीति* विवदिषयास्मदीयशृङ्गारि-काव्यकारेण कयोश्चित् परस्परानुकूलवात्सल्यपाशबद्धहृदययोर्यौ-वनस्थयोर्दम्पत्योर्मानचेष्टेत्थंप्रकारेण निर्वर्ण्यते यथोऽयं: प्रशमनाय प्रयुक्तेन चिन्त्याचिन्त्येन सर्वेणानुनयविधिनापि न व्यपेतो यः प्रियसुहृदा सखीना प्रसादनमन्त्रवचनैरपि न परित्याजितो यश्च दु.सहकरत्वेन विषम दुर्विषह्यत्वेन दीर्घमायायमानमतिकष्टं वासरमेकं-कृच्छ्रात् क्षाम क्षाममात्मश्लाघनपरिजिहीर्षया प्रयत्नेन कथमपि परिरक्षित सोऽसमयोऽस्तगते सहस्रदीधितौ समायाते प्रदोषे परस्परस्य विमुखीभूत वदन प्रति सायीकृत्य कथं कथमपि प्रणिहितयोर्नयनयोः सन्योन्यास्या अपनोभ्यामतिमात्र विस्मृतमनर्गः सन् नितरां परि-त्यक्त । इत्यन्योन्यविलक्षदृष्टियुगे सम्मिलनयन्त्रान्तरे सव्याजं हसितं सदा पुनिरन्यो मुखरम्य यात्र्यमर्यैति दृष्टनास्मिन्नियावस्य । सायक्त-नुनयादिनिर्वर्तृभि प्रतिविधिभिरप्यसाजितस्य प्रणयमानस्य पश्चेन स्मितेनैव स्वत प्रशमितत्वादनन्तरं नाभिमनोभ्रमभोगशृङ्गारत-

भूतकोपशान्तिसूचकः समाहितालङ्कारः शार्दूलविक्रीडितवृत्तशालिनो मुक्तकस्यास्य शोभनाकृतिमिवेव शोभयतीति सौख्यैकतानमधुर-सम्भोगशृङ्गारेऽपि कदाचित्तदानीं कटुप्रणयमान मजायेत चेत् तिन्तिड्यम्लजलमिश्रितमिष्टान्नवत् सोऽपि प्रत्युत स्वादीयान् भवेत् ।

गते प्रेमाबन्धे प्रणयबहुमाने विगलिते

निवृत्ते सद्भावे जने इव जने गच्छति पुरः ।

तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्

न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥ ४१ ॥

अस्मादकाण्डे विगलितस्य शतधा खण्डितस्य दुर्बलस्य काच-भाजनस्येव हृदयकूपाद् मदकच्छपायमानस्य खण्डशश्छिन्नस्य फलो-गाररहितस्य प्रणयस्याप्रतिविधेयेन वेगेन दुर्विगाह्यशोकसागरा-भ्यासमन्तचरणपर्यन्तमन्तर्हि प्रमद्य स्वपिता काचित्कामिनी सनिर्वेद सर्वथा गर्हणीयदैवदुर्विपाकजमात्मन इदानीन्तनदशान्तरम-भिसोत्सुव्यमाना तया रमणेन सह यावदोषित तदानीन्तनसंगमसुख-मपि शोकक्षणमनुस्मारमनुस्मार सहचरीं प्रति प्रस्वपति हा प्रियसखि हा पूर्वतरस्मरहृदयेऽपि स्नेहमान्य सविचित्रानुरागजनितगौरवोपेते-ऽसमाने निजस्नेहान्वितस्य सौहार्दे व्यागते मदधीनेऽपि दयितजने तटस्थजन इवोदासीनेनावलोक्यति सति तदनुरागवशसम्पन्न-मरणमर्मभेदि च तदानीं यथानुभूतिनिर्विष्टनिष्पन्नानन्दलीलापुर-स्सरविरसम्भोगार्पणमुपभोगमनोहराणि तानि तानि सुखमयानि तृप्तिमयानि प्रमोदमयानि रागास्वमयानि वाननवनसुस्मृत्यानु-स्मृत्यापि सम्प्रति हतहृदयं मे शतधा न भिनत्ति यदत्र किं कारण-मिति न सम्यगवैमीति । काचित् पूर्वार्थं तटस्थमानस्य प्रणय-

भङ्गरूपस्य हेतोरुत्तरार्धेऽवगम्यमानेन हृदयविदलनरूपेण हेतुमता कार्येण सार्धमुपवर्णनोत्थेन हेतुनलकारेण शिखरिणीवृत्तनिबद्धचतुष्पदो निर्वेदसंचारिभावपरिपूर्णकरुणविप्रलम्भशृङ्गारवाष्पप्रवाहकलुषित-रसिकजनहृदयस्तीव्रवेदनामय इव दु:खमय इव नैराश्यावलम्बी श्लोकोऽयं समर्थ्यते इति वयमपि स्नेहविनाशविदलितेय मनस्विनीव दु:खीयन्तस्तस्यास्तपस्विन्या: कृते मुक्तकण्ठमाक्रोशाम रे रे दग्ध-हृदय! तस्या जीविताशाभूतं प्रणयं खण्डश: खण्डशो विदारितं दृष्ट्वापि निर्विकारं ध्रियसे, कथं शतधा न स्फुटसि?

चिरविरहिणोरत्युत्कण्ठाश्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतो: ।
कथमपि दिने दीर्घे याते निशामधिरूढयो:
प्रसरति कथा बह्वी यूनोर्यथा न तथा रति: ॥ ४२ ॥

वस्तुतो दुर्विषहहृच्छूलायमानेन तीक्ष्णमकरध्वजसहेलोद्दीपितमुर्मुरस्फुलिङ्गायमानेनानिर्वचनीयस्नेहबहुमानानुकूलस्य भर्तुर्देशान्तरप्रवासेन यद् भुवनं स्थाणुस्थितिमत्त्वादनश्वरमपि विनष्टमिवामानि तत्तातप्यमानवियोगतनूनपादन्तकेन प्रीतिपूर्वं सुदूरप्रसारिताभ्यां प्रमोदप्रकर्षपुलकिताभ्यां भुजाभ्यां गाढं परिरम्याभिनन्दनीयेन समागमेन पुन: संजातमिवादर्शि नूनमिति वक्तुं प्रक्रमतेऽस्माभिर्बहुमतोऽमरुकविरियं बहुतिथकालावधिना ससप्तविरहाग्नि-शुक्षणिना दग्धप्राययोरौत्सुक्यातिरेकेण शिथिलायमानशरीरयो: पुन: सगमं लब्ध्वा परस्परं यथेच्छमभिनन्दतोर्दीर्घकालविरहितयोस्तरुणदम्पत्यो: कृते चिरात् सोऽयं नष्टपूर्वो जीवलोक: प्रत्यग्र इव संतुष्टितन्मय इव कमनीयं संवृत्त: किन्तु दूरवर्तिनो विदेशाद् गृहागमनसमनन्तरं बहो: कालादितरेतरदर्शनसौख्यप्रहृष्टमनसाम-

भिवाद्यमानानामन्तरान्तराभिवादयमानाना यथाज्येष्ठ प्राप्तकालोपचारनियार्हाणा प्रियवान्धवसुहृज्जनाना सान्निध्ये तयोर्मध्ये परस्परसलापालिङ्गनपरिचुम्बनादीनामनुरागव्यञ्जकचेष्टानामचिन्त्यत्वाद् द्राघीयसि तस्मिन्नह्नि कृच्छ्रादतिवाहिते ततो भृशमभिलषिता त्रियामा सहर्षमवाप्तयोस्तयोर्नून दीर्घीभूतप्रवाससमयनिर्विष्टनानाविधवार्तानिकुरम्बपर्यनुयोगोत्तरदानानन्तर्येण चिरविरहकालराशीभूतगृहबन्धुमित्रगणादिविषयकबहुविधवृत्तान्तसञ्चयकथनाकर्णनपराम्पराभिश्च प्रचुरीभवन् स्निग्धसभाषणमाप्रभात यथा प्रमेमीयते तथा विप्रयोगसमये सुचिरमनुपभुक्तत्वात्पुञ्जीभूतोत्कलिकासहस्रसमन्वितार्द्रार्द्रप्रेमरसोऽपि सुरतोत्सवस्त्रियामायामपि मुहूर्तमानायमानाया विभावर्यामविच्छिन्नकथारसप्रसरमन्तरा विरलविरलक्रियमाणत्वान्न प्रमेमीयत इति । शोचनीयप्रवासविप्रलम्भानन्तरोत्पन्नाभिनवसभोगशृङ्गाररसार्द्रीकृतजनमनसि प्रमुदितहरिणीवृत्तयुजि पद्येऽत्र सगमप्रमोदनरीनृत्यमानहृदययो प्रणयिणोस्तरुणयोर्नैसर्गिकसमागमावस्थाप्रदर्शनाज्जातयत्नकारोऽत्र च वियोगेन पूर्वं पृथक्कृतयोरिदानी सगमेन पुनरेकीभूतयोस्तयोर्मन्मथयुद्धादप्यधिकमतोपावहेणान्योन्यमोदन्तवचनेन निद्रान्तिमन्तरेण यथासुखमतिवाह्यते सा निशीथिनीति समूच्यते ।

> दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
> पुष्पाणा प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः ।
> दत्तः स्वेदमुचा पयोधरभरेणार्घो न कुम्भाम्भसा
> स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥ ४३ ॥

विप्रकृष्ट जनपदान्तरमध्युष्य परिक्लेशावहादध्वमार्गान्

कान्तादर्शनौत्सुक्यप्रेरितद्रुततरगतौ प्राणदयिते पत्यौ सुचिरात्स्व-वसतिगृहं प्रत्यागते वासकसज्जिका प्रवासविप्रलम्भसंतापदग्ध-कल्पापि धृतिकरतत्समागमोच्छ्वासोज्जीवितजीविताशा विरहिणी किमकार्षीदित्यवबुभुत्सायां शृङ्गारिकविशिरोमणिना निर्भरकामा-तुरप्रणयिजनभावसौक्ष्म्यपारगेणास्मदीयकविपुंगवेन सुरसं व्याह्रियते यत् स्वीयभर्तुर्गृहप्रवेशमहोत्सवे समुत्पन्ने दीर्घाभिनन्दमुमनोमाला प्रीत्युत्फुल्लया निसर्गरमणीयया दृशैव न तु वास्तविकैर्नीलोत्पल-वृन्दैर्गुम्फिता स्वागतार्थं विस्तृतं विक्षेप्य कुसुमानां राशिः प्रमोद-विकसितेन प्रकृतिमुपमेण स्मितेन न तु माध्यमालतीप्रमुखैस्ताद्विधै कुसुमैः संपादितः सप्रश्रयोपचारायोपहरणीयं पाद्यादिकं संतोषा-तिशयप्रहृष्टपुलकेन स्वेदाम्बुनिस्यन्दिना स्वभावचारुणा पयोधरकल-शभारेण तस्मै दयिताय विश्राणितं न तु यार्थार्थिकेन कलशवारिणै-वप्रकारेण महार्घैर्नैसर्गिकलावण्यवद्भिरिन्दीवरकुन्दकुम्भादिचेतन्यर-हितैर्वस्तुभिरनुपमेयैः स्वकीयैरङ्गैरेव स्वनिकेतनं सहर्षं प्रविशतः प्रमपात्रस्य पत्युर्मागल्यं कृत्यादर्या पीनस्तन्या भार्यया प्रीतिपूर्व-मकारीति । खल्वयं सुरसमञ्जुलोऽङ्गीकृतशार्दूलविक्रीडितवृत्त-शोभी परम्परानुरक्तमिथुनसंगमजहृद्यसंभोगामोदविकस्वराकृति श्लोको दृष्टयैवेन्दीवरैरिति ताद्रूप्येण निरूप्य निषधव्यञ्जकेन नशब्दप्रयोगेणोपमानभूतानामिन्दीवरादीनां तिरस्कृतत्वाद् रूपकस-हिताक्षपालकारेण विभूष्यमाणः शाशुम्यत इति विचारः विचारश्रम-शान्तसमागमप्रमुदितायां वरवर्णिन्या आमोदतरलयोर्दृशो सत्या-नीलोत्पलैः किं, प्रमोदामृतरसवाहे स्मिते सति कुन्दादिपुष्पैः किं, स्पृहणीये पयोधरयुगले विद्यमाने कलशैः किं प्रयोजनं यथा तस्या निरुपमावयवा निखिलोपमानवस्तूनि परमार्थतः सावलेपं पश्चा-त्कुर्वत इति ।

;

कान्ते सागसि शापिते प्रियसखीवेष विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदित तत्सगमाकाक्षया।
मुग्धे दुष्करमेतदित्यतितमामुद्दामहास बला-
दाश्लिष्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥ ४४ ॥

चाटुकारमपि प्राणनाथ रोषादपास्य या पश्चातापमवाप्नोति कलहान्तरिता तु नेति साहित्यदर्पणव्यक्तीकृतल्लक्षणोपेता काचित् प्रणयामर्षस्फुटनेन साग्रहानुनयाभिनिविष्ट दयित सशपथ निरस्य तदनन्तर यथ नाम हताशया मया दयितजन प्रतीत्य समाचरितमिति निर्वायानुतापतात्प्यमानोपाशु तदीयप्रत्यागमनमनोरथशतमेव समाश्रित्य दु खीयन्ती स्थिता तत सायसमय प्रियसहचरीवेषधारिणा तेनागत्य परिचुम्बिता चण्डी प्रत्ययितायै वयस्यायै परिहासगर्भरहस्यवृत्तान्त यथापयति हे धूर्त कृनिवृत्तस्तथाविध कुपथ पतित्वा धृतिषा तादृशी कुचर्या कृतवानसि, इतोऽपसर मा भूयोऽपि मदीयगेह प्रविक्षस्त्वमित्यह सशापात्सर्गमाकुन्यापराधिनमात्मन मामुख निराकृतवती ततो दरतमित्र निशामुख मद्दर्शनाय समायाता काचित् प्रियसखी ससम्भ्रम परिरभ्य निष्कासितेन तन पुन सजिगमिषुर्निर्विचारा भूत्वामुखेन हतुना प्राणनाथ सहेल निरस्य दुर्भरमनुशयमनुबोभामि किन्विदानी तेन विनाकृताह न जिजीविषामि तत् तमत्रानयत्यादिरहस्यवचन तस्यै सकरुण व्याहृतवती, हहो मद्दाश्चर्यम्! अयि सखि सा कासीदिति मन्यसे न कापि परन्तु विश्वसनीयवयस्यावेष कापट्येन परिधाय सखीव प्रादुर्भूतो महावञ्चक। मे कान्त आसीद् यमहमादिस्थ्याकथनीयमपि रह कथितवती मन्दबुद्धि क्षीणभागधेया किञ्च सोऽपि तदा सुन्दरि! प्रणया स्परोपवशात्मदिस्मनसमये यदेतत् त्वया निगदित तन्मे

दुष्करमित्यतिशयप्रमक्तकण्ठ विहस्य बलात्कारेण मा समालिङ्गितवानित्येवप्रकारेण हे सखि तेन दुर्बुद्धिनोदितभाग्येन कितवेनाद्येपत्तमिस्रे तमिस्राप्रारम्भे मन्दधीर्निर्भाग्या प्रकाम वञ्चितास्मीति। अञ्जसा दुर्ललितेनापि निपुणेन वामवश्येनापि वामरूपेणेव वामुकेन स्त्रीवेषपरीधानकैतवद्वारा कोपनापि वामवशवदा यामिनीयमतिसधीयते स्मेति युक्त्यलकार पूर्ववच्छार्दूलविक्रीडितवृत्तसूत्रित सभोगशृङ्गाररसमयमप्युल्वणहासरसगर्भमेन सुरसकाव्यरसिकानतिशयनर्मस्फोटेन परिहासयितुमिव समलकरोति।

आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरा-
द्व्याजेनागतमावृणोति हसित न स्पष्टमुद्वीक्षते।
मय्यालापवति प्रतीपवचन सख्या सहाभाषते
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदय ॥ ४५ ॥

अविचारिणोऽपि त्वयि सान्द्रानुरागस्य मे तुच्छः प्रणयस्खलितलेशो मर्षयितव्य इति सान्त्वनवचनपूर्वं नूनमेष प्रणिपात विधास्यतीति मनसि मत्वा कृशाङ्गी माप्रपदीनस्य परिधानस्याञ्चलेन प्रणिपातपरिहाराय सच्छादितौ चरणौ नियतोऽयं मे कान्तो हास्यास्पदमिति वितर्य वदन यदृच्छया प्रादुर्भूत रमणीयं स्मितिविलासमनिष्टमिव वैमुख्यादिच्छलेना तिरयति किंस्विद् वैमनस्यसमासु वैलक्ष्यपारवश्यासु [illegible] मुखी सती व्यक्ता मा गाद्घोरयीर्ष्यामर्षजनितमनस्तापान् स्वयमप्यात्मान ता चोच्छ्वासयितु मयि कृपाणेऽपि त्वदालाप न किञ्चिदपि शुश्रूषेऽहमितीव विमुखीभूय स्वीयया वयस्यया सार्धमन्यद्विपरीतवचो निगदति चेत्तदा प्रातिलोम्यमागृह्य स्वतोऽपि मानमिव पदमनुसरन्ती वक्रोक्त्या दुर्विगाहानुरसतया [illegible] पि मम मनोहारि [illegible]

तरसमयत्वाच्चालिकमनीयोद्वेदो भवतीति प्रागनुभूतस्याप्यद्यैव सवृत्तस्येव विरहानलसतातप्यमाने मनसि मौत्सुक्यमुत्प्रेक्ष्यमाणस्य न कर्हिचिदपि विस्मरणीयाया निर्भरस्नेहभाजनीभूताया मनस्विन्याः प्रणयमानोदन्तस्यानुस्मारमनुस्मारं तान्स्तान् सुखितान् तया सह संभोगार्थोपभोगेष्वतिवाहितान् वासरान् चानुचिन्तमनुचिन्तमत्युल्वणोत्कलिकामयेऽतिशयनिर्वेदप्रायेऽतिगाढे शोकाभिलापवारिधौ सुतरां निमज्जति तपस्वी कश्चन विरही । 'अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम्' इत्युदाहरणवदत्रापि प्रणये दौर्मनस्यजनकत्वाद्दोषरूपो मानोऽपि रम्योदय इति गुणत्वे कल्पितत्वाल्लेशालंकार उत्पनीपद्यमानेन दुर्भरविप्रलम्भशोकरसेन मृदुहृदयाऽस्माऽभिशोचयन्तमेन श्लोकं शार्दूलविक्रीडितवृत्तेन मम परिपूर्णार्थीचरीकर्ति ।

यावन्त्येव पदान्यलीकवचनैरालीजनैः पाठिता
तावन्त्येव कृतागसो द्रुततरं संलप्य पत्युः पुरः ।
प्रारभ्वे परतो यथा मनसिजस्येच्छा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येव कान्तः क्रमः॥ ४६ ॥

अयि मौग्ध्यविभूषणे ! भर्तरि विहितदुश्चरितेऽपीर्ष्यारोपो हृदि निगृह्य प्रनसाहंमौजन्यमौशील्यवनवदनया केवलमेकाकिनी विजनेऽरण्यरुदितं कुरुषे, पश्य, परमार्थतो विफलेनारण्यरुदितेन स्वदुराचारमनुनय्य ते भर्ता परस्परस्नेहद्रोहि तादृशं पापं भूयो न समाचरिष्यतीति वृथा मन्यसे हा मुग्धे ! अतिप्राप्तकाल प्रतिविधानं त्वामध्यापयामः, किं बहुना, प्रणयमानव्यक्तीकरणायैवमेव कुरुष्वेति भर्तृस्मीरतिन्दर्शयास्वयंविन्नः समीचीनाः सख्यः सर्वांगणेन शिक्षिता माधिदनिमुग्धा नार्या तदानीं समाचरितकिल्बिषस्य

तस्याग्रतः कर्णे कृतान् तावत् कृत्रिमान् शब्दान् निर्विकारवदनवर्णपूर्वं शुकवदतिशीघ्रं समुच्चार्य तदनन्तरमेव सर्वदममीनकेतनाज्ञावशीकृतहृदयतया यथैव दर्पितकंदर्पस्य तृष्णातिरेकश्चेतसि संजज्ञे तथैव सद्यस्तदीयप्रणयकल्मषोपालम्भार्थं निगदितानि तानि वचांसि विस्मृत्य सानुरागचेष्टां समाचारितुमकृत्रिममनस्का प्रक्रमे येनैवंमहो मुग्धताविभूषणस्याकृत्रिमप्रकृतिपरिष्करस्य स्नेहस्यैषा नैसर्गिकी रमणीयतमा काप्यविज्ञाता प्रक्रियेति कृत्स्नाम्यसूयाक्रोधमानादिरूपिशत्रुगणजिष्णुनः सर्वंकषस्य प्रेम्णः शक्ति सुषमा चोपवर्णयति मधुरमधुरस्वैणमनोजिघ्र. प्रभूष्णुमनोजन्मानुचरोऽमरुः। अत्रालीकवचनैरिति पदमालीजनैरित्यस्य विशेषणत्वे प्रयुज्येत चेत्तदपि निर्दोष स्यादपि च पत्युस्तस्य स्खलिते व्यक्ते सति वितथवचनत्वे नाङ्गीकर्तव्यं परन्त्वलीकरूपस्य तदीयापराधस्य निन्दकवचनत्वेऽत्रे च सुस्वादुसंभोगरसपरिपूर्णे शार्दूलविक्रीडितवृत्तसंनद्धपादे रुचिररुचिरे पद्ये स्वाभाविकचेष्टाख्यानात् स्वभावोक्तिरलंकार आविष्क्रियते।

दूराद्दुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने कोपाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ ४७ ॥

हन्त सुदृढबद्धपरस्परहृदयप्रेमाबन्धच्छिदि निस्त्रपस्य प्रणयिनो दुर्विषहे व्यभिचारेऽमर्षमूलकबहुविधभावविकारचेतोवृत्तिप्रपञ्चनिपुणस्य मूकस्यापि सूक्ष्मैरिङ्गितैरपालम्भवाग्वज्रदायिनोऽराज्ञोऽपि दण्डये दण्डपारुष्यनिपातिनः कदाचित् क्रोधाग्निकलुषितस्यापि कदाचित्प्रसादप्रमग्नस्य मनस्विन्याश्चक्षुषोऽद्भुततरमयी कीदृक्शीयं कामरसज्ञा प्रभा कृशोले व्यभिचारिणि कामुके विप्रवपदि दृष्टे सति

प्रणयध्यं टीकमम् यथापराधं पुरा दण्डयामीति तदुपसर्पणापेक्षयो-
ष्ठितमात्मान समया तस्मिनायाते सति दृष्टिप्रसादविश्राणनेन
पिन त्वा नानुजिघृक्षामीत्यन्यतो विवर्तित निर्विकारेण हृदयेन
दा त्वयि प्रेमैकपाने तत्त्वतो स्निह्यामि यतो मे स्खलितमेक
मुदारचेता क्षमस्वेति तस्मिन् व्याहरति सति वितथवादिन् !
शुश्रूषे, मैव तावद् वादीरितीव कोपेन विस्फारितम्, अनुरक्त मा
जानासीति सरभसमालिङ्गितु तस्मिन् चेष्टमाने सत्यभिमान-
प्रणा मा मैव दीधृप इति मनसि कृत्वा रोपानलारुणित हे कोपने!
"थ दुर्धर्षेव सवृत्तासीति तस्मिन् सान्त्वनाय वस्त्राञ्चल गृह्णति
ति किं साधारणीति मत्वा मा प्रतीत्य समाचरसि, मैव कृथा
दुशील ! इतीव बहुमानहेतुकमन्युतरङ्गितभ्रूवल्लीभीषण तथा-
न्यथोपायान्तराभावेन गत्यन्तरेण विनाकृततत्वाच्च नि शब्द पादप्रणि-
पातविधिमानतत्परे तस्मिनिदानी त्वत्तो लब्धबहुमानास्मीति
विवक्षयेव प्रसन्नताद्योतमनयनसलिलपरिपूर्णदृष्टिविक्षेप तन्याश्च-
ण्डधाश्चक्षुर्नानाकारेङ्गितव्यञ्जनप्रवीण सजातमित्यहो महदाश्च-
र्यम् । रसिकशिरोमणिनामरुणा स्वशब्दमहिम्ना मानिन्या रोषमू-
लकविशिष्टानुभावप्रपञ्चपुष्कलस्य कारकस्यैकस्य चक्षुष समयो-
चितकामरूपितावबोधिकास्वनेकक्रियासु वर्णितत्वात् सकृद्वृत्तिस्तु
धर्मस्य प्रकृताप्रकृतात्मना सैव क्रियासु बह्वीषु कारकस्येति दीपकम्'
इति काव्यप्रकाशदर्शितलक्षणेन ' स्विद्यति कूणति वेल्लति विचलति
निमिषति विलोकयति तिर्यक्, अन्तर्नन्दति चुम्बितुमिच्छति नवप-
रिणया वधू शयने' इत्युदाहृत्या च सुष्ठु सगच्छमानो दीपकालकारः
प्रणयमानवृत्तविप्रलम्भरसानन्तरजनिष्यमाणसभोगशृङ्गाररसव्य-
ञ्जकशार्दूलविक्रीडितवृत्तसयुज श्लोकमेन प्रभास्वरदीपवद्दीपयति ।

अङ्गानामतितानवं कुत इदं कस्मादकस्मादिद
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।

तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मान्तर–
व्यापी बाष्पभरस्तया वलितया निःश्वस्य मुक्तोऽन्यतः ॥ ४८॥

नूनं दुर्निवारनियोगानुष्ठानप्रसङ्गात् कृतकियत्कालक्षेपे विलम्बितगृहागमने जीवितदयिते चिराद्वसति प्रत्यागत्याकाण्ड-विपाण्डुरिमविच्छायवदनश्रियमकालदौर्बल्यतनूकृततनू प्रणयिनी जायां सखेदं दर्श दर्शमयं सुकुमारमनोहराणा गात्रलतानामतितनिमा कुतो हेतोरकाण्डे संजात इदं चाकस्मिकवैवर्ण्यसदिग्धगण्डभित्तिकं वदनारविन्दं कस्मात् कारणादयि वरवर्णिनि ! संवृत्तमिति पर्यनु-युञ्जाने सति भद्दृदयकुसुमशोषिणासहनीयेन विलंबेन चिरायितस्य तव दर्शनौत्सुक्यातिरेकवशादित्थं समजनीति याथातथ्यमात्मलाघव-परिहारार्थमनुक्त्वा सर्वमिद खलु प्रकृतितः समुत्पन्नमिति प्रोच्यान्यत्र पराङ्मुखीभूतया सुदर्शनया दीर्घं निश्वास कृत्वा पक्ष्मलनेत्ररोमान्त-रालपरिपूरयिता नयनसलिलौघः प्रवाहित इति सरस वर्णयन् यथा गीतागोविन्दे 'भवति विलम्बिनि विगलितलज्जा विलपति रोदिति वासकसज्जा' तथेयमपि कार्यान्तरव्यापृत्या जीवितेश्वरे चिरायमाणे तत्समागमोत्कलिकाशतशोशुष्यमाणशिरीषपुष्पाधिकतरमृदुलाङ्ग— वल्ली सौजन्यहृदयसौकुमार्यविभूषणा निर्विचिकित्सपातिव्रत्येन सदैव पतिवर्त्मानुवर्तिनी विजने सनिर्वेद रोरुद्यमाना विलालप्यमाना तास्तान् भर्तृसहवासपरमानन्देन विनाकृतान् दिवसान् कृच्छ्रात् कृच्छ्रादत्यवीवहतेत्याशयमप्यभिव्यनक्ति निर्वाच्यशृङ्गारसुधारस-शेवधिरमरुराद्रीर्द्रहृत्स्थल। अत्र हि 'आयान्तमालोक्य हरिं प्रतोल्या-माल्याः पुरस्तादनुरागमेका रोमाञ्चकम्पादिभिरुच्यमानं भामा जुगूह प्रणमन्त्ययैनम्' इत्युदाहृतिवद् योषिता तया स्वशरीरकार्श्य-मुखपाण्डुरिमकारण किंचित् प्रभिन्न स्वभावत इति व्याजेन गोपितं यतो ' निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन

यदपह्नूयते सा व्याजोक्ति ' इति मम्मटसपादितलक्षणोपेतो व्याजोक्त्यलकारो मनस्विन्यास्तस्या अतिश्लाघ्य सौम्यभाव प्रशसन् झगिति सभोगशृङ्गारेण परिणमतो दैन्यसचारिभावयुतविप्रलम्भस्य रसवाह शार्दूलविक्रीडितवृत्तशालीद मुक्तकमाधुनिकसमाजवादिमतनिर्णीतयथार्थस्त्रीपुधर्माविरुद्धान्योन्यप्रणयमुखितयोस्तथा भारतीयधर्मरीतिपारपर्याविसवादिस्त्रीपुरुपमार्गानुगामिनोरनयोर्जायापत्यो पुन सङ्गममभिनन्दतोऽस्मानपि प्रमादयिनुमिव समलकरोति ।

पुरस्तन्व्या गोत्रस्खलनचकितोऽह नतमुख
प्रवृत्तो वैलक्ष्यात्किमपि लिखितु दैवहतक ।
स्फुटो रेखान्यास. कथमपि स तादृक्परिणतो
गता येन व्यक्ति पुनरवयवै सैव तरुणी ॥ ४९ ॥

ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रुढप्रणयसहसोद्गद्गदगिरा ।
अहो चित्र चित्र स्फुटमिति निगद्याश्रुकलुप
रुपा ब्रह्मास्त्रा मे शिरसि निहितो वामचरण ॥५० युग्मम्॥

निर्मर्यादरतिधर्मव्यामङ्गव्यभिचारदूपितेनानेकस्त्रीप्रसक्तेन सुरतलम्पटेन केनचिद्यूनात्मनि सुगाढबद्धनिर्विकारानुरागायाः स्वप्रधानकामिन्या पुरस्तात् पौनःपुनिकाङ्गनान्तराभिगमनपरिशीलितस्मृतिसंस्कारवशादर्वाचीनतानामन्यस्त्रीप्रतिमाल्लेखनमहापातक समुत्थाय वज्राघातेनेव दक्षिणतरपाददण्डेनाऽऽहता मूर्ध्नि दर्पितो देवानां प्रियेण तेन गम्य हास्यास्पद तद्वृत्तान्त यथापयति हे सखे ! नानाविलासप्रसन्नाङ्गे ज्येष्ठरसम्भावदम्ब्या

अग्रतो यदृच्छया स्वयमुच्चारितेन प्रतिपक्षकामिनीनामधेयेन भीतभीतो हतभाग्योऽहं यदा वैक्लव्यनम्रीकृताननः सन् प्रतिकूलदौर्भाग्यविजृम्भणवशात् त्रपाविलक्षमनस्कत्वाच्च किमपि किमपि लेखितुमारब्धवान् तदा हन्त विस्पष्टाकृतिप्रादुर्भावोऽसौ लेखाव्यापारो गर्हदैवदुर्विपाकेन तादृशीमनिष्टां परिणतिं गतो येन तस्या दुर्निग्रहेर्ष्यास्पदीभूता सवै यूनी पूर्वं श्राव्येण गोत्रस्खलितेन सम्प्रति तु दृश्यं सर्वाङ्गैर्व्यक्तमेव भूयोऽपि प्रतिमायामाविष्कारं प्राप्ता ततस्तदनन्तरं प्रतिबिम्बगतां तामेव प्रतिद्वन्द्विकामिनीमभिज्ञाय, अहो विचित्रं प्रतिमाचित्रं खलु विचिन्तीयत इति बाष्पाम्बुकलुषितनेत्रपूर्वं विस्पष्टं व्याहृत्य स्फुटपरिस्फुरत्कोपपाटलकपोलभित्तिवर्णया हृदि गाढतरसदानितस्नेहपाशविदारणैकपदे समुद्भिन्नगद्गदस्खलितवाचा रोपातिशयरक्तीकृतस्फारनेत्रया कोपनया सर्वघ्नब्रह्मायुधरूपी मानसिकप्रातिकूल्यशंसी वामपादो दण्डनीये मम मस्तके रोषेणाभ्यसूयया प्रणयेन च सावहेलं स्थापित इति । 'दिधक्षन् मारुतेर्वालं तमादीप्यदृशाननं, आत्मीयस्य पुरस्यैव सद्यो दहनमन्वभूत् ' इत्युदाहृतो दर्पितेन रावणेनेव दुश्शीलेन कामुकेनाकस्मिकयुवत्यन्तरगोत्रस्खलनतत्प्रतिबिम्बलेखाभ्यां ब्रह्मास्त्रसन्धानवामचरणाघातरूपमनिष्टमचिन्तितं फलमवाप्तमिति वामचरणब्रह्मास्त्रनिरूपितरूपकयुतेन विषमालङ्कारेण निर्भरपरिहासनर्ममूलभूतमिदमीर्ष्यामर्षहेतुकविप्रलम्भकालुष्यकार्दममपि शिखरिणीवृत्तशोभि श्लोकद्वयं प्रेमभङ्गारुणारुणदृष्टिकमलाया असूयादन्दह्यमानाया कोपभावमभिव्यङ्क्तुं कृतार्थीक्रियत इति मन्यमाना उच्चस्तरां ब्रूमो हे मनस्विन्य ! पतिव्रताभिरपि युष्माभिर्भर्तारस्ताडनीया दण्डनीया. परिहर्तव्यास्तदनुष्ठितप्रणयभङ्गे सुव्यक्ते सतीति ।

कठिनहृदये मुञ्च भ्रान्ति व्यलीककथाश्रिता
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम् ।
किमिदमथवा सत्यं मुग्धे त्वयाद्य विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यताम् ॥ ५१ ॥

अपरवनितासङ्गमरूपविप्रियारोपककर्णजापप्रत्ययजनिताभ्यसूयामन्युकृपीटयोनिदग्धप्रायान्तःकरणनिवेशितमानाभिनिवेशासदैन्यप्रयुज्यमानप्रेमरसार्द्रसामपुरोगानुनयोपायप्राचुर्याद्राविवतवज्रसारहृदयकाठिन्यसमूचितसाग्रहामर्षत्यागेच्छाराहित्यव्यथितमहिलान्तराभिगमनपातकविश्वासदृढीकृतप्रतिकूलचेतोवृत्ति दयितां सान्त्वनविधौ व्यपेतप्रत्याशोऽपि यद्रुविज्य. कश्चन भूयो भूयः सिसान्त्वयिषु सखेदमाचष्टेऽकृतापराधमपि त्वय्यतिमान्द्रानुरक्तं मां कथमित्थमवधीरयसि, अयि वज्रलेपायमानकर्कशचित्ते ! मदीयाविद्यमानव्यलीकपिशुनपिशुनजनकर्णजापसंभवां मृषामतिं परिजहीहि त्वद्विषयकपापरहितं विशुद्धाचारमिमं जनं द्विजिह्वानां कर्णजपानां दुर्जनानामस्मत्सुखितमद्वासविमुखपैशुन्यवाग्वज्रश्रद्धया दौर्भाग्यपारं प्रापयितुं ते नानुरूपं, हे विमूढे ! यथातत्त्वं ब्रूहि किं मामुद्दिश्येदमनृतमपि सत्यमिति त्वयाधुना व्यवसितं, यद्यदभिप्रेतं तत्तदनुष्ठाय त्वया यथासुखमुष्यतामपि दयिते ! यतोऽहं केवलमेव तव सुखाभिलाषुकः इति । इह सम्बोध्यमानजविप्रलम्भशृङ्गाररसोशिनि हरिणीवृत्तमालिनि पद्ये सहृदयेन नायकेन मदैन्यनिन्दावचोभिर्मन्युज्वरज्वलनात्प्यमानाया कठिनहृदयविभूषणाया अभ्यसूयितया वज्रलेपावलिप्तस्येव सुदृढस्य मानस्य प्रतिषिद्धत्वादाक्षेपालङ्कार एतच्छ्लोकानतरमेव प्रादुर्भूय मनुष्यलोकेऽस्मिन्नतीर्ष्यालवोऽनिर्वापिता पुरुषहृदयशोकस्य ईदृश्य स्त्रियाऽपि वरीवृत्यन्त इत्यस्मान् सावधानमयोपयगिवास्ते ।

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्मवियोगदुःखपिशुनं गीतं तथोत्कण्ठया।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥ ५२ ॥

सूचिभेद्यनीरन्ध्रान्धतमसावगुण्ठितायां दुर्मनायमानप्रवासिनिवहकान्ताविश्लेषव्यथाकृष्णवर्त्मज्वलासधुक्षणप्रवीणायां निर्विनोदत्वेन प्रहरशतायमानायामतिदुर्विषहायां विभावर्यां कस्मिंश्चिज्जनपदे कुक्षिविधृततोयप्राग्भारगरिममन्थरगामिनो जलमुचः क्षणमप्यविस्मरणीयदयितादर्शनोत्कण्ठाजनयिष्णुना प्रियाजनसमागमसमुत्सुकाध्वनीनसार्थप्रेरकेण गम्भीरेण स्तनितध्वनिना सक्षोभितमना अतिविप्रकृष्टदेशस्थत्वात् प्रियतमासंगमे निराशो निर्भरोत्कलिकाशतेन कीलितो हृदयतनेन विप्रयोगसंतापेन संतप्तो मनःशोषण्या वेदनया शोषितप्रायः स्वान्तव्यापिना निर्वेदनिर्झरेण बहिरप्युदश्रुः कश्चित् पथिको जीवात्मन इवात्मनोऽसह्यविरहयातनशंसि प्रभूतकण्ठसूचितातिशयशोकं किंचित् सान्द्रौत्सुक्येन तथागासीत्, तावत् सर्वजीवान्तककृतान्तवत्प्राणापहारिणः प्रवासशब्दस्योच्चारणमपि दूरे तिष्ठतु, जीवितनाशकप्रवासकथायाः का कथा यथा क्षणमात्रवियोगादपि भीतत्वात् प्रणयकोपस्य निवापजलाञ्जलिः सर्वेण जनेन ससंभ्रमं व्यतारीति यथानुरूपमुपवर्णयन् शृङ्गारिकचूडामणिरमरुः प्रवासविप्रलम्भस्यातिदुस्सहत्वं मुहूर्तमात्रवियोगजनयितृणां प्रणयकलहेर्ष्यामानानामप्यवश्यं परिहेयत्वं चावबोधयति प्रवासिनो वराकस्य कान्ताविरहेशानर्थस्य जनितत्वाद् विषमालंकारकल्पिताभिप्राये विप्रलम्भदुर्भ्योदश्रुणि शार्दूलविक्रीडितवृत्तसदानितावयवे प्रवासमानयोश्चरमनिवापजलदित्सुनि पद्येऽत्र।

स्वं दृष्ट्वा करजक्षतं मधुमदक्षीबाविचार्येर्ष्यया
गच्छन्ती क्वनु गच्छसीति विधृता बाला पटान्ते मया।
प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपप्रस्फुरिताधरा यदवदत्तत्केन विस्मार्यते ॥ ५३ ॥

सुरतपर्यवसानसमये मदिरमदिरामादमुषितविवेका क्षीबाव-स्थानिमग्ना मदविमूढचेता सा वामलोचना वामोरु कररुहाग्रेण स्वयं न्यस्त नखव्रण वपुषि मे निरीक्ष्य मदमत्तत्वादपरया योषिता कृतमेतदिति मनसि कृत्वा सद्योऽविद्यमानामपि प्रतिपक्षकामिनी लक्षीकृत्य हृदि समुत्पनीपद्यमानया दुर्भरयाभ्यसूयया सहसोत्था-यान्यतो यान्ती कुत्रेवेदानी प्रणयिनं मा तृणवद् विहाय गच्छसी-त्युक्त्वा मया वसनप्रान्ते गृहीता सती मा प्रति वदनेन्दु निवर्त्य निष्कारणसतापजनिताश्रुपूर्णनयना दण्डयमीवुमदविचिकित्साजेन कोपेन परिकम्पितौष्ठपल्लवा धृतं ! मा जहिहि जहीहीति यत्सरोष-मवादीत्तत् केन प्रकारेण विस्मार्यते, न केनापीति कश्चिद्युवा संप्रति तया विनाकृतो विरही तदानी कामानलोद्दीपिका कादम्बरी कामिन्या साकं पायं पायमनवद्यमन्मथकेलि च समुपभोज समुप-भोजमतिवाहिता ममुदितकुमुदवान्धवकौमुदीस्मेरा सुरतक्षण दास्तास्ता विभावरी वदाचिच्च मधुमदक्षीवाया इदानीमपि हृदि-कृतपुण्यस्मृत्यास्तयाभूताकारणेर्ष्यामानोत्पादितानुभावविशिष्टाया-स्तस्या निर्विचार वालिश्यमप्यनुस्मारमनुस्मारं तया सह यया-दीर्घ्रं पुनः समिमिलिषु. सखेद सोत्कण्ठ च समुदीरयति।

यथानुभवं मनसि धृतसंस्कारविशेषोद्बोधहेतोस्तदानीतनस-म्भोगावसरे कान्ताया असूयामन्युचेष्टित स्मृतिपदे कान्तेन भूयः समा-रोपितमिति स्मरणं नामालङ्कारो दैन्यसञ्चारिभावान्वितविप्रलम्भ

शृङ्गारव्यञ्जकं पूर्ववच्छार्दुलविक्रीडितवृत्तसज्जितपादमेतन्मुक्तक हे रसिका ! यूयमपि प्राग्वियोगिनो भूत्वा स्वीयायाः दयिताया. कदाचिदप्यस्माप्टं किमिति पिपृच्छिषयेव परिपूणार्थं चरीकर्ति।

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत--
श्चरणपतित प्रेमार्द्राद्रः प्रियः समुपेक्षितः।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातानां सहस्व रुषां फलम् ॥ ५४ ॥

नितम्बिन्यन्तरोपगमनरूपेण स्वदोश्चर्येण सुतरा स्फुटितमन्युवेगानलज्वलितान्त करणया दुर्भरेर्ष्यारोपवडवानलसक्षोभितम्रूकुटितरङ्गभीपणया दुर्गापराह्वचण्डीकल्पया कलहान्तरितया चण्डया कण्ठेग्राह बहिर्निराकृतेन निजदुराचारवशाच्छोचनीयदशान्तरनिपतितेन स्वर्लोकादधस्तादेकपदे निपतितेन क्षीणपुण्येनेव क्षीणभाग्येन केनचिद्रतिलम्पटेन धूर्तेन कान्तासजिगमिषया सकपटमित्थमित्थ मदर्थे क्रियतामिति प्रार्थिता तत्सखी गेहं गत्वा ता निन्दन्ती समुदीरयति हे विधेयाविधेयविमर्शशून्यमनस्के ! दुर्ललितचाञ्चल्यग्रस्तहृदये ! हा हा कीदृश चापल्य त्वयानुष्ठितं येन निरन्तरोदश्रुभ्या नयनाभ्या दुर्दिनायसे केन हेतुनापराद्धत्वाद् भृशं विप्रतीसारमनुभवन् प्रातर् वसतिस्थानमागत्य तया त्वदनुनयाशयेन सविनयदर्शितादरो न पुनस्तेऽपरात्स्यामि, मर्षय मर्षयोदारचित्ते ! मे किल्बिपमेकमिति सम्यक्प्रदर्शितानुशयपूर्वं पादयो. प्रणिपतित. सान्द्रानुरागार्द्रीकृतमना सरलसुकुमारो वल्लभ स्वाच्छान्द्यतस्त्वया सावज्ञमवहेलितस्तत् संप्रति प्रियतमनिरसनेनामुक्तिनिरस्तसौभाग्यसमृद्धिस्त्व दिवानिश जीवितावसानपर्यन्तं गत्यन्तराभावाच्छरणमिवारण्येरुदित समाश्रित्य दुर्दान्ताना दुष्टाना स्वकीयक्रोधाना दुष्पच विपाक क्षमस्वेति।

यथैव नागानन्दे 'सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः शरीरकस्यापि कृते मूढाः पापानि कुर्वते' इत्यत्र शरीरकविशेषणत्रयं तस्य संरक्षणायोग्यताभिप्रायोपेतं तथैव श्लोकेऽस्मिन्नपि चपलहृदये निरस्तमुग्धोदया रुदितशरणेति मानिनीविशेषणत्रयी तस्या आक्षेपोपालम्भलक्षणाभिप्रायगर्भा चरणपतित प्रेमार्द्रार्द्र इति दुर्ललितकामुकविशेषणयुग्मं तस्याहेयत्वलालनीयत्वाशयसूचकं दुर्जातानामिति च रुपा विशेषणं तासामनभिलषितत्वाभिप्रायगर्भमिति साभिप्रायविशेषणबाहुल्येन जनितः परिकरालङ्कारो 'विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः' इति काव्यप्रकाशकारनिर्णीतलक्षणानुरोधी तां मानिनीं माननिर्बन्धं परिहापयितुमिव समलङ्करोति प्रणयमानविप्रलम्भाभिनिविष्टं हरिणीवृत्तसूचितमिदं मुक्तकम् ।

यद्यपीहातिहर्षद्योतिकथनस्यानुवारमुत्सवप्रतिपन्नस्य रमणस्यानेकयोषिदभिसरणलक्षणं निन्दनीयं दौश्चर्यं व्यक्तीकृतं तथापि प्रणयदौर्गत्यनिमज्जितात्मा हृद्व्यथयापि पीड्यमाना दुर्मर्यादं तं निराकृत्याप्यात्मनः कुलजत्वादनङ्गीकृतगत्यन्तरा सा रमणी किं करोतीत्यर्थभूते स्वप्रेमविषये ?

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान्सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ ५५ ॥

आत्मनोऽन्याव्यासङ्गव्यञ्जकं संभोगचिह्नं निशाम्य सुतरां कुपिताभीर्ष्याकषायितवदनकमला प्रणयभङ्गखण्डिता भामिनी प्रसिपादयिषुः कामी, व्याहरति हे अप्रगल्भे बाले ! सा प्रतिवक्ति हे

भर्तं ! ततः सानुनयं स प्रार्थयतेऽयि कोपने ! अमर्षं विजहीहि ततः. सापि निगदति क्रोधात् किं मयानुष्ठितं, न तु किमप्यनभीप्स वैमुख्यतूष्णींभावनिर्भर्त्सनपादाघातनिरसनादिकमभ्यसूयारोपानुभावाभिनयेन कृतं त्वयि कृतकिल्बिषेऽपि गाढवद्धस्नेहद्रोहिणि सत्यपि, स समुदीरयति नन्वन्तर्निगृहीतकोपया त्वया किमपि मे न कृतमिति हेतोर्मयि परिक्लेशः सजाजायते, पुनः सापि भङ्गिनैपुण्येन ब्रवीति भवान् महघ नापराध्यति न स्खलति सर्वाणि स्खलितानि मय्येव वर्तन्ते यतो मया दिवानिशं सावधानमनपेक्षितत्वादसंरक्षितत्वादित्थं त्वं निर्मर्यादो भूत्वोन्मार्गगतो मद्धृदयसंतापनः संवृत्तोऽसि, सोऽपि पर्यनुयुङ्क्ते तत्कस्माद्धेतो कण्ठस्खलितवचनपूर्वं रोदनं कुरुषे, सा प्रतिभाषते कस्य पुरतो मया रुद्यते, संप्रति निर्दयस्य तटस्थस्य तवाग्रतः कथमहं रोदिमि, स आलपति बाढं मत्समक्षमेव रुद्यते, ततः सा पृच्छति दृढमपराप्रसक्तस्य निरनुरागस्य तेऽहं कास्मि ? अपि तु न कापि, स प्रतिवक्ति मे वल्लभासि, ततः सा सावहेलं हस्तं प्रक्षिप्य समुच्चारयति नास्मि नास्मि महिलान्तरसंभोगलोलुपस्योत्पथानुवृत्तिशीलस्यान्याधीनस्य तव प्रिया नास्मीत्यस्मात् कारणात् प्रमुक्तकण्ठं सदैन्यं रोरुद्यते मयेदानीमित्यतिमनोरमा परम्परपर्यनुयोगप्रतिवचनमयी संभाषणपरम्परा संचार्यते प्रणयकलहप्रसङ्गे कामिमिथुनेन।

ईर्ष्यामानजनितविप्रलम्भशृङ्गाररसंसिक्ते मनोहरवाक्यपारस्पर्याह्लादितरसज्ञमनसि शार्दूलविक्रीडितवृत्तयुजि पद्येऽस्मिन् किंचिदाकूतसहितं स्यादगूढोत्तरमुत्तरमित्यलंकारचन्द्रिकाविहितलक्षणानुगामी प्रचुरनिबद्धप्रश्नोत्तरनैरन्तर्यंज उत्तरसंज्ञकालंकारो नितरां प्रतिभासते यथोदाहरणे 'कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम्, पुनरपि तदेव कथयसि मृता नु कथयामि या श्वसिति' इतिवदत्रापि।

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविनतिः किं कृता किं न दृष्टः।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ ५६ ॥

विवाहमहामहानन्तरमपरिचितमान्मथलीलाप्रातिकूल्येन सद्य क्षतयोनिवालास्वाभाविकमौग्ध्येन च स्वादिष्ठमपि पुष्पायुधमदरसास्वादनं यथातृप्ति सम्यग् नास्वादितं मयेति काले गच्छति सति गतैः शनैरुपचीयमानरिरंसा पौनःपुनिकसुरतप्राचुर्योपबृहितप्रेमरसाभिज्ञा निर्भरानुशयमनुभवन्त्यास्ते काचिद्युवतिरिति मन्मथरहस्यकोविदेन सुरसशृङ्गाररसज्ञाग्रेसरेणामरुणा पश्चात्तापपराभूतायास्तस्या दयमानेनेत्थमुच्यते यत् तदानीमप्रागल्भ्यविमूढचेतसा मया किमर्थमनुरागी जीवितेश्वरो न सस्नेहोद्भेदमालिङ्गितः, तस्मिन् मां रागातिशयपूर्वं परिचुम्बति सति कथमिव मया त्रपयैव निजाननं नमितं, किमिति मया सभ्रूविलासं स न निरीक्षितः, कस्माद्वेनोर्वा स मया किंचिदपि नाभिभाषित इति स्वमतिमुग्धनवोढाचेष्टाविशेषमपरिपूर्णमनोरथमनुस्मरन्तीदानीं परिचये गते शृङ्गारे रुचिररसाभिज्ञा संवृत्ता यूनी सखेदमनुतापमनुबोभवीतीति । यथा कश्चन बालः स्वहस्तगतं मधुरमिष्टान्नं केनापि हेतुना सम्यक्प्रकारेणानास्वाद्य किमिति मधुरिमसुरसं तन्न खादितं मयेति पश्चात्तापं निर्विशति तथेयमपि माधुर्यमयमपि मन्मथसुधासारं यथारुचि न समुपभुज्य प्रबलानुतापतात्यमानास्त इति पश्चात्तापाक्षेपशंसिनाक्षेपालङ्कारेणान्योन्यगाढानुरक्तयोस्तरुणदंपत्योर्मञ्जुलसंभोगशृङ्गाररसं मञ्जुमञ्जु प्रवहन् मन्दाक्रान्तापादतरङ्गः श्लोकनदोऽयमात्मनः शोभां दिदृक्षूणां सुरभिरससारं च लिलिक्षूणां तृप्तये घोघुष्यत इत्यत्र का मेऽतिशयोक्तिः ।

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्ता-
द्दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहनिकटपदस्थायिनि प्राणनाथे
भग्ना मानस्य चिन्ता भवति मयि पुनर्वज्रमय्यां कथंचित् ।।५७।

दुर्मरेर्ष्यामूलके प्रणयाकलहेऽपराधिनं भर्तारं प्रत्यभिनय ौष्ठवेन मानप्रपञ्चो व्यक्तं त्वयाविष्करणीय इति प्रियवयस्याभि रितापि गृहागतस्य तस्य प्रत्यक्षं खण्डशः खण्डितमानप्रोत्साह थोपदेशं तथाकर्तुमशक्ता भूत्वा तदनन्तरं सामर्थ्यविहीनमात्मा र्शयन्ती ताभ्यो यथावस्त्वावेदयति यदस्य मे प्राणदयितस्या भधानमाकर्ण्याप्यौत्सुक्यप्रमोदातिशयवशान्मे गात्रं सर्वतो विस्पष्ट- रेन्ध्ररोमाञ्चकञ्चुकितं समुत्पनीपद्यते यस्य च वदनेन्दुं निशा- यापि निर्भरानन्दातिरेकेण प्रोद्भिद्यमानस्वेदसंदोहतया ममेदं शरी- कं विद्रवदिन्दुकान्तोपलानुरोधि संवोभोति तस्मिन् प्राणदयिते [हमागत्य गण्डपरिचुम्बनकण्ठाश्लेषार्थमेव मत्सान्निध्ये तिष्ठति ति कथंचिद्युष्मदुपदेशद्वारा मनसि कोपदारुण्यस्य समारोपित- वाद्वज्रप्रख्याया निष्ठुरायामपि मयि मानचिन्ता खल्वतर्कितमेव तरोदधातीत्येव नैसर्गिकसान्द्रप्रणयेन कृत्रिमोऽप्यकृत्रिमोऽपीर्ष्या- तनितामर्षं समूलघातं विनाश्यत इति ।

अत्र खलु पूर्वार्धे प्रियतमनामसंकीर्तनश्रवणेनापि दयितायाः ोमहर्षणं सजायते, तदीयमनोद्रावकमुखेन्दुदर्शनेनापि हिमरश्मि- करणालोकेन चन्द्राकान्त इव तस्या देहः प्रहर्षप्रकर्षेण द्रवीभवति व किमुत तदालिङ्गनादिकेन, किन्त्वोत्तरार्धे सर्वदमेनातिप्रभ- विष्णुना मन्मथेन पराजित्य क्षुद्रमानकण्टको भीतभीत. कांदिशीको भूत्वा [illegible]

आननेन्दुवपुश्चन्द्रकान्तपरम्परोपमितिद्वारेण सुस्फूपवर्णितत्वादत्र स्रग्धरावृत्तेन सह प्रादुर्भवति जात्यलंकार ।

नन्वेतत्पद्यवाचनानन्तर वितर्क्यते यदबलाना सरलहृदयाना कृतेन भर्तृस्नेहो वापत्यवात्सल्य वापरेण वेन खल्वतिरिच्यत इति ।

लाक्षालक्ष्म ललाटपट्टमभित केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपर. ।
दृष्ट्वा कोपविधायि मण्डनमिद प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृश श्वासा समाप्ति गता. ॥ ५८ ॥

परिस्फुटितासूयास्पदीभूताया प्रतिपक्षकामिन्या पादयो प्रणिपातेन नून सञ्जात चरणालक्तकचिह्नमलिकपट्टिका परिरस्तस्या परीरम्भेण ननु कण्ठे न्यस्त तदङ्गदमुद्रण तस्या नेत्रपरिचुम्बनेन नु मुखे मुद्रितमञ्जनकल्मप तया विहितेन नेत्रचुम्बनेनोताहोस्विन्नयनयोरङ्कितो रक्तताम्बूलवर्णश्चेत्यादिक रमणस्य वपुषि सञ्जात कोपयिष्णु मन्युज्वलोद्दीपक लाञ्छनरूप विभूषण प्रभातकाले मागूय निरीक्ष्य निरीक्ष्य स्वविरहज्वरप्रशमनायानीतपूर्वस्य विलाससरसीरुहस्याभ्यन्तरे धैर्येण धैर्येणाप्यमानमन्तर्निगूह्य रोषाग्निप्रादुर्भावम् ...ार्यमेव कमलसौगन्ध्यजिघ्रासाव्यपदेशेन चकितहरिणेक्षणाया श्वासा पर्यवसान प्राप्ता इति स्वाङ्गेषु स्पष्ट लाञ्छितेनान्यासमुपभोगलाञ्छनेन सह प्रातस्तरा स्नानमकृत्वैव निजवसति प्रत्यागतस्य वमयुजनकस्यातिनिकृष्टाचारस्य दौर्जन्यदोहृदयस्योल्लङ्घितन्यायस्य निन्दापात्रस्य भर्तुरनिष्टेन मदालसेनापि स्वैर्य समाश्रित्य निजाकारविकृतिगोपनतत्पराया स्त्रोचितनुताया शोजन्यमोहादम्भुमण्डितस्वभावभूपाया प्रमदाभा-

जनीभूताया भार्याया अत्यन्तश्लाघ्यं धैर्यं सौक्ष्म्येण वर्णयति सहृदयकविशिरोमणिरस्मदीयोऽमरुः ।

परमार्थतोऽत्र शार्दूलविक्रीडितवृत्तकल्पिताकारे दुस्सहविप्रलम्भदुःखशंसिनि मुक्तकरत्ने सुगृहीतनाम्न्या प्रेमाबन्धविच्छेदखण्डितया स्वीयेर्ष्यामर्षविकारगुप्तये लीलातामरससौरभाघ्राणक्रियया गर्हधनाम्नः पत्युरतिसन्धानं कृतमिति हेतोः समुत्पन्नो युक्त्यलंकारस्तस्या अतिस्थिरत्वं सुविनीतत्वं च प्रशंसन् यथापापं भृशं सपादाघातं निग्रहीतव्यस्य तस्य दौश्चर्यं निन्दन्निवोत्तमालंकारायमाणः शोभते ।

लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रिय मया तन्निर्गतः श्रोष्यसि ॥ ५९ ॥

मनोदाहकप्रवासविप्रयोगासहिष्णुर्मनसि व्यवसितप्राणोत्सर्जनसंकल्पा नूनमद्यप्रभृत्यनुभविष्यमाणविरहव्यथाचिन्तावेगमामन्थ्यमानसुकुमारहृदयपल्लवापि वज्रसारायमाणधैर्यावलम्बिता शोकानलदग्धप्रायापि निर्विकाराकृतिर्धैर्यं धन्यानां प्रागल्भ्येन प्रौढा काचिन्मत्तकाशिनी जनपदान्तरप्रयाणमार्गेऽधुना प्रस्थास्यमानं सज्जीकृताध्वसम्भारं भर्तारं नयनयोरुद्भिद्यमानमपि बाष्पदुर्दिनं कण्ठे निगृह्य धीरमभिभाषते हे प्राणनाथ ! प्रवासविप्रलम्भस्यात्यन्तासहत्वात् सम्भोगसौख्यमयस्य गृहागमस्यातिरुचिरत्वाच्चोदश्रवो निर्भरविरहवेदनामग्नीभूयमाना हताशाः सत्यो दीना अपरा वराकयो नेत्राम्भसो निस्सरणेन सततं सततं घूर्णायमानैर्लोललोलैरश्रुबिन्दुसन्दोहैः प्रलपिन्यो भावी मां त्यक्त्वा मा गाः, यदि गच्छसि पुनर्मां न द्रक्ष्यसीत्यादिनानाविधवचनैर्मार्दवं दयनीयमनुग्रहं-

प्रणिपातैरन्यै प्रियै प्रेमातिशयद्योतकैश्चेष्टितैश्च कार्यान्तरवशात् प्रवासाय देशान्तर प्रति प्रतिष्ठमान निजजीविताधारभूतत्वात्तमन्तरेण प्राणधारणस्याचिन्त्यत्वाच्च प्राणेशभूतमतिदयित भर्तारं विशेषेण निवारयन्ति, यतोऽह तु न तादृशी तत सप्रश्रय स्नेहपूर्वं पतिप्राणाहमाशासेऽद्य पुण्याह पुण्याह पुण्याह भूयात्, कल्याणकारि सुदिन्स तेऽस्तु, हृदयेन मेऽनुरागरञ्जितेन सह व्रज, प्रातस्तरा प्रयाणोद्युक्तस्य ते मङ्गल भूयात्, भद्रा सन्तु ते पन्थान इति परन्तु हे दयित! यदन्योन्यप्रेमानुरूप परस्परस्नेहसदृश किंचिन्मया समीहित विद्यते तदचिरेणाध्वमार्गस्थस्त्वमाकर्णयिष्यसीति । अचिरभाविदुर्विषहविप्रलम्भशृङ्गारशोकरसकर्दमे तथा शार्दूलविक्रीडितवृत्तन्यस्तचरणेऽश्रुबाष्पदुर्दिनायमाने श्लोकरत्ने प्रगल्भधीरनायिकाया भविष्यन्मरणव्यञ्जकेन चरमपादेनानुकूलनायकस्य प्रस्थानं निवारितमिति परिपूर्णांशय आक्षेपालकार सिद्धनिजकार्यमनोरथ सजाजायते । ननु यत्स्नेहोचितमीहित प्रिय मया तन्निर्गत श्रोष्यसीत्यतिकरुण वच श्रुत्वा निष्करुणोपि क स्वीया जाया तुच्छतृणवत् परित्यज्य जनपदान्तर गच्छेत्, न कोऽपीति श्रद्दधाना वय नि सशय मन्यामहे स्वभार्यावात्सल्यानुकूलोऽयमपि नायक प्रयाणाध्यवसाय परित्यक्तवान्, न तु दयिता तामिति ।

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता
नो वा पादयुगे स्वय निपतित तिष्ठेति नोक्त वच ।
काले केवलमम्बुदालिमलिने गन्तु प्रवृत्त शठ—
स्तन्व्या बाष्पजलौघकल्पितनदीपूरेण रुद्ध प्रिय ॥ ६० ॥

दीर्घकालप्रोषिताध्वनीनान् स्वस्वकान्तासमागमतृष्णापिपासितान् सत्वरगमनाय नीरन्ध्रयुग्मदर्शनौत्सुक्यसहस्रेण युष्मान्

प्रतिपालयन्ति विरहिण्य प्रिया इतीव गम्भीरस्तनितेन प्रेरयति सान्द्रोत्कण्ठितप्रणयिमिथुननिकरपरस्परसमेलनमनोरथसाधकेऽतिस्पृहणीये वर्षासमये केनाप्यविज्ञातेन कारणेन वहिर्यियासु निर्विवेक निर्विचार कामिन केवल नयनसलिलपूरेण काचित् कामिनी कथंचित् समरौत्सीदिति व्याजिहीर्षया नानाविधसभोगार्थोपभोगसुखितसहवाससुखीयमानानुरक्तस्त्रीपुंसनिवहदिदृक्षैकतानमना इवास्मदीयरसकविरमरुरुपवर्णयति यत् तन्निर्गमनप्रतिषेधाय स्ववाहुवल्लरी तस्य परिधानाञ्चले साग्रह नासञ्जि, द्वारकपाटेऽर्गलवत् तया न न्यधायि तदीयचरणयुगले सकरुण तया भूयो भूयो नो प्राणामि मामेकाकिनी निरुपमप्रेमपात्र विहाय क्व यासि निर्दय ! तिष्ठेहेति वचन वा न तया समुदीरित किन्तु मनोहरे प्रणयिजनसौभाग्योदयजनयितरि हन्त वारिवाहराजिमलीमसे दुर्दिनायमानेऽप्यन्योन्यासक्तकामिमिथुनसमवायसङ्गमप्रमोदप्रदत्वेन खलु सुदिनायमाने जलदागमे प्रस्थातु प्रवृत्तो विचारविहीनोऽनर्थकारी रमणो वारिमुग्भि सपादनीयेनापि नयनसलिलप्रवाहे विरचितेन जङ्घाद्वयसेन नदीपूरेण केवल तनुमध्ययापि पीनजघनभारमन्थरया दयितया तया कृच्छ्रात् प्रयाणात् प्रत्यषेधि । खल्विहापि पूर्ववच्छार्दूलविक्रीडितवृत्तकल्पितावयवे स्तोकविप्रलम्भरसस्यन्दिनि रुचिररुचिरे मुक्तके कमनीयाया प्रावृषि निर्जिगमिषोर्नायकस्य गमन दुस्तरेण नदीपूरेणेव वाष्पजलौघेन पतिवत्सलया नायिकया निवारितमित्यौपम्यविशेषोपेत आक्षेपालकारो रसिकाना मनासि सरस हर्तुमाविर्भवति ।

आस्ता विश्वसन सखीषु विदिताभिप्रायसारे जने
तत्राप्यर्पयितु दृश सुरचितां शक्नोमि न व्रीडया ।

लोकोऽप्येष परोपहासचतुरः सूक्ष्मेङ्गितज्ञोऽप्यलं
मातः कं शरणं व्रजामि हृदये जीर्णोऽनुरागानलः ॥ ६१ ॥

पातिव्रत्यविहीना जीवद्भर्तृका काचिद्योषिदात्मनो निर्मर्यादेन रागोद्रेकेण स्वकीयात् पत्युरलब्धसंभोगसहवासप्रमोदा सती हृदये विद्यमानं पुरुषान्तरं कामयमानापि प्रतिकूलदैवयोगात् कदाचिदपि संभाव्यलोककिंवदन्तीभीरुस्तत्सङ्गमं मनोराज्यविजृम्भणकल्पमिव मन्यमाना किंकर्तव्यताविमूढचेतास्तत्समागमविषये प्राप्तकालस्य कस्यचिदपि प्रतिविधानोपायस्य प्रेप्सया सुपरिचिता काचिद्वयोवृद्धामभिभाषते हेऽम्ब ! अभिलषिताय तस्मै जनायाभिसरणादिसमीहितार्थनिवेदनाय किं करिष्यामि, वयस्यासु विश्वासो मे तिष्ठतु, यदि तास्तस्मै प्रेषिता स्युस्तर्हि कर्हिचिदपि रहस्यभङ्गं कुर्वीरन्निति ता न श्रद्दधामि, सर्वथैव मयि स्निह्यतीति मदीयचेतोवृत्तीङ्गिताकारसौक्ष्म्यविदि विज्ञातमत्सर्वस्वतत्त्वे तस्मिन् स्पृहणीये जनेऽपि सलीला सुकल्पिता दृष्टिं विक्षेप्तुं त्रपया न पारयामि, एष लोकोऽतिमात्रं परोपहासनिपुणः परमाणुसूक्ष्मङ्गिताकाराशयकोविदः परदूषणापवादनिरतश्च, हृदयदाहकोऽनुरागहुतभुग् जीर्णतां गत इतीत्थंभूतेऽत्र कमहं समाश्रये, किं वा करोमीति । पुरुषान्तरे दृढनद्धैकानुरागा भर्तृमती कुलपांसनीयं दुर्मतिर्निकृष्टस्त्री केवलं लोकापवादभयाद्दूतीप्रयाणमपि दृष्टिविक्षेपमपि स्वयमभिसरणमपि किमपि कर्तुं न शक्नोतीत्यस्या निन्दनीयस्वभावावस्थितिवर्णनोत्थेन जात्यलङ्कारेण प्रयोगाभावजनितविप्रलम्भशृङ्गाररसो शार्दूलविक्रीडितवृत्तसर्जितपादचतुष्टयोऽयं श्लोकः कृतार्थीक्रियमाणो मनुष्यलोके विशाल एव निन्दास्पदीभूता परिहरणीया स्त्रीधर्मविवर्जिता स्त्रियोऽपि बाहुल्येन वोभुवतीति कवेरभिप्रायं सन्सूचयति ।

न जाने समुपायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि किं यान्ति नेत्रता किमु कर्णताम् ॥ ६२ ॥

मे द्वितीयजीवितभूते द्वितीयहृदयभूतेऽत्यन्तस्पृहणीयेऽतिकमनीयेऽपरपुष्पधनुषीव लावण्यौदार्यसौजन्यपौरुषादिप्रशस्यगुणसमुदायसमलङ्कृतस्वरूपे शाश्वतसुखजनके प्रियतमे मत्प्रत्यक्षमेवागत्य पेशलानि रुचिराणि सुरसस्वादूनि चन्द्रकान्तोपलद्रावककुमुदवान्धववदन्त करणद्रावकाणि चाटुवचांसि मधुर मधुर व्याहरति सति सेन्द्रियग्रामाणि निखिलानि गात्राणि सर्वात्मना द्रवीभूय तस्यातिप्रियदर्शनतया सावधानदिदृक्षया नेत्रायन्ते किं तदीयचाटुवचसा सुनरां श्रुतिपेयत्वात् किमुत कर्णायन्त इति सम्यग् न वेद्मीति तस्मिन् सुदर्शने यूनि निर्मर्यादमनुरक्ता काचिद्युवतिः प्रियसखीजनस्य पुरस्तात्तत्प्रशंसापूर्वं स्वनिर्भरप्रेमविशेष प्रीतिप्रोत्फुल्लहृदया तत्स्मरणसुखेषन्मुकुलितनयनोत्पला सती कथापयति । अत्रातिशयोक्तिगर्भ सदेहालङ्कार । वृत्त त्वनुष्टुप् । परिपूर्णसंभोगशृङ्गार ।

अनल्पचिन्ताभरमोहनिश्चला
विलोक्यमानेव करोति साध्वसम् ।
स्वभावशोभानतिमात्रभूषणा
तनुस्तवेय वत किं नु सुन्दरि ॥ ६३ ॥

इति प्रिये पृच्छति मानविह्वला
कथचिदन्तर्धृतवाष्पगद्गदम् ।
न किंचिदित्येव जगाद यद्वधू
कियत्र तेनैव तयास्य वर्णितम् ॥ ६४, युग्मम् ॥

दुर्विषहेर्ष्यामानविप्रलम्भसंतापपरम्पराभूयिष्टेऽन्तरङ्गबहिरङ्गशोषणशीलत्वेनातिविषमे विरहे निर्विनोदत्वेन दुरतिक्रमे हृदयवेधिविषादशल्यदीर्घीकृते बहुतिथे काले कथंचिद् व्यतीते वनितान्तराभिगमनरूपिणी दुर्वृत्तिमनुष्ठाय गृहमागत्य मनोव्यथामृदितस्य स्वकीयशरीरस्य दौर्बल्यकार्श्यकारणं सकरुणमिव पृच्छत उत्पथप्रतिपन्नस्यापराधिनो भर्तुरग्रतोऽतिश्लाघ्यसौजन्यसौहृदयस्नेहातिरेकशालिन्या केवलमेकशब्दमप्यापि शब्दसहस्रातिरिक्तसारया मानजनितावस्थान्तरगोपनार्थमेव यथार्थं प्रयुक्तयापि समस्तवस्त्ववबोधिकया व्याजोक्त्या खलु निजाकारं गोपयाञ्चकार निर्भरचिन्तासंतापसंतप्ततनुः काचित् तन्वङ्गी पतिव्रतेत्युपविवर्णयिपुणा परमाणुसूक्ष्मस्त्रैणगताकोविदेन रसिकचूडामणिभूतेन कविवरेण सरसं निगद्यतेऽयि वरवर्णिनि ! प्रचुरचिन्तामतानमूर्च्छानिष्पन्दा दुर्भरवैमनस्यनैरन्तर्यविक्लवा निसर्गसुषमानम्रतामानभूषा किन्तु वास्तविकविभूषणविवर्जिता भूरिव्ययातनूकृता निर्वलेयं ते तनुः किं नु खल्वलोकनमात्रेणैव त्रासं मे जनयतीति सविषादं पर्यनुयुञ्जाने पत्यौ तदपराधमूलकदुर्विगाहमानव्याकुलीकृतचेता हृदयसंतापनचिन्ताग्निदग्धकल्पा सा वधूरभ्यन्तरस्तम्भिताश्रुप्रवाहकलुषितकण्ठस्खलितशब्दोच्चारणपूर्वं गद्गदशब्देनातिकृच्छ्रान् न किंचिद् ' इत्येव यत् प्रतिवचनं व्याजहार तेनैवास्मै तया कियन्न वर्णितं, न किंचिदित्यनेन समस्तवृत्तान्तं आमूलाद्भूयिष्ठं तस्मै पापिने निवेदयाञ्चक्रे इति ।

ननु हृयत्र ' मयि पश्य गृहारामपरागैरम्मि धूसरा ' इत्युदाहरणवन्न किंचिदिति व्यपदेशेन प्रणयमाननिष्पादितस्य प्रशस्यविनयक्षमाविभूषणया कुलजया वध्वा शोचनीयावस्थान्तरस्यापह्नुतत्वाद् व्याजोक्त्यलंकारोऽचिरेण हृद्यतरसंभोगशृङ्गारेण परिणस्यमानेन दैन्यसंचारिभावपुरस्सरेण विषादशल्यितेन विप्र-

म्भशृङ्गारेण वस्तुतो दु खमय वशस्थविलवृत्तयुत पद्यमिद खलु सिद्धस्वप्रयोजन चरीकर्तीत्यत्र क सदेहगन्ध ?

विरहविषमः कामो वामस्तनूकुरुते तनुं
दिवसगणनादक्षश्चायं व्यपेतघृणो यम. ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेव कथं प्रमदाजनः ॥ ६५ ॥

अचिरस्थायिनापि प्रणयकलहजेन विरहेण दूरीकृतजीवितनाथाया कामुकेन विनाकृतेयमबला निर्बलास्त इति चिकिल्क्षया निराश्रयमात्मान लक्षीकृत्य निरन्तरमाकनीस्कद्यमानेन सर्वतापेन पुष्पधन्वना निष्ठुरैर्मार्गणैर्मरोमृद्यमानाया कान्तविरहितेय निष्प्रयोजनायुरिति सुसूदिषया जीवन्मृतस्व बलात्कारेण केशग्राहमाकृष्य सर्वजीवान्तत्वेन भयानकेन कृतान्तेन प्रतिक्षण कठोरेण दण्डेनाजघन्यमानाया कलहान्तरिताया कस्याश्चित् प्रमदाया अभिशोचनीयमवस्थान्तरमावेदयितुमागता प्रणयकोपविश्लेषितमिथुनसघटनानिपुणा श्रेष्ठदूत्यनुरूपा तद्वयस्या विजनस्थ विरहिण तदीयकामिन यथावसरयोग्य सानुनयमवबोधयति हे स्वामिन् ! असहनीयदुर्वारणमनसतापसतानजनकत्वेन क्षणमप्यसहनीयेऽतिस्निग्धकान्तवदनारविन्दावलुलोकिषासमुत्पनीपद्यमानोत्कण्ठाबाहुल्यसमाकुलत्वेन निमेषमात्रमप्यक्षमणीये सुकुमारहृदयपल्लवच्छिदि तीव्रव्यथाभूयिष्ठे वियोगे विषमो निस्त्रिंश प्रतिकूलचेष्टो मनोमथन इति स्वापराभिधासदृश कदर्पो विरहकृशानुपरिक्लिष्टमपि तस्या शरीरमधिक कार्श्य प्रापयति तथा दयाविहीन सर्वेषा मजीवानामायुर्हरत्वादिह लोकेऽन्तक इत्यपरेण नाम्ना सुविख्यातो निष्करुणोऽसौ यमुनाभ्राता तस्या जीवितावधेरवशिष्टदिवससम्ख्यानतत्परो वरीवृत्यते, त्वमपि च

ास्या ईर्ष्यामर्यरूपिणो रोगस्य वशंवद सन् रोगशान्तिमंपादनाय । प्रयियतिपसे तस्मात् सर्वात्मना विचारय कथमसोढव्येन वियोग-ारिखेदभारेण मृदित. किसलयवन्मृदुलो योपिज्जन इत्य घ्रियेतेति

'दुर्वारा. स्मरमार्गणा प्रियतमो दूरे मनोऽत्युत्सुक गाढ ाम नव वयोऽतिकठिना प्राणा कुल निर्मल, स्त्रीत्व धैर्यविरोधि न्मन्मयसुहृत् काल कृतान्तोऽक्षमी नो सख्यश्चतुरा क्थ नु विरह सोढव्य इत्य मया' इत्युदाहरणवदनापि प्रणयमानजनितस्यापि वेरहस्यासोढव्यताद्योतनाय कामयमादीना परस्पराविरुद्धयुगपद्भा-भाजा गुम्फनासमुत्थ समुच्चयालकारश्चरणनिवेशितहरिणीवृत्त श्लोकमिम विमण्डयन् विशेषतो मानज विप्रलम्भशोक सवर्धयति। किं चाद्यादिमपादेन कामो विरहविषमोऽपि हृदयगमे सङ्गमेऽत्यन्ता-नुकूल इति द्वितीयपादेन सर्वास्ववस्थासु कृतान्ताज्ञाया अनतिक्रम-णीयत्वादनवद्यसुखमयेषु सभोगेष्वायुरवधियापितव्यो न त्वन्त-करणमर्मभेदिषु विरहदुःखेष्वित्युत्तरार्धेन त्वा प्राणनाथ वर्जयित्वा न कोऽप्यन्यस्तामुज्जीवयितु समर्थस्तद्यावत् सा म्रियते तावद् द्रुततरमागत्य ता वल्लभा समुच्छ्वासयेति पृथक्पृथगवगच्छद्भि-रस्माभिरप्याशिष्यते प्रणयकोपवियोजितस्यैतस्य कामिमिथुनस्य शीघ्रसमागमो भवतादिति ।

पादासयते सुचिरमिह ते वामता कैव मुग्धे
मन्दारम्भे प्रणयिनि जने कोऽपराधोपरोधः ।
इत्यं तस्याः परिजनकथाकोमले कोपवेगे
वाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रवृत्तम् ॥ ६६॥

प्रेमागमो विदितत्वान्निर्भरेणानुनयेन दृढ येपीड्यमानमवि-चारेण प्रणयस्खलितेन यदृच्छया कृतापराधोऽस्मि मया न तेषरा-

स्यामीति त्वदधीनजीवितत्वयेत्थात् पाशुले भूतलेऽप्यात्मान पात्य सुदीर्घकाल सिसान्त्वयिषया त्वदीयचरणावलग्न कृपण सान्द्रानुरक्त जन प्रति हे मूढे ! कैव कृपाविहीनाया निष्ठुर करणायास्तव प्रतीपगामित्ता निखिलाना चिन्त्याचिन्त्यान नयोपायाना क्षीणप्रायत्वादधुना मन्दारम्भ स्तोकावशिष्टो कामिनमुद्दिश्यापराधस्य का निरोधस्तत् प्रणयापराध एकलोऽप पदे मारोपयेत्येवप्रकारेण यथावद् व्याहृतेन परिजनस्योपालम्भ देशमयेन भापणेन चिरात्तस्या कामिन्या रोषावेगे विश्लथ तदनन्तर नयनसलिलप्रसरे सपदि न प्रसृत नाप्रसृतमिति प्र कुपिताया कस्याश्चिद् रमण्या प्रसादोन्मुखत्व गच्छन्त कोप निर्बन्ध व्यक्तीकरोति निसर्गदुर्बोधस्त्रीभावपारदृश्वा कविवरेण

इहान्तिमपादे वाष्पोद्भेदैस्तदनु सहसा न स्थित न प्र मित्यनेन वाक्येन प्रेमापराधसमुत्पादितस्य कोपवेगस्य सम्य प्रशमितत्वाच्चित्तप्रसन्नताद्योतका अश्रुपीडा नैवपदे प्रोज्झि परन्तु काले कियति गते प्रसृता इति व्यज्यते किञ्चात्र म श्रान्तावृत्तयुजि विप्रलम्भशृङ्गारमयेऽप्यचिरभाविन सभोगशृ सूचयति श्लोके वामताप्रमुखाना विरुद्धाना पदार्थानामे युगपदवस्थापितत्वाद्विरोधाभासाल्ङ्कार सजायते यस्य लक्षण काव्यादर्शे 'विरुद्धाना पदार्थाना यत्र ससर्गदर्शनम्, विरोपदर्शना स विरोध स्मृतो यथा ' इत्युक्तम् ।

तथाभूदस्माक प्रथममविभक्ता तनुरिय
ततो न त्व प्रेयानहमपि हताशा प्रियतमा।
इदानीं नाथस्त्व वयमपि कलत्र किमपर
मयाप्त प्राणाना कुलिशकठिनाना फलमिदम् ॥ ६७ ॥

पुरानवद्येपूपचितरुचिररससारेपु सर्वाकाररोमहर्पणेपु सुरतप्रमोदसुखैर्वतिवाहितानामविस्मरणीयाना वासराणा सोत्सुकमनुस्मृत्यानुस्मृत्य सुचिरसमुपभुक्तसभोगकात्स्न्यंतया वा परेद्युरपि ह्योऽप्यद्यापि नून श्वोऽप्यपरेद्युरपि सर्वदैव समानरसदायकत्वेन वा प्रतिक्षणक्षीयमाणायुर्वत् प्रेम्णोदानीमपचीयमाने सति निर्वेदोद्रेकमनुभवन्ती विपण्णा काचित् सीमन्तिनी निन्दास्तुतिपूर्वमनुरागविहीनकल्प भर्तार ब्रूते यत् प्राग् यदाविच्छेदनीयमुदृढरागरज्जुरज्जुनिबद्धनिर्विकारहृदयो केवल स्नेहेनैव स्नेहायैव स्नेह एव प्रणयिनावावामभूव तदावयोर्हृदयमप्येकमविभक्त तनुरपि चैकैवाभिन्ना सत्वभूता, परस्परनिर्दोपगुणाकृष्टत्वादन्योन्यानुरागद्रवीभूतसर्वात्मप्रहृष्टत्वाच्च कियत्सुखिनौ तदानीमासिष्वहि तत-पश्चाद् दौर्भाग्यवशात् प्रेमाबन्धे शनकै शनकै शिथिलीभूयमाने त्व न पुनर्मे प्रियतम समजनिष्ठा, अहमपि दुर्गतिनिमग्ना वराकी समजनिपि, सप्रति क्षीणसारेऽनुरागेऽप्यग्निसाक्षिक विवाहितत्वात्त्व मा बिभर्पीति भर्ता भवसि, अहमपि त्वया केवल प्रिय इति भार्या भणामि, विमन्यत्, वज्रसारायमाणाना प्रणयविवर्जिताना दग्धप्राणाना दुर्विपाक फल मया लब्धमिति । अविरहितयोरपि प्रेमरहितयोर्दम्पत्यो सहवासस्य नरकसदृशत्वमवबोधयत्यत्र शिखरिणीवृत्तपल्लिताकारे मुक्तके दम्पत्योस्तयो पूर्वमेकता तदनु दयितादयितभावस्ततो जायापतिभाव इति पर्यायेणावर्तत्वादुन्नद्यते पर्यायालङ्कार ।

ननु इतरेतरमदयोरपि समाश्रयभूतप्रेमरहितयो दुःखमनसो स्त्रीपुरुषयोर्निरालम्बो भार्यापतिभावो वा निष्फल सहवासो वा कथ नाम सोढु शक्येत ?

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥६८॥

अयि बालेऽप्रगल्भे ! अप्रमादं शृणु प्राप्तकालं मे वचः किमिति त्वया सरलया समस्तः कालो मौग्ध्येनार्जवेनाकुटिलस्वभावेन च व्यतिवाहयितुं सदैवोद्यम्यते, कदाचित् कृतप्रणयापराधे कदाचिदपराधरहितेऽपि दयितजने त्वं क्रोधालुरिवेर्ष्यालुरिव सासूया रुषं भजस्व प्रागल्भ्यसमन्वितं धैर्यं मनसि समाश्रयस्व कौटिल्यपरिहीणां सरलमतिं सुदूरे जीर्णोपानहमिव परित्यज, किमनया प्रयोजनमित्येवंप्रकारेण मान्मथरहस्यनिष्णातया सर्वस्मिन् कंदर्पविषये प्रौढिकोटिमधिरूढया कयाचित्सख्या निपुणेन मन्त्रिता काचिदतिमुग्धा प्रेयसि गाढबद्धनीरन्ध्रानुरागा दृष्टेन वचसानेन चकितचरिता साध्वसाधिकम्लवदना तरुणी, हे निर्विचारे नीचैर्मृदुलन्यथा हृदयस्थो मेऽतिदयितो जीवितेशो निश्चितमेवाकर्णयिष्यति ततो ध्रुवं तुभ्यं कोप्स्यति हीति ब्रूते स्मेति सर्वपुरुषगणजित्वरीव प्रागल्भ्यादिसम्पन्नाया वयस्याया अस्य मौग्ध्यार्जवकोमलताधारभूताया पतिदेवतायाश्च मध्ये रहसि प्रवृत्तं मनोरमं सुरसं संभाषणं कविपुंगवेनोपवर्ण्यते । इह पूर्वार्धेन बहुविधास्वादजनकव्यञ्जनाविरजितमनाम्नाय विस्मयजनमिव मुग्धनैवम्भमय नीम्मप्राय जीवित योऽतु न केनापि स्वस्व तस्मादद्रुगोऽप्रागौग्ध्यश्चनार्जवया विदितविषयरसानुरागानुरागरहस्यया दुर्वात्म्यनुमानमनिर्वचनीयं दृश्यविचित्रीकृतानुरागसैकता त्वया चरितार्थमिति तथानरागेन निजप्राणाना तसावधाना प्राणनाथ इव नाथात् कृतार्थी प्रणयवद्मानारूढा परिरम्भा सर्वाङ्गमानन्दमानुभूता इति मनुज्ञाम् ।

'जितोऽसि मन्द कन्दर्प मच्चित्तेऽग्नि त्रिलोचन' इत्युदाहरण-स्नापि चरमपादे हृदि स्थिता हि ननु मे प्राणेश्वर श्राप्यतीति पुनिरूपणेन नीचैः शसेति वाक्यार्थस्य समर्थितत्वाद् 'हेतोर्वाक्य-दार्थत्वे काव्यलिङ्गं निगद्यते' इति साहित्यदर्पणकारनिरूपितलक्ष-णेत काव्यलिङ्गालङ्कारो मुग्धाया सरलहृदयभूषिताया पितो निर्मलानुरागातिशयद्योतक मधुरिमोद्रेकप्रीणितरसिकनिवह लोकमेन समलङ्कुर्वन् शोभुम्यते। वस्तुतो या भर्तृमत्य आत्मन ति प्राणा इति मन्यन्ते ता कथ न प्रशस्या ? ये वल्लभिणो भार्या वकीयप्राणवद् दयितेति निर्धारयन्ति ते कथ न श्लाघनीया ?

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र जन प्रियो मे।
एकाकिनी वद कथ न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदन सहाय ॥ ६९ ॥

गुरुनितम्बविम्बभारालसपादक्षेपामतिबलेन रागरज्जुना निर्भरेण रागोद्रेकेण च समाकृष्यमाणा तमिस्राया कान्ताभिसरणाय सकेतस्थान गच्छन्तीमकुतोभयामेकाकिनी स्वैरिणी दृष्टिगोचरे कृत्वा वयोवृद्धा काचिन् पर्यनुयुङ्क्ते हे रम्भोरु! सूचिभेद्यान्ध-तमसमसान्द्रावगुण्ठिते गम्भीरेऽर्धरात्रे केनावश्यकेन कारणेन कुत्रैव प्रयासीति, सा स्वैरिणी दुर्वारमदनमदक्षीवा व्यपेतत्रपा सती व्यक्त प्रतिवक्ति यत्र मे प्राणभ्योऽधिकोऽमूल्याज्जीवितादपि गरीयान् दयितो जन प्रतिवसति तत्रैव गच्छामीति, पुनश्च तया जरत्या हा यत्ने हाबले! सघनरे निशीथेऽनहाया कथ न खलु भीतिमनुभवसीति परिपृष्टे कुतो मे साध्वस सजायते, श्रूयता नून परीवृत्यते सहायो मेऽन्तरतीक्ष्णैरपि महेल त्रिजितकृत्स्नभुवन कोदण्डनिहितविशिख.

पञ्चशरो मीनकेतन इति सदर्पं स्वैरवृत्तिः प्रकृताभिसारिका प्रतिभायते।

खल्विह करभोरु! इति संबोधनशब्देन पीवरस्थूलश्रोणिफलकभारात्तस्या मन्दगामित्वं, घने निशीथ इत्यनेन सान्द्रतमिस्रायास्त्रासजनकत्वं, द्वितीयपादेन कामिकामिन्योः प्रेमातिरेकस्तुरीयपादेन च गम्भीरायां नीरन्ध्रतमोजालनिरुद्धालोकायामपि निशीथिन्यां भयत्रातरि पुष्पसायके सहचरीभूतेऽकुतोभयाया विदग्धस्वैरिण्याः साध्वसगन्धोऽपि नास्तीत्यभिप्रायः सुविस्पष्टं व्यज्यतेऽत्र च प्रथमतृतीयपादसूचिताभ्यां हेतुमत्प्रश्नाभ्यां साकं द्वितीयतुरीयपादव्यक्तीकृतमभिसरणाभयहेतुद्वयं वर्णितमिति हेतोर्जायते प्रश्नोत्तरालंकारसनाथो हेत्वलंकार एकतः सर्वदमकदर्पदर्पप्रशंसनायान्यतः प्रस्तुतपद्यमण्डनाय च। वृत्तं तु वसन्ततिलका।

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।
मुग्धा कुड्मलिताननेन्दु ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाथवा नतिमृते तेनानिशं चुम्बिता॥ ७०॥

अमन्दाभ्यसूयास्पदीभूतान्यप्रतीपदर्शिनीसङ्गभावबोधकनिःसंशयदन्तव्रणितोष्ठपुटोऽनेकस्त्रीसंभोगलालसासमतिक्रान्तसदाचारमर्यादो मण्डलीभूतसरीसृपकुटिलकैतवस्वच्छन्दातिसहितस्वकलत्रः सर्वथा शाठ्यनिरतत्वात् निस्त्रप सदोच्छृङ्खलमन्मथप्रुद्गलम्पटत्वाद् दुर्ललित कश्चिदतुल्यप्रतिरम्भो रतिशूरोऽन्याङ्गनाभिगमनचिह्नरूपं रदनच्छदव्रण मासूय दर्शं दर्शं प्रणयभङ्गखण्डितया स्वकीयया कान्तया कर्णमदण्डापातार्होऽपि मृदुत्वेन विलासमरसीरुहेण

सरोष ताडित मन् ताडनसमये यदृच्छयान्त प्रविष्टैस्तत्सरसीरुह-किञ्जल्कवर्णै शल्यितदृष्टिरिव नैसर्गिकधौर्यवशात् सकपट सम्भ्रमद्रागमुकुलितनेत्र स्थितस्ततश्चाय मे रमणो लीलारुणकुशेशय-प्रहारेण तत्केसररेणुकर्दयितेक्षणस्तिष्ठतीति चेतोभ्रमेण ससभ्रम तदपनयनार्थ सारिकाचञ्चूपुटवत्सम्पुटितेन मुखाग्रेण तदीयनेत्रयो पवनमाधमन्ती तत्र स्थिता सा मूढा वरारोहा तेन धूर्तेन योषिद-न्तरतल्पगमनरूपस्वकिल्बिषक्षान्तिप्रार्थनार्थं पादप्रणाममभ्यर्थत्वैव कपटेनानुवार परिचुम्बितेति मदनकेलिरसाभिज्ञोऽस्मद सहास व्याहरति। परमार्थतो दोश्चर्यकैकमवाभिनिविष्टेन शठेन दन्तक्षता-धरप्रकटितनिजापराधप्रच्छादनाय लोचनप्रविष्टकिञ्जल्ककणव्य-पदेशेन प्रणयापराधकुपिता कामिनीमतिसधाय परिचुम्बनेन सुस्वादुमधुरिमोद्रेककमनीय तस्या अधरामृतसार यथातृप्ति चोरित-वानिति युवयत्वार सभोगशृङ्गारद्योतक शार्दूलविक्रीडितवृत्तसय-मितचरण मुक्तकमिदमलकुर्वन् प्रतिभासते। अत्र तृतीयपादे वायुशब्दोऽपानवायु स्मारयतीति जुगुप्साव्यञ्जकाश्लीलदोष निर्दिशन्ति हेमचन्द्रगोविदप्रमुखा केचिदालकारिकास्तथापि शब्ददो-षान्वेषणतत्पराणा काव्यमीमासकाना पुरतो वस्तुनो निर्दोष काव्य मवापि भवितु नार्हति।

स्फुटतु हृदय काम काम करोतु तनु तनु
न सखि चपलप्रेम्णा कार्यं पुनर्दयितेन मे।
इति सरभस मानावेशादुदीर्य वचस्तया
रमणपदवी सारङ्गाक्ष्या निरन्तरमीक्षिता ॥ ७१ ॥

प्रागनिर्गमदनवरहावसरे चाटुवचनगतेनापि प्रयत्नत प्रसि-सादयिषु प्राणदयित कोपावेगादपास्य काचिन्मनस्विनी सपदि निर्भरा-

नुशयमरीमृद्यमानान्तःकरणेव करयुगलं भुजान्तराले निधायापसरतस्तस्य सरणी मशङ्क सन्गृह्यमेक्षिष्टेति विवक्षया सर्वाकारहृदयंगममान्मथव्यवहारनिष्णातोऽस्मदीय. कविवर उपवर्णयति हे प्रियसहचरि प्रणयभंगसमकालमेव हृतहृदयं शतधा विशीर्यतां, मकरध्वजः प्रकामत. सुतरां दग्धदेहं कार्श्यं नयतु, पुनश्चञ्चलभङ्गुरानुरागेण प्रेयसा न किंचिदपि प्रयोजनमिति निर्विचारं वचनं रोषवेगवशाद्धठादुच्चार्य हरिणेक्षणया तया निर्गच्छतस्तस्य पन्था अविच्छिन्नपश्चात्तापपूर्वं खलवजस्रमदर्शीति । अत्र पूर्वार्धेऽसह्यस्नेहभङ्गेन वरं हृदयविदलनं निष्ठुरेण मन्मथेन विप्रलम्भे वरं तनूकृततनुतानवं, न विनश्वरप्रेमशाली मे विश्वासघातकोऽसौ कपटप्रणयीति प्रणयापराधकुपिताया ईर्ष्यामर्षारुणितलोचनाया कलहान्तरिताया दुर्वारमन्युवेग प्रदर्शितः किन्तूत्तरार्धे तस्मिन् हृदयवल्लभे क्रोधनिराकृतत्वान्नियाते सति शिरीषकुसुमाधिकमृदुलस्वभावायाश्चिरन्तनप्रबलप्रेमाभिभूतक्षणिककोपायास्तस्याः सपदि सजात. पश्चात्तापातिभारः समुचित इति सम्यगालोचयद्भिरस्माभिरप्याशिष्यते यन्निष्कारण प्रणयकलहविश्लेषितयोरनयो परस्परसान्द्रानुरक्तयोः शीघ्रसङ्गमो भवतादिती । प्रणयमानजविप्रलम्भरसमये हरिणीवृत्तविरचिताकृतौ श्लोकेऽत्र हरिणाक्ष्यास्तादवस्थ्यव्यापारख्यापको जात्यलंकार एतत्पद्यशोभासपादनाय तस्याश्च दुर्भरमानानुशयसतापद्योतनाय प्रादुर्भवति ।

गाढाश्लेषविशीर्णचन्दनरज.पुञ्जप्रकर्षादियं
शय्या सप्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।
गाढौष्ठग्रहपूर्वमाकुलतया पादाग्रसंदंशके–
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥ ७२ ॥

प्रौढिं गतेन प्रोत्फुल्लयौवनदर्पेणोत्सिक्ता काचिन्मत्तकाशिनी स्वेन कान्तेन सह यथारुचि निर्विष्ट वल्लभायितसुरतबन्ध विश्वासपात्रभूतायै वयस्यायै रहसि निवेदयति यदयि वामोरु! सुकुमाराङ्गि! पश्य, नीरन्ध्रपरस्परपरिरम्भणेन सर्वतो विस्तीर्णस्य गन्धसारपङ्कोत्करस्यातिशयेन पल्पितोऽय तल्प कोमलस्य तेऽङ्गस्यायोग्यः संपन्न इति व्यलीकेन पुरुषायितमभोगसमुपबुभुक्षया मामुरसि समारोप्य सान्द्रसान्द्रावरपरिचुम्बनपूर्वकं भृशमुद्दीपितरागोद्रेकविह्वलतया संदंशरूपेणाग्रपादद्वयेन मम जघनांशुकमपहृत्य रमणीयेन धूर्तेन यदभिकाङ्क्षितं योग्य तद्यथातृप्ति प्रारब्धमिति।

इह हि चन्दनपुञ्जप्रकर्षपल्पितशय्याव्याजेन कामिनी भुजान्तरालेऽधिरोप्य पुरुषायितमकारयद्विविधनिधुवनप्रकारलोलुपः कामुक इत्येतस्माद्धेतो समुत्पन्नेन युक्तिसञ्ज्ञकेनालकारविशेषेण वल्लभायितललामकामुकवत् कृतार्थीनियते सपूर्णसभोगशृङ्गारव्यञ्जक शार्दूलविक्रीडितवृत्तसदानितचतुष्पाच्छ्लोकोऽयम्।

उक्तञ्चानङ्गरङ्गे 'जातश्रम वीक्ष्य पतिं पुरन्ध्री स्वेच्छात एवाथ रतेष्वतृप्ता। कदर्पवेगाकुलिता नितान्त कुर्वीत तुष्ट्यै पुरुषायित सा ॥ उत्तानसुप्त दयित भुजाभ्यामालिङ्ग्य लिङ्ग विनिवेश्य योनौ भजेन्नितम्ब परिचालयन्ती नारी तदा स्याद्विपरीतबन्धः॥' इति किन्त्वत्र प्रस्तुतकामी नूनमजातश्रमोऽपि विपरीतबन्धलम्पटो भूत्वा स्वीया वल्लभा वल्लभायितमचीकरत्।

कथमपि कृतप्रत्याख्याने प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम्।
असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं
विगलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः॥ ७३॥

आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति ।
दत्त्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन् क्षणे
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥ ७४ ॥

अहो दुस्सहपीडे सुमनोगुच्छाधिककोमलहृदयदाहुकमन्मथमुर्मुरायमाणे प्रवासविप्रलम्भे भर्तृप्रत्यागमनप्रत्याशाकृष्टमनसा निर्भरमनोव्यथामामन्थ्यमानया प्रोषितभर्तृकया नूनं पूर्वेद्युरपि ह्योऽपि पुनरद्यापि रात्रिदिवा कियच्चिरमनागच्छतोऽपि तस्यागमन प्रतीक्षितमित्युल्वणोत्कलिकानिकरकीलितमृदुलान्तःकरणायास्तस्या विरहिण्या हृदयस्थान्तराभिव्यञ्जकेऽस्मिन्नकृत्रिमानुरागोद्रेकोद्भेदेन हृदिस्पृशि मनोद्रावकत्वेन चानेकशृङ्गारिकाव्यनिबन्धायमाने मुक्तकरत्ने सखेदं सदय च व्याहरति दुर्मनायमानविरहिजनसुहृद्भूतोऽनिर्वचनीयरसाभिज्ञचूडामणिरस्मत्कविवरो यदद्य मे प्रियतम किं नु प्रतिनिवर्त्स्यतीत्याशाबन्धेन दुर्वारौत्सुक्यप्राचुर्यवशाद्वासरशतायमानमिवोपलक्षितं कृत्स्नं दिवसं प्रोषितं भर्तारं प्रतीक्ष्य प्रतीक्ष्य नयनगोचरावधिपर्यन्तं तस्य सरणिमुद्ग्रीवया सोत्कण्ठमुद्वीक्ष्योद्वीक्ष्यापि तदनागमनेन सुतरां विषण्णया तनोऽस्तंगरिमविरूढे महत्प्रदीपिते सायंकालीने तमसि भूतलमवगुण्ठयितुमाविर्भवति सति मार्गेषु सर्वेषु विरलीभूतसंचारेषु शून्यप्रायेषु सत्सु दुर्वहविषादार्तिभारमृदितया प्रोषितभर्तृकया तयाभिगृहं पदमेकं न्यस्य नन्वेतस्मिन्नेव क्षणे प्राणनाथो मे समायातो न स्यादिति शङ्कयोत्कण्ठया च सहसा ससम्भ्रमविवर्तितशिरोधरं भूय उद्वीक्षितं तथाप्यहह तेन नायातमिति । बाढं पथिकवनिताभिशोचयिष्णुप्रवासविप्रलम्भशृंगारावबोधकः शार्दूलविक्रीडितवृत्तप्रकल्पितावयवोऽयं प्रकृष्टश्लोकस्तस्याः स्नेहार्द्रस्वाभाविकचेष्टितवर्णनोन्येन जातमलंकारेण परिपूर्णाभिप्राय

सपदि निगद्य त्वरितपादक्षेपपूर्वकं चीनदेशसंभव क्षौममितस्ततस्तूर्णं व्याधूय सुरतबुभुक्षितेन कालक्षेपासहिष्णुना चेतसा प्रदीप निरवीवपदिति प्राणदयितसमागमप्रमुदितायास्तस्या वरारोहायाश्चेष्टितं वर्णयति कविशार्दूलोऽमरुः शार्दूलविक्रीडितवृत्तशालिनि मुक्तकेऽत्र।

सुचिरासंभुक्तसुरतपीयूषरसतयातीव बुभुक्षितया तया नायिकयात्मनः संभोगाभिलाषमपह्नुत्य मनोरथसिद्धये दष्टास्मीति व्यलीकेन प्रदीप निर्वाप्य परिजनातिसंधानं कृतमिति हेतोर्युक्त्यलंकारः प्रवासविप्रलम्भपर्यवसानममुत्यपरिपूर्णसंभोगशृङ्गाररसाभिव्यञ्जनप्रह्लादितरसिकसमूहमेतद् रुचिरास्वादमयं पद्यं समलंकरोतीति निध्यायतो मे मननीदं समुत्पद्यते यत् परस्परानुकूलयोः प्रवासेन विप्रयुक्तयोर्जायापत्योः कृते पुनः समायोगादधिकसुखकरं हृद्यतरमन्यत् किमपि न भवेदिति।

आलम्ब्याङ्गणवाटिकापरिसरे चूतद्रुमे मञ्जरीं
सर्पत्सान्द्रपरागलम्पटरटद्भृङ्गाङ्गनाशोभिनीं
मन्ये स्वां तनुमुत्तरीयशकलेनाच्छाद्य बाला स्फुर-
त्कण्ठध्याननिरोधकम्पितकुचश्वासोद्गमा रोदिति ॥ ७६ ॥

अन्योन्यमगतकामिमिथुनमदयित्री तथा प्रवासविप्रलम्भसन्तापसन्तप्यमानविरहिवृन्दमनःशाणे संभोगमुत्तेजयता कृतेन मधावपि विरहिताना कृते तिग्मे वदर्पण लभे वसन्ते दूरवर्तिनि देशान्तरे स्थितः कश्चिदध्वनीनो दुस्सहवियोगखेदमामरीमृश्यमानो निर्भरमदनज्वरदन्दह्यमानो नूनं दीर्घीकृते विप्रयोगावधौ हृच्छल्यायमानदुर्विषह्मान्तस्थप्रत्यायकृतिनिपातहृदया प्राणदयिता भार्या मयोपमोत्सुकचानु स्मारमनुस्मारमुद् गुनत्री विमर्शयति यद्गृहाजिरसमीपवर्तिन.

क्रीडोद्यानस्य पर्यन्तभुवि पुरा कान्तेन सह मनोजन्मलीलाविलसितया मया यथासुखं क्रीडितमिति तास्तान् सुखितान् दिवसान् पुनर्दुर्लभान् दीर्घनिश्वासपूर्वं स्मरन्ती मन्मथानन्दापराह्वे सहकारमहीरुहे सर्वतो-वितन्वन्नीरन्ध्रसुमनोरजोमधुपरिमललोलुपझंकारसुभगभ्रमरीकदम्ब-सुशोभितां सर्वतापनपुष्पधन्वन एकतमसायकभूतां मञ्जरीम-वलम्ब्य तिष्ठन्ती विरहदुर्बला मे कान्ता स्वीयं देहमुत्तरीयकैक-भागेन संवृत्य परिस्फुरत्कण्ठध्वनिप्रतिरोधवेपितवक्षोरुहनिश्वासो-द्भेदा सती सदैन्यं तूष्णीं रोरुद्यत इत्यहं तर्कयामीति । असोढव्ये प्रणयिनो भर्तुः प्रवासे निरालम्बाया सुकुमारस्वभावाया विरहिण्या दीनावस्थान्तरवर्णनोत्थेन जात्यलंकारेण विभूषितः शार्दूलविक्रीडित-वृत्तकल्पितचतुष्पादेष श्लोकः सहृदयकाव्यरसिकानस्मान् सर्वान् रोदयितुमिव निर्वेदविषादमूलस्य वियोगस्यातिमात्रदुःखावहत्वमति-दुर्भरत्वं च द्योतयन्नजस्रोदश्रुविरहिमिथुनकरणप्रवासविप्रलम्भ-शृंगाररसप्रवाहं निरन्तरं वितनुतेतमाम् ।

यास्यामीति समुद्यतस्य गदितं विस्रब्धमाकर्णितं
गच्छन्दूरमुपेक्षितो मुहुरसौ व्यावृत्य तिष्ठन्नपि ।
तच्छून्ये पुनरास्थितास्मि भवने प्राणास्त एते दृढाः
सख्यस्तिष्ठत जीवितव्यसनिनी दम्भादहं रोदिमि ॥ ७७ ॥

हे प्रियवयस्या ! तदानीं कार्यान्तरवशात् प्रवासाय प्रण-यिनीं भार्यां मां परित्यज्य सुदूरस्थं जनपदान्तरं प्रति प्रस्थातुं प्रवृत्तस्य यस्य यास्याम्यधुना पुनर्दर्शनायेति बाष्पाकुलकण्ठं व्याहृतं हृदयवेधि मुक्तिसाधनप्रत्ययं वचनं निर्विकाराकारयापि दुस्सहविरहवडवानलसंशोभितान्तरङ्गसमुद्रया मया तत्प्रयाणविघ्न-

निवारणायैव विश्रब्ध धैर्येण धैर्येणाश्वायि स मे प्राणनाथोऽध्व मार्गम्योऽग्रे गच्छन् मम दुःस्थाज्यत्वात् पृष्ठत आहूयमाणो भूयो भूय. सखेद परिवृत्य निष्ठन्नपि जीवितनिरपेक्षया मया तदीयप्रस्थान-सिद्धयेऽन्यथा सोऽयं देशान्तरेऽनुप्रयातस्य निजकार्यस्य गौरवमपि जीर्णपादुकामिव परिहाय नून प्रयाणाद्विरस्यतीति मत्वा दूरमुपेक्षि, ततस्तस्य गमनानन्तर वज्रसारायमाणानिष्ठुरचित्तवृत्तिरह तरक-गल्भे विरहे मानगिरयानामनुभवन्ती प्राणत्यागमप्यकृत्वा यत्र नितान्ते पुरातनवर्षेषु सम्भोगसुखेषु प्रेम्णा प्रत्यपिता तेन च मया सुरता सुनिलया यथानुभूत यथानुरमुदित तथैव तत्सम्भावनया सांप्रतमपि [illegible] जीवितं [illegible] सद्विरहिणीयात्मवर्ग्यितास्मि, हन्त ते यज्ञेश्वरपरिसम्भुराः [illegible] स्थायुका एते प्राणा इदानीमपि मा न परित्यजन्ति मम हे सखि ! सदर्पं निरितान्ता आहूय [illegible] [illegible] सखीं स्वर्गीरवात्मसुखं प्रलपामीति [illegible] [illegible] काचित् प्रोषितभर्तृका दयनाज्ञान् नितान्ती [illegible] ।

अत्र [illegible] शार्दूलविक्रीडितवृत्त एव [illegible] प्रयुक्त ।

अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वयाकाण्डे मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा ह्येते विरहदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ ७८ ॥

[illegible] सुखं [illegible] [illegible]
[illegible] [illegible] [illegible] सम्प्रतौ

मानाभिनिवेश परित्याजयितु सोपालम्भमवबोधयत्येकतमा सखी तेन धूर्तहतकेन पुन सजिगमिषया प्रार्थिता हे कुटिलधूर्तस्वभावानभिज्ञे ! अजिह्ममनस्के ! निजकान्तपरित्यागेनावश्य जनिष्यमाण विपन्नस्यानुरागद्रुमस्य दुर्विपाक मन्युवेगादविचार्य मादृक्ष प्राप्तकालोपदेशदानक्षम विश्वसनीय सखीगणमप्युपेक्ष्य कथ नामेदानीमकाले त प्रति त्वया प्रणयामर्षो निष्पादितो हा पश्य यस्मादतिभीषणकल्पान्तकालीनसमुज्ज्वलितज्वलनज्वालाशालिन एतेऽलाता: स्वतनुदाहनाय स्वकीयेन करेण मोहान् समाकृष्टास्तस्मात् सर्व विध्वस्त, विफलैररण्यरुदितै कृत, तै किं प्रयोजन प्रेम्णि साप्रत विनष्टे कामुके च दूरीकृत इति। अत्रोत्तरार्धे व्यपेतसौभाग्यया क्रोधानलधूमविमोहितचैतन्यया त्वया स्वकान्तनिरासेन महती विपदात्मन उपरि समाहृता तथाप्यस्त्येक एवोपायो विपन्निरसने यदि दिष्टया स त्वया सह यथापूर्व संगच्छेतेति समागमाभिप्राय उपांशु निर्दिष्ट: किञ्चात्र कलहान्तरिताया कामिविरहमूलभूतस्यानर्थप्रदस्य मानस्य प्रतिषेधात् प्रादुर्भवत्याक्षेपालकार: प्रणयकलहजनितविप्रलम्भशृङ्गारकर्दमकलुषित शिखरिणीवृत्तशालिनमिम श्लोक मण्डयितुम्। पुनरत्र निरूपितकामुकसजातीया शठाधमा मनुष्यलोकेऽधुनापि भूयिष्ठ जीवन्त स्त्रीरत्नानि धौर्त्येन व्यलीकेन दुश्चरितेन च भृश कदर्थयन्तितरामित्यहो खेदो महान।

कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो नि:श्वासैरयममृतहृद्योऽधररस:।
मुहु: कण्ठे लग्नस्तरलयति बाष्प: स्तनतटे
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्॥ ७९।

प्रणयकुपिता चाटूक्तिसान्त्वनचरणप्रणिपातैरप्यप्रसन्नामति ढामर्पायिहृग्रस्ता निजदयिता निशाम्य निशाम्य मन्युस्ते दयवल्लभ सवृत्तोऽहं तूदासीन इति सोल्लुठवचसा कश्चिद् रहितप्रणयापराध कामी ब्रवीति हेऽवधीरितानुनये ! अप्रसन्नचित्ते ! वविधप्रसादनविधिभिरप्यपरित्यक्तकोपया गृहीततूर्ष्णीभावया स्तस्यापिनकपोलया त्वयाजस्रपाणितलसरोजेन गण्डभित्तौ ।त्रलेखामण्डन मृष्ट, न तु मदीयाननिपीडनेन, स्वादिष्ठ ।यूपसारायमाणोऽत्यन्तरुचिरोऽस्य तेऽधररसो

दुर्भरेर्ष्यारोपव्यञ्जकैर्दीर्घनिश्वासैर्निपीतो, न तु परिचुम्बनेन मया, शिरोधरायामवसक्तोऽन्तर्निरुद्ध बाधावेगजो नयनसलिलोत्पीडो मनोहर वक्षोरुहस्थल वेपयति न तु क्षीणभाग्याऽहम्, हे कठिनहृदये ! श्रूयतामित्य कापविपादवैमनस्यभूयिष्ठो मन्युस्तव वल्लभ सजातो न तु तटस्था अकिञ्चित्करा वयमिति बाह्यौदासीन्याभिव्यञ्जकम- ध्यान्तरानुरागबाहुल्यावबोधक हृदयगम निगदित श्राव श्राव सावेगो- द्भिन्नबाष्पोत्पीडं प्रमत्तिसूचक महं मानिन्या तया माना नून परित्यक्तो भवेदिति प्रस्तुतदपतिमुद्दैश्यिणस्तर्कयामा वयम् । नाय गुधागु नि तर्हि मुधागु प्रयसीमुखमितिवदयवा, हालाहलो नैव विप विप रमेत्यादिवत् प्रिया मन्युर्जातस्तव न तु वयमित्यत्रापि प्रिये प्रियस्तनिहृनवेन मन्यौ तदारोपितत्वादपह्नुतिर्नामालकारोऽ- चिरसंभोगपर्यवसायिमानजनितविप्रलम्भशृगाररसनिस्यन्दिन शिख- रिणीवृत्तनाभिनमेन श्लोक समलकरोति कयचिदचिरेण मन्यौ प्रशान्ति गते हृद्यतरेण सौम्यरसेण नभोगशृगाररसधारेण मिथुन प्रमोदताम्, योऽप्रिय सजात न पुन प्रिया भवनादित्याशासान इव ।

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥८०॥

प्रणयिभर्तृद्वितीयमात्मानं वर्जयित्वा शून्यीभूतं विविक्तं रागोद्दीपनक्षमं लीलागारं कोऽप्यस्मद्रहस्यं निरीक्षेतेति कातरस्त्रीस्वभावशसिन्या शङ्कया विशेषतः समीक्ष्योपच्छनैः शयनीयकात् पूर्वकायमुत्थाप्य किन्वय मे प्राणदयितो व्यलीकनिद्रामुकुलितनयन उताहोस्विद्वस्तुतो निद्रित इति निद्राव्यपदेशसंदेहदूरीकरणाय मृषास्वापनिमग्नस्य भर्तुराननं दीर्घकाल सान्द्रस्नेहपूर्वं विलोक्य निर्भरप्रेमोत्सुक्योद्रेकपारवश्यान्नेत्रयोर्भालपट्टे कपालयोरधरे वीतसाध्वसं परिचुम्ब्यामृतरसायमानपरिचुम्बनप्रहृष्टरोमाञ्चां कपोलभित्तिं निशाम्य त्रपाविह्वलाधोमुखी वैक्लव्यातिशयारुणवदनेन्दुर्मुग्धा प्रणयबहुमानास्पदीभूता भार्या संधुक्षितरागज्वलनेन प्रहर्षस्मितिप्रोत्फुल्लदृष्टिना स्मयमानेन दयितेन चिरं चुम्बितेति रसिकानामस्माकं मनस्यपि परस्परानुकूल्योद्वृत्तरवद्धप्रणयपाशयोस्तरुणदम्पत्योरतिमधुरेण हृदिस्पृशा संभोगविलासेन रुचिरं रतिरसं परिपूरयन् सरस गहर्षं च व्याहरति सहृदयरसिकचूडामणिः कविकुञ्जर ।

अहो कियद्दूरमपजेह्रीयते नेनापि मुग्धगुणनराव्यरञ्जितहृदयानाममुष्यकाव्यपीयूषभागनिलापुरुषाणां सर्वजनमनश्चमत्कारि चिन्त्यमानमनन्द गनिरमान्मयपिलासमयचित्रैःशायत्नाद्युष्यां परिपूर्णं गगप्रकाशिगीनिवनवष्ठुतिमनोहर सम्यगुररीकृतशार्दूलविक्रीडितवृत्तनोऽभि निरुपममधुरतरत्न यत्र निर्वाच्योनयानुरागैरभिमूल-

शरीरस्य विविक्ते केलिसदने रमणीयरिरंसाप्रोत्साहितस्य विलासिमिथुनस्य नि सारे जीवलोकेऽपि जीवितसारभूत इव निरूपितोऽतिरुचिकरोऽत्यन्तहृद्य. सुरतमहामहो व्रीडाजुगुप्सादिद्योतकाश्लीलदोषरहितः सार्थकैः सगुणैर्मधुरिमसमन्वितैः शब्दैः सुष्ठूपवर्णितो यच्चानलंकृत्यपि सद्गुणप्रकृष्टरससमुपेतत्वात् काव्यमीमांसकैर्निरवद्योत्तमकाव्यपदे समारोप्यते।

लोलभ्रूलतया विपक्षविगुपन्यासेऽवधूतं शिर–
स्तद्वृत्तान्तविदीक्षणे कृतनमस्कारो विलक्षः स्थितः।
कोपात्ताम्रकपोलभित्तिनि मुखे दृष्टया गत पादयो–
रुत्सृष्टो गुरुसंनिधावपि विधिर्द्वाभ्यां न कालोचितः॥८१॥

दुर्ललितस्त्वं सभोगलोलुपया मदीर्ष्यापात्रीभूतायास्तस्या वसतिगृहं गाढानुरक्तां मामवधीर्य गतवानिति सासूय चञ्चद्भ्रूवल्लर्या प्रतिपक्षकामिनीवेश्मदिग्भागनिर्देशे कोपनया वध्वा कृते सति त्वदधीनो नाहं तत्राधासिषमिति स्वदोश्चर्यापह्नवाय शीर्षमितस्ततस्तेन धूर्तकीटेन भर्त्रा कम्पितम्, असौ ते दुश्चरित वेत्ति हे वञ्चक ! मा मा खलु वञ्चयस्वेति मूकमेणेङ्गितेन तद्विपक्षरमणीसङ्गमवृत्तान्ताभिज्ञसख्यादिजनमुखनिरीक्षणे कोपारुणितनेत्रया तया विहिते सति सलज्जमनुष्ठितशिर प्रणाम सन् वैलक्ष्याकुल एव तस्थिवान्, ततो व्यलीकतत्परोऽप्रभुत्तमाङ्गप्रणामेन समुद्घोषितस्वापराधो न मर्षयितव्यो रतितस्कर इतीर्ष्यालोस्तस्या वदने दुर्दम्याभ्यसूयारोपानलारुणीकृतगण्डस्थले सति गुरुजनसान्निध्ये चरणप्रणिपातस्यायोग्यतया दृष्टिक्षेपेणैव धूर्तस्तस्या पादप्रणाममकार्षीदित्यप्रकारेण श्वशुरप्रमुखगुरुजनसमक्षमपीर्ष्यामानप्रवासनानुनयचेष्टात्मकोऽपरा-

धसमयोचितोऽपि गुरुजनसामीप्येऽप्राप्तकालो गर्हणीय प्रक्रमो द्वाभ्या जायापतिभ्या नात्याजीति प्राक् प्रतिपिद्धप्रतिकूलकामिनी-गृहगमनस्यापि सहेलमतिक्रान्ततत्प्रतिपेधस्य सुरतलम्पटस्य कस्यचित् पत्यु. प्रणयकुपितस्य च तदीयकलत्रस्य परिहसनीय नि शब्दचेष्टित सर्वावस्थाप्रतिपन्नप्रणयव्यापारकोविदेन सम्यगुप-वर्ण्यतेऽस्मदीयकविशार्दूलेन ।

अत्र खलु मा स्म तत्र भूयो गम इति मया वारवार निषिद्धोऽपि त्व सपत्नकामिनीसदन गत्वा तया सह मदनललित निर्वर्तितवानिति म्लनेङ्गितेन तयोद्घोपिते तदपराधेऽपि मृषा वादिना तेन धूर्ताधमेन शिर कम्पनेन प्रत्याख्यात तत पदर हेऽनृतक ! अत्र साक्षिजनो वर्तत इति दृष्टिविक्षेपेण सूचिते तस्मिन् निजपापस्य सुविदितत्वाद् गत्यन्तराभावेन नमस्कार विधाय तेनानुनिनीपितमेवमादरणीयगुरुजनसवाक्षेऽपीदृशो व्यापारस्ताभ्या-मनुष्ठित किञ्च यदि गुरुजनस्य सान्निध्य नाभविष्यत् पादाघाततांडनतर्जनाक्रोशप्रायो महान् विप्लव समजनिष्यतेति विदग्धधूर्तप्रगल्भमानिन्यार्नैसर्गिकचेष्टावर्णनोत्थेन जात्यलङ्कारेण विभूष्यतेऽत्र शार्दूलविक्रीडितवृत्तशोभी मानकृतविप्रलम्भशृङ्गारा-भिव्यञ्जय श्लोक ।

जाता नोत्कलिकौ स्तनौ न लुलितौ गात्र न रोमाञ्चित
वक्त्र स्वेदकणान्वित न सदृमा यावच्छठेनामुना
दृष्टेनैव मनो हृत धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनात्र निरूप्यमाणनिपुणो मान समाधीयताम् ॥ ८२ ॥

विहितेनगि भर्तरि दुर्गोरनमोघ्मया यथाक्रमागृहीतधैर्यया त्वया प्रणयकोप कस्मान्नोपपादितोऽस्मत्सखीभिरन्तरभिगमनेन

रणयभङ्गं कृत्वा यावज्जीवं त्वन्मनःसंतापनो भविष्यतीत्याद्युपदेशवचना विश्वसनीयाभिः प्रौढसखीभिरवबोधितापि काचिन्मुग्धा कृतापराधे प्राणनाथे दृष्टमात्र एव दृढीकृतो मानोऽवश्यंभाविना मनोद्रावेण सह युगपत् कांदिशीको भूत्वा कुतोऽप्यदृश्यतां गत इति तासां पुरतोऽभिधत्ते हे सख्य ! शृणुत तावन्निर्भरानुरागादौत्सुक्यं मनसि न समुत्पन्नं प्रमोदातिभाराद्वक्षोरुहौ न वेपथुमन्तौ प्रहर्षातिशायदङ्गं न पुलकितं रागोद्रेकाद् वा वदनं न स्विन्नं यावदमुना धूर्तेन धैर्यचुरेणावलोकितेनैव जीवितेश्वरेणैकपदे मे मनो मुषितमद्य तस्मात् पुनरस्रोपदेष्टुमर्हन्ति भवत्यः केन विधिना केनोपायेन वा निपुणं निरूप्यमाणो निपुणेन समीक्ष्यमाणो मानो दृढीकृत्य सस्थाप्यतामिति। तावद्दूरे आस्तां मानवार्ता यावल्लोचनगोचरे पतितमात्रेणैव मत्स्थैर्यतस्करेण हृदयं मे चोरितमस्ति तदसौ शठः प्रणयकुपिताः मां प्रसादयितुं समीपमागच्छेच्चेन् तर्हि सर्वमत्यद्भुतं संजायेत, स्नेहाभिव्यञ्जक उत्कण्ठातिरेकः समुत्पद्येत, तत्सन्निधानजनितानन्देन कुचौ ससम्भ्रमं वेपेयाताम् प्रह्लादातिशयेन सुतरां तनू रोमाञ्चिता भवेत्, मम मुखं च निरन्तरमेव रागस्फुटनेन प्रस्वेदेतेति निसर्गसरलयापराधिन्यपि वल्लभे नीरध्यानुरक्तया नववध्वा सर्वकर्षेण प्रेमबलेन समूलघातं विनाशितस्य मानस्य शोचनीया दशा शार्दूलविक्रीडितवृत्तरचितपादेऽचिरेणैव मनोरमसभोगशृङ्गारेण परिणस्यमानं विप्रलम्भशृङ्गारं द्योतयति जात्यलङ्कारविभूषितेऽत्र मुक्तके यथावस्तु निर्व्याजं निर्दिश्यते।

दृष्टः कातरनेत्रया चिरतरं बद्ध्वाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः ।

इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ८३ ॥

यादृच्छिके मदनकलहप्रसंगे रोपितस्यात एवात्मानं परि-
ज्यान्यतो यियासो. प्रणयिनो गमनं यथाशक्ति निवारयितुं प्रयत-
नायाः कस्याश्चित् कामिन्या अनुकम्पनीयं निर्वेदमुपविवर्णयिषुणा
पालुनातिमृदुस्वभावेन दुर्बोधस्त्रीपुरुषचेतोवृत्तिकोविदेनातिसूक्ष्म-
न्मथमर्मविदा शृंगारिकविसार्थप्रिसरेणामरुणा व्याह्रियते यद्
यविह्वलया चकितचकितहरिणलोचनया प्रणयिन्या प्राणदयितः
नुनयं सुचिरं वीक्षितस्तया प्राञ्जलया त्वदयीनां त्वदेकतानमनसं
निष्ठप्रेमसर्वस्वा मां प्रति निष्कारणं कोपं विहाय पुनरानुकूल्यं
जस्वेति सनिर्बन्धं सविनयं च प्रार्थितस्तदनन्तरं क्व यासि मम
नप्रार्थनां सावज्ञमुपेक्ष्येति परिधानवस्त्रदशायां गृहीतस्ततोऽनुराग-
कर्षद्योतनाय तन्निर्गमननिषेधाय च तया निर्व्यपदेशं परिरब्ध-
स्थापि सर्वमेतदनभीष्टमिव प्रक्षिप्य सावहेलमनादृत्य निष्करुणः
कशहृदयो निर्यातु प्रक्रान्तस्ततो विरहशोकसागरनिमग्नया
राशया तया दयितयादौ जीवितात्मा विसृष्टा पश्चाद् दयितो
मुक्त इति ।

परमार्थं पूर्वार्धेऽत्र प्रेमातिशयपूर्वकमनुष्ठितसहवासादिकं
खिल निरस्य यत्र कुत्रापि निर्यातुमुद्यते निष्ठुरे कामुके गति
दयमर्मच्छिद्वियोगागमहिष्णुतया तदीयनिर्गमनव्यवसायाद् भीत-
ताया प्राणसमानप्रणयैकमनस्काया. स्त्रीजातिललामभूताया
सौजन्यनिधे प्रणयिन्याः माध्यमकातर्यदैन्यातिरेकः सुष्ठु
तितदनरस्मपादे न पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभ
त्यनेन हृदिस्पृशा सहृदयजनाश्रुत्पीडजनकेन प्रदृष्टवाक्येन
न्या स्वाभिप्राणाधिकः दयिते दयितेऽजस्रमनवद्यस्नेहपानोऽभिव्यक्त

इत्यवगम्यतेऽत्र च 'उत्कण्ठयति मेघानां माला वर्गं कलापिनाम्, यूनां चोत्कण्ठयत्यद्य मानसं मकरध्वजः' इत्युदाहरणवदनेकेषां क्रियापदानामावृत्तिगुम्फनया निष्पादितेन दीपकालङ्कारेण निषेधात्मकेन चाक्षेपालङ्कारेण विप्रलम्भशृङ्गाराम्बुसंसिक्तं शार्दूलविक्रीडितवृत्तान्वितं पद्यमिदं कृतार्थीक्रियत इति समर्थयद्भिरस्माभिः पुनर्विचार्यते यन्मनुष्यलोकललामभूतानां स्त्रीरत्नानां स्नेहः खलु समस्तेभ्यो जीवितादिभ्यः पदार्थेभ्योऽतिरिच्यत इति ।

> तप्ते महाविरहवह्निशिखावलीभि-
> रापाण्डुरस्तनतटे हृदये प्रियायाः ।
> मन्मार्गवीक्षणनिवेशितदीनदृष्टे-
> र्नूनं छमच्छमिति बाष्पकणाः पतन्ति ॥ ८४ ॥

हन्त दुर्निवारमानसिकव्यथामर्दीमृद्यमानमालतीपुष्पाधिककोमलतनुलता जीवितदयिते मयि दृष्टिश्रवणगोचरातीतेऽजस्रनिपतदश्रुनिर्झरोन्द्रम्लपितभुजान्तराला मदीयाभावजनितयातनारोहितास्पदग्दह्यमाननिर्वन्नहृदया मिमया निर्विनोदान्यतिमात्रगुरूणि संवत्सरसहस्रायमाणानि दिवसान्येतानि वातायनपीठेषु दीर्घदीर्घनिश्वासेषु [illegible] निर्दयेन निरनुरागेण भर्तृरीत्या मया विनाकृता मा मे [illegible] [illegible] जीवितं दुस्सहतापनामयमरन्तुन्तायमानं [illegible] [illegible] मेऽपि वियोगेऽपि मर्मच्छिद्वरं सुरभिमाननिर्विकारप्रेमा कृपोदयं [illegible] गुणनिधिः कदाचन प्रवासी तस्या दुर्निवारहतानायकमकस्मात् विलंबन् मदेव निष्पादिति दर्शनेन मार्गेण महीप्रसादनूनं भर्तारमिन्दनीति मननि विषाद मदीयागमनमार्गनिरीक्षणानुरागनीपदृष्टीन्दीवराया. प्रियतमाया

महाविप्रयोगहुतभुग्ज्वालापरम्पराभिर्निरन्तरं सुतरां सतप्ते भस्मवद्विपाण्डुरवक्षोरुहकुम्भयुगशालिनि हृदयेऽविच्छिन्नविसरा नयनसलिलबिन्दवो झल्ज्झलाशब्दपूर्वं जर्जरिता नून विगलन्तीति। अत्र हि प्रथमपादे विरह एव वह्निरिति तादात्म्यद्योतनस्तद्रूपवम-भेदो य उपमानोपमेययोरिति काव्यप्रकाशकारनिर्णीतलक्षणसंवादी रूपकालङ्कारो वसन्ततिलकावृत्तशोभिनि श्लोके प्रवासविप्रलम्भस्या-तिदुस्सहत्व विशेषेण व्यनक्ति।

> चिन्तामोहविनिश्चलेन मनसा मौनेन पादानत·
>
> प्रत्याख्यानपराङ्मुख· प्रियतमो गन्तुं प्रवृत्तोऽधुना।
>
> सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैरीक्षणै·
>
> श्वासोत्कम्पिकुचं निरीक्ष्य सुचिरं जीवाशया वारित· ॥८५॥

प्रासङ्गिके कोऽपि कलहावसरे कृतप्रणयस्खलित प्रियतमो मदीयापराधेन सञ्जातरोषा दुर्भेद्यमानग्रहिला[illegible]भित्तिस्तरङ्गित-स्फुरितरसनाभीरुत्वाय स [illegible] प्रणिपातेन प्रसन्ना भविष्यति न वेति दुर्निवारेण चिन्ताभरेण [illegible] मौनेन च [illegible] निश्चलेन चेतसा [illegible] मर्यादा निष्प्रयोजनतामनुभावयन् तस्या [illegible] प्रणिपतितो [illegible] प्रसादेन [illegible] पादप्रणिपातात्मकस्यानु-नयस्य प्रत्याख्यानस्यापि [illegible] यथा सं [illegible] [illegible] [illegible]

र्व्रीक्षणैर्दीर्घकालमवलोकयन्तो प्रचुरनिश्वासोद्गमवेपमानस्तनकुम्भं निर्गमनान्निवारित इति विरहासहिष्णुतया प्राणादिधारयिषया च दूरीकृतमानाया मनस्विन्याश्चेतोवृत्तिं श्रमति कान्तेकतानमनस्का-यत्नाजनमनोविहारविश्रम्भविवरेण्य कोपनिषेधनिर्गमननिवा-रणारम्भसंपादितेऽपि रसगुणमण्डितेऽचिरभाविसंभोगपर्यवसायिविप्रलम्भ-शृङ्गाररसवाहिनि परिगृहीतशार्दूलविक्रीडितवृत्ते प्रशस्तश्लोकेऽत्र ।

म्लानं पाण्डु कृशं वियोगविधुरं लम्बालकं सालसं
भूयस्तत्क्षणजातकान्ति रभसप्राप्ते मयि प्रोषिते ।
साटोपं रतिकेलिकालसरसं रम्यं किमप्यादरा-
द्यत्पीतं सुतनोर्मया वदनकं वक्तु न तत्पार्यते ॥८६॥

परिसमाप्तजनपदान्तरप्रवासेन सुचिरादभिजगृहागतेन बहु-दिवसावधिविरहानलदग्धप्रायप्रियजायासंयोजनातिप्रमुदितेन सो(रा)सामृतसारायमाणनवीनाधरमधुपानपुलकितवपुषा प्रोषित-चरेण येनचिरजना निर्भरौत्सुक्यभूयिष्ठेन निर्वाच्यमदनशतेन पुनःप्रियया प्रेमास्वाद्यमानयानवद्यपानिग्रत्यनतरपरया दीर्घीभूते विप्रयोगसमयेऽपि न कर्हिचिद्विस्मृतया रतिमदनदर्पभावविता-राममाणया सौन्दर्यमय्या सौहार्दप्रायया प्रियतमया यथाहृदयतृप्ति गृहागमनानन्तरमेव निर्विष्टा रामणीयकी मान्मथलीला विवक्षता [illegible]तार्थाभिगाय समर्थनिसृष्टे प्रीतिपूर्वं स्मराननेन व्याहियते [illegible]न ग्रथितस्मृतियोजना कुसुमभिवागतेन हृदयतपेन [illegible] मानगिरा सुपया प्राग्मननोहारप्रच्छादिन-[illegible] सुरसनाम्येन परिम्लेषेन च दाम दुर्विषहेण [illegible] वेदप्रणायनविधिपरिहारेण विरम्भवत्काय-

विस्मृताया स्वस्त्रीजाते स्मरणप्रतिलाभे सुतरा व्रीडितया कामिन्या स्त्रीलिङ्गसमुपेत निजदेह सम्यगभिज्ञाय मधुरमधुरसुरतपर्यवसाने सरभस पुरुषायमाणया पूर्वं पुरुषभाव पश्चात् स्त्रीभूत प्रियतमो विपरीतनिधुवनविधे परिसमाप्तत्वाद् व्यमोचीति विशिष्टरचिकरेण रोमहर्षणेन विपरीतसुरतप्रकारेणापि हृद्यतरनानाविधरतिबन्धव्यतिकरवार्त्ताशुश्रूषूणा विचिद्दलुंलिताना रसिकाना मनासि प्रीणयितु श्राव्यमपि प्रेक्षणीय प्रेक्षणकमिवोपलक्षितमेतन्मनोरम पद्य प्रदर्शयति शृगाररसनिष्णाततरमिकाग्रेसरोऽमर । अत्र खलु ' विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्या परित स्फुरन्त्या । रत्नै पुनर्यत्र रुचा रुच स्वामानिन्यिरे वशस्रीरनीलं ॥' इत्युदाहृतिवन्निधुवनविधौ प्रगल्भया नायिकया स्त्रीभाव त्यक्त्वा पुन स्त्रीभाव प्राप्त इति हेतो पुन स्वगुणसप्राप्ति पूर्वरूपमुदाहृतमित्यलकारचन्द्रिकानिर्णीतलक्षणमवादिनातिशयोक्तिगर्भितेन पूर्वरूपालकारेणातिशयसभोगरसप्रवाही शार्दूलविक्रीडितवृत्तानुवर्ती श्लोकोऽस्य विभूष्यते ।

करकिसलय धूत्वा धूत्वा विमार्गति वाससी
क्षिपति सुमनोमालाशेष प्रदीपशिखा प्रति ।
स्थगयति मुहु पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या तन्वी मुहुर्मुहुरीक्षते ॥ ८८ ॥

बुद्बुदस्वन्दशजनस्वरे नि सारे जीवलोके पीयूषसारायमाणस्यातिर्निरम्यानिर्वचनीयस्वादस्य सुरतस्य पर्यवसाने कमनीयाकृतिर्वरवर्णिनी नि सीममन्मथमग्रामविमर्दनस्नीकृतत्वाश्रिभंगव्रीडाव्याकुलगतीलम्बो विगलित परिधानयुगल हस्ताभिमर्श्य चारयित्वा

चारयित्वा गवेषयति तत आत्मनो दिगम्बरभावेन लज्जितत्वाद् भास्वत्प्रदीपनिर्वापणार्थं महाकदर्पमांपरायिकसंक्षोभविस्रस्तावशिष्टं सुमनोदामच्छेदं प्रदीपज्वालाभिमुखे प्रक्षिपति नग्नां मां कथं नाम सावधान निध्यायसि हे दुर्विनीतेति स्मित्वाभीक्ष्णं स्वदिगम्बर-भावदिदृक्षातृपितस्य भर्तुर्दृष्टी निमीलयति मनोविमोहननिधुवनद्र-वीभूतत्वाच्च सान्द्रस्नेहपूर्वकं प्रियतम पौन.पुन्येनावलोकयतीति वरारोहाया. संभोगान्ते मनोहरो विभ्रम. सरसमुपवर्ण्यते लोकोत्तर-शृङ्गारिकविवरेण्येन ।

मनोद्रावके सुरतविधौ व्यपेतसमस्तत्रपायाः सुरतावसाने स्वनग्नभावेन पुनः संजातसहजलज्जायाः पीनस्तन्या. कामिन्या स्वाभाविकविलासद्योतनसमुत्थेन जात्यलंकारेण मञ्जुलमवतंसित परिपूर्णसंभोगशृङ्गाररसनिष्यन्दो हरिणीवृत्तसंदानितचरणश्चाभी सुरसः श्लोक एष महाकविना कालिदासेन सुरतारम्भे 'नीवी-बन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां क्षौमं रागादनिभृतकरे-ष्वाक्षिपत्सु प्रियेषु, अर्चिस्तुङ्गानाभिमुखमपि प्राप्य रत्नप्रदीपान् ह्रीमूढाना भवति विफलप्रेरणा चूर्णमुष्टिः ' इति विरचित मेघदूत-काव्यान्तर्गत पद्य स्मारयति ।

> सन्त्येवात्र गृहे गृहे युवतयस्ताः पृच्छ गत्वाधुना
> प्रेयांसः प्रणमन्ति किं तव पुनर्दासो यथा वर्तते ।
> आत्मद्रोहिणि दुर्जनैः प्रलपितं कर्णेऽनिशं मा कृथा-
> श्छिन्नस्नेहरसा भवन्ति पुरुषा दुःखानुवर्त्याः पुनः ॥ ८९ ॥

रतिलम्पटेनोच्छृङ्खलशीलेन दयितेन स्वच्छन्दं निर्वर्तितस्यान्याङ्ग-नासङ्गमरूपस्य दुश्चरितस्याकर्णनेनातिशयरोषितामाराधनाय सविनयं पादयोः कृतदण्डप्रणाममपि तं निराकृत्याजस्रमीर्ष्यमाना-

भिनिविष्टां दुराराध्या दुराक्रमक्रोधात्मकदुर्गाश्रितत्वाद् दुर्धर्षां मनस्विनीममर्षाग्रह परित्याजयितुं सनिन्दमुपदिशति व्यलीककोविदेन कैतवनिरतेन तेन प्रकृतधूर्तेन मदर्थे त्वमेवमेव कुर्विति सम्यग्ग्राहित-शिक्षा तत्सखी प्राहेह जनपदे प्रतिगेह बह्व्यो योषितो बोभुवति संप्रति शीघ्रं गत्वा तास्ता पर्यनुयुङ्क्ष्व कि समाराधनार्थं प्रियतमा युष्मभ्य प्रणति तथा कुर्वन्तीति यथा ते प्रेयान् तु दासवत् प्रणामं कुर्वन् सविनयमनुवर्तते, तद्वे अविचारे ! हे आत्मद्रोहिणि ! द्विजिह्वैः पिशुनकर्णेजपैः परसुखविद्वेषिभिर्जल्पित मृषावाद सतत कर्णे मा स्म कार्षीः, यदि तादृश वितथ परस्परानुरक्तयोर्युवयोर्भेदकरं प्रलपितमेकस्मिन्श्रवणे यदृच्छयापि प्रवेश कुर्वीत तर्ह्यपरस्माच्छ्र-वणाज्झटिति तदपसारय, न कर्हिचिदपि तादृश हृदये कर्तव्यं यथा व्यपेतप्रेमभावा. पुरुषाः पुनर्दुष्प्रापा अनुनेतुमप्यशक्या भवन्ति हीति । अनात्मद्रोहिणीति सबोधनशब्देन दुर्जनप्रलपितं श्रुत्वा संजातमन्युस्त्वं मान न परित्यजेश्चेत् तर्ह्यामरण भर्त्रा विनाकृता जीवन्मृता स्या नूनमिति सूच्यते पुन पूर्वार्धेन भर्ता सर्वश्रेष्ठस्त्वयि भृशं स्निह्यति तस्माद्वेनो स्वप्नेऽपि त मा त्याक्षीरिति द्योत्यत इत्येवप्रकारेणात्मद्रोहकर मानाग्रह जहीहीति विवक्षितस्य निषेधेन मानस्य प्रतिषिद्धत्वादाक्षेपालङ्कार इर्ष्यामानजनितविप्रलम्भावबोधके शार्दूलविक्रीडितवृत्तभुजि मुक्तकेऽस्मिन् प्रादुर्भवति ।

निःश्वासा वदन दहन्ति हृदयं निर्मूलमुन्मथ्यते
निद्रा नैति न दृश्यते प्रियमुख नक्तंदिनं रुद्यते ।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तदोपेक्षितः
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥ ९० ॥

यतः प्रणयकलहकुपिता निर्विचारा मामाराद्धं सस्नेहं चरणप्रणिपतितः प्राणदयितो यौष्माकीणविदग्धोपदेशपारवश्यादज्ञानेन तदा मयावधीरितस्ततो दुर्धरान्तःसंतापानलक्वथिता अत्युष्णा निश्वासा ममाननं दन्दह्यन्ते मालतीपुष्पाधिकमृदुनिर्बलं कान्तविरहितत्वान्निरालम्बं मे हृदयकमसह्यव्यथामन्थदण्डेनामूलादुन्माम्यतेऽविच्छिन्नाधिमरीमृद्यमानाया मे निद्रा नागच्छति ममासुधारणीभूतस्य मदीयसर्वस्वस्य प्रियतमस्य जीवातुकल्पो वदनेन्दुर्न भूयो दृष्टिगोचरे निपतति दुर्भरविश्लेषनिर्वेदजलनिधिनिमग्नया निरन्तरोदश्रुनेत्रया मयाजस्रमजस्रं रात्रिंदिवा रोरुद्यते ललाटंतपैर्निदाघमिहिरकिरणैः शुष्कता गता दुर्बलालतेव हृदयपचनैरकयातनायमानैर्मानसिकसंज्वरैर्भृशसंतातप्यमाना मे गात्रवल्लरी शोशुष्यते च, हे दुर्विदग्धाः सख्य.! कथयत किंरूपं फलं लक्षीकृत्य मुग्धा वयं युष्माभिरतिप्रगल्भाभिः प्रसह्य खल्वेवंविधापद्धेतुक कृत्रिममर्षं ग्राहिता इति निर्विमर्शाभिः सहचरीभिरुपदिष्टेनाकिंचित्करेणापि महानर्थजनकेन मानेन तदा लीलाकलहप्रसंङ्गेऽनुनिनीषु वल्लभं सावहेलमनादृत्य चरमं तेन विनाकृता निष्प्रयोजनपश्चात्तापग्रस्ता काचिदतिमुग्धा तरुणी ताः सकरुणमुपालभमुपालभ पर्यनुयुङ्क्ते । 'भक्ष्याशयाऽहिमञ्जूषा दृष्ट्वाखुस्तेन भक्षितः' इतिनिदर्शनवदनापि प्रणयकलिविषयकं माननिर्बन्धं मुव्यक्तमेव समीहितार्थप्रेप्सया स्वकामिनेऽभिव्यज्य मौर्ख्यविभूषणा सा कलहान्तरिता न केवलमभीष्टार्थविध्वंसं किन्तु विरहात्मकमनर्थमपि दैवयोगात् प्रापदिति हेतोर्विषमालंकारो दुर्विषहविप्रलम्भविषादातिरेकद्योतकः शार्दूलविक्रीडितवृत्तसमन्वितमिदं मुक्तकं प्रस्तुतकामिन्या अतिमौग्ध्यजनितवियोगरूपापत्तिप्रख्यापनेन विशेषयति ।

अद्यारभ्य यदि प्रिये पुनरहं मानस्य वान्यस्य वा
गृह्णीया शठदुर्नयेन मनसा नामापि सक्षेपत. ।
तत्तेनैव विना शशाङ्कधवला. स्पष्टाट्टहासा निशा
एको वा दिवसः पयोदमलिनो यायान्मम प्रावृषि ॥९१॥

पूर्वं विहितप्रणयापराध प्रेयास तत्कालपरिस्फुटितनिर्मर्यादक्रोधवशा-न्निरस्य निरन्तरानुभूतदुर्वहानुशयातिभारा दुस्सहपीडामयविरहस-तापपेपीड्यमाना सत कथचित् क्वचित प्रयत्नशतेन सौभाग्योद-यसाहाय्येन च प्रतिलब्धतत्समागमप्रमोदोद्रेका सनिर्वेदनिर्विष्टपूर्व हृच्छूलायित विप्रयोगदौर्भाग्य स्मार स्मार काचिन्मनस्विनी नरककुण्डसदृशकान्तविश्लेषहेतुक मान त प्रति कर्हिचिदपि पुनर्न करिष्यामीति शपथपूर्व व्यवस्यति यदद्यप्रभृति हृदयमर्मवेधिविरहो-त्पादकस्येर्ष्याकोपस्य वा तत्समानस्यापरस्य वा केवल नामधेयमपि सक्षेपेण प्रियतमस्यापराध दोषारोपक्रेण दुष्टेन चेतसा समुद्दिश्य स्वप्नेऽपि पुनरहमुच्चारयेय चेत्तर्हि तेन हृदयवल्लभेन विनैव निश्चितप्राणपरित्यागाया मम कुमुदबान्धवधवलिता शारदीयकौमुदीजालोच्चैर्हासशुभ्रा अतिहृद्यरागोद्दीपिका सुरत-क्षणदा विभावर्यो व्यतीयुरेका वा श्यामश्यामजलमुगावलिमलीमस-दुर्दिनायमानोऽतिमानात्कण्ठाजनक प्रावृषेण्यवासरोऽतियायादिति ।

नन्वत्रोत्तरार्धेन विरहिजनस्य कृते शरच्चन्द्रमाट्टहासधवलाना निशीथिनीना वा प्रावृट्कालीनस्य वा दिवसस्यात्यन्तदुर्विषहता द्योत्यते पुनश्चात्र निर्विचारमानजनितो विरह समुत्पद्येत चेदव-श्यमेव मरण मे भविष्यतीति तस्या अभिप्रायोऽपि स्पष्टमवगम्यते विन्यास मानजविप्रलम्भानन्तरोत्पन्नसभोगशृगारवासिनि शार्दूल-विक्रीडितवृत्तयुजि पद्ये विरहिणीहृदयच्छिदो विरहादपि वर

मृत्युरिति मनसि कृत्वा मानं न करिष्य इति तथा व्यवसितत्वज्जा-त्यलंकारो जायते ।

इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथ किं
गमिष्यामो यामो भवतु गमनेनाथ भवतु ।
पुरा येनैवं मे चिरमनुसृताः चित्तपदवी
स एवन्यो जातः सखि परिचिताः कस्य पुरुषाः ॥ १२ ॥

हे प्रियतम ! वस्त्वेतच्छ्यामरुचि, वाढ प्रियतमे ! श्यामं भवति, प्रियतम ! नन्विद धवलम्, अथ किं प्रियतमे ! धवलं भवति, दयित ! बहिर्यास्यामः, दयिते ! तथा कुर्मः, हे वल्लभ ! गमनं मास्तु, यदि गमने नाभिलाषस्तव वल्लभे ! गमनेन किं कार्यम्, प्राणनाथ ! तिष्ठामोऽत्रैव, जीवितदयिते ! तथा कुर्मः, हे प्रेयन् ! सुषुप्साम्यधुना, अयि प्रेयसि ! स्वपिम इत्येवं वर्धमानमान्मथरसा-कृष्टत्वात् गुरुगुणभारावर्जितमधुनिपातेन मधुपेनेव येन प्रेयसा मम चित्तवृत्तिनिर्विकारेण मनसा पूर्वं दीर्घकालमनुसृता सोऽयं परकीय इव सम्प्रति सञ्जातो हे अविज्ञातपुरुषमनस्के सुभगे सखि ! यस्य कस्य परिचिता पुरुषा न कस्यापि, वस्तुतो विरागानर्हा नरा अनेकस्त्रीसम्भोगलम्पटाश्चे पुरुषान् पुरुषमनुवर्तमाना [illegible] [illegible] इव [illegible] पुनरागमनुगेमी- [illegible] इति [illegible]

कीटेषु मानेन किं कार्यमत एव त्वमपि लौल्यदौर्मनस्यभूयिष्ठ नरस्वभाव ज्ञात्वापराधिनि भर्तरि मान परिहृत्य केवल-मौदासीन्येन स्वस्थेन च मनसास्स्वेति वक्त्र्या लोललोलचेतसा पुरुषाणा स्वभाववर्णनात् स्वभावोक्त्यलङ्कार प्रादुर्भवति ।

चरणपतन सख्यालापा मनोहरचाटव.
कृशतरतनोर्गाढाश्लेषो हठात्परिचुम्बनम् ।
इति हि चपलो मानारम्भस्तथापि हि नोत्सहे
हृदयदयित. कान्त काम किमत्र करोम्यहम् ॥ ९३ ॥

अनुष्ठितप्रणयापराधत्वान्मा सिसान्त्वयिषुणा प्रेयसा सानुशय विहित पादप्रणिपातः, केवल त्वयि सुतरामनुरक्तत्वाद् यदृच्छया निर्विचार कृतेन प्रणयस्खलितेन साम्प्रतमनुभूयमानदुर्भरविप्रतीसार-मित्यात त्वच्चरणयो प्रणिपतित कान्त क्षमस्वेति सव्रीडा प्रार्थ-नायचासि, मा प्रसादयितु तेन समुच्चारिता हृदिस्पृशोऽतिरम्या प्रियोक्तय, दुर्निवारसतापविलसितस्य मामकस्य निर्बलशरीरस्य नीरन्ध्रालिङ्गनम्, सान्द्रप्रेमोद्रेकद्योतनाय प्रसभ तेन विहित परिचुम्बनमिति हि चञ्चल क्षणभङ्गुरो मानप्रक्रमा बहुफलो भवति तथापि क्षणनश्वरमपि बहुफलान्वितमपि मनिर्बन्धप्रणय-कोपकरणे शक्तिरहिताह मानारम्भ पुन कर्तु न प्रोत्सहे, यस्मान्मे प्रेयान् प्रकाम हृदयवल्लभो वरीवर्तीत्यनूने किं करोमि शाधि मामिति प्राग् वयस्यया मानप्रकाशननिपयमुद्दिश्य यथावसर शास्त्रशिक्षापि मौग्ध्यातिशयेनात्यन्तमरलस्वभावनान्वितया वात. पर विवर्तव्यतामूढचेता काचित्तरुणी पुनरुपदेशलिप्सया निगदतो-तीर्ष्यामर्षमूलकविप्रलम्भशृङ्गारद्योतके हरिणीवृत्तमण्डितचरणेऽत्र सुकनो चपलो मानारम्भस्तथापि हि नोत्सहे हृदयदयित कान्त

इत्यादिना हेतुमता सार्धं हेतोर्हरिणलोचनया वर्णितत्वाद्धेत्व-लंकारः । ननु चापल्यनिरतेऽपि भर्तरि सुदृढबद्धस्नेहरज्जुः पति-प्राणा का कोपपुरस्सरप्रणयकलहजमचिरनश्वरमपि विरहशोकं निर्वेष्टुमुत्सहेत ?

> तन्वङ्गया गुरुसन्निधौ नयनयोर्यद्वारि संस्तम्भितं
> तेनान्तर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः ।
> मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
> श्वासायाससमाकुलालिसरणिव्याजेन धूमावली ॥ ९४ ॥

बहुतिथकालावधिकप्राणदयितभर्तृविश्लेषवैश्वानरशिखावली-लेलिह्यमानहृदयकूपाया दुर्विनयचापल्यशङ्कया बहुमतगुरुजन-सान्निध्ये दुस्सहवेदनाजनकविरहसंतापोद्भिद्यमानमपि बाष्पोत्पीडं कृच्छ्रादन्तर्निरुद्धवत्या अकाण्डनोद्यमनेनेवाकस्मिकभर्तृवियोगवज्र-पातेनातिशयदुष्टरनिर्वेदसागरे निपातितायाः कस्याश्चित् प्रोषित-भर्तृकाया दुरवस्थामुपविवर्णयिषुणा सदयहृदयेन कविवरेण्येन सखेदमत्र व्याह्रियते यत् कान्तविप्रयोगपरिक्लेशक्षामक्षामगात्रया वध्वा श्वश्रूश्वशुरप्रमुखानां सभाजनार्हाणां गुरूणां समक्षमश्रुमोच-नस्यायुक्तत्वाद् यो लोचनयोरुद्भिद्यमानोऽश्रुप्रवाहो हृदये बला-त्कारेण प्रतिरुद्धस्तेनैवाभ्यन्तरे प्रसह्य प्रत्यावर्तितेनाश्रुप्रवाहेणासह्य-पीडविरहसम्भवो मनोभूजातवेदाः समुक्षितस्ततो मन्दीभूतशिखस्य तस्य जातवेदस एषा धूमलता तस्या वदनसौगन्ध्याकृष्टानां चिन्तु-संतापगतप्रत्युत्पन्ननिःश्वासमारुतानां चञ्चरीकाणां परम्पराव्यपदेशेन तन्मुखद्वारा निःसृतेति ।

यत्त्विह मन्मथशिखिनो धूमावलीरूपेऽग्निकरणेः सम्भावित-त्वात् 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत्' इति काव्यप्रकाश-

निर्णीतलक्षणोपेतोऽतिशयोक्तिगर्भो मन्मथशिखिशब्दद्योतितम्नका-नुसृत उत्प्रेक्षालंकार प्रवासविप्रलम्भशृङ्गारमृदितवधूबाष्पोत्पीड-ससिक्ते शार्दूलविक्रीडितवृत्तनिग्रमितपादे मुक्तकरत्न विरहिण्या-दुर्वहमानसिकव्यथातिशय निरूपणास्मस्य शा स्त्रारि र्विनिमग्न-विरहिमिथुनदयालुम्या निवेदयन् भासते ।

> भ्रूभेदो गुणितश्चिर नयनयोरभ्यस्तमामीलन
> रोद्धु शिक्षितमादरेण हसित मौनेऽभियोग कृत ।
> धैर्यं कर्तुमपि स्थिरीकृतमिद चेत कथचिन्मया
> बद्धो मानपरिग्रहे परिकर सिद्धिस्तु दैवे स्थिता ॥ ९५ ॥

मान्मथलीलाकलहप्रसङ्गेऽपराधिन परिणतार लक्षीकृत्य प्रपञ्चयति बद्धपरिकरया मया ममस्तमानोपस्करनिकुरम्बमुररी-कृत्य पीन पुन्येन यथातदुपदेश दर्पणमेकमग्र सस्थाप्य सम्यक्परि-शीलित तथापि निर्विघ्नमाननिर्वाहण तु दैवायत्त भविष्यतीति ससदेह काचित् मौग्ध्यनिधिर्नववधू प्रणयमर्मस्वाभिज्ञा सखीमीर्ष्या-मर्षप्रपञ्चनशविदा सर्वाभ्योपितनदर्पचिन्नामचष्टितनिष्णाता मानोपदेशिनीमभिभापते यद् विजन हम्र्यप्रतमधुरया मया सुचिर तरङ्गितम्रुकुटीरचना समाम्नाता दृष्टया मकभङ्गदग्नशाचन-मभीक्ष्ण परिचित भर्तृबहुमानन नून उनिष्यमाणा स्मिति प्रयत्नतो निषेधितु मयाम्यम्तमप्रमादव्यञ्जकं मूकभावेऽभिनिवेशाऽनुष्ठितो धृतिगम्पादनायदमपि मानर मनो मया कथमपि स्थैर्यं प्रापितमित्य-सौष्ठर्यमानप्रपञ्चम्वीकार सुदृढ मया पश्या बद्धा किन्तु प्रणय-मानस्य मफलनिर्वर्तन नियतिपराधीनमिति ।

परमार्थतोऽत्र स्वभावसुकुमारया प्रणयिपाणिग्रहैकतानप्रेम-गर्भनर्मासिरसहृदयया मुग्धया नवा ढ ढतिनम्रुकुटिविरचनादिके

मदनकोपोपयोग्युपकरणसामग्र्येऽविच्छि[illegible] कृतेऽपि स्वप्राणनाथसनिधौ प्रवलेन स्वाभाविकेन प्रेम्णा ननु विजित्य धृतकवोपः कादिशीको भूत्वा कुत्रापि सहसापसरेदिति सशय ससूच्यतेऽत्र चान्तिमपादे वद्धो मानपरिग्रहे परिकर. सिद्धिस्तु दैवे स्थितेति सभावनाविशेषविवक्षया सप्रयत्नसमाम्नातोऽपि मानो न खलु सफलीभविष्यतीति विभाविपितस्य निषिद्धत्वादाविर्भूत आक्षेपालकार शार्दूलविक्रीडितवृत्तेन साक शोशुभ्यते।

अहं तेनाहूता किमपि कथयामीति विजने
समीपे चासीना सरसहृदयत्वादवहिता।
ततः कर्णोपान्ते किमपि वदताघ्राय वदनं
गृहीता धम्मिल्ले सखि स च मया गाढमधरे ॥ ९६ ॥

दुर्निवाररिरसाभिभूतत्वात् सुरतलम्पटेन कामुकेन यथारुचि वञ्चिता काचित् पुश्चली कस्मिश्चिन्निर्जने स्थाने तेन सहोपाशूप-सभुक्तामनङ्गक्रीडा सहर्षं विवृण्वन्ती विश्वासपात्रीभूता स्ववयस्या ब्रूते हे सहचरि ! विविक्ते स्थाने रहसि किंचिद्विस्रब्ध ते कथयिष्यामीति विदग्धन तेन धूर्तेनोपनिमन्त्रिताह तद्दर्शनोत्सुक्यसमाकुल-प्रेमरसार्द्रहृदयतया त ममया परिगृहीतासना कि वदिष्यत्ययमिति तद्वचनशुश्रूषया सावधाना तदानीमभूव ततो मत्परिचुम्बन-तृष्णया न त्वभिधित्सया श्रवणान्तिके सव्याज किंचिद् व्याहरता तेन दुर्ललितेन कितवेन मुखमाघ्राय सुमनोदामभूषणसयते केशपाशे गृहीता, स च निधुवनमहात्म्यप्रस्तावोत्सुकया मयापि सुरङ्गेऽधर-पुटे गृहीत समन्ताच्चुम्बितस्तदनन्तरं प्रज्वलितरागानलाभ्यामावाभ्यामनिर्वचनीयो मन्मथमहामहो यथेच्छमनुभूत इति।

कामिनीसम्भोगलोलुपावशात् किमपि कथयामीति व्यपदेशेन तामतिसधाय कामिना तेन स्वरिरसा साफल्यमनायीति हेतोर्युक्तिनामकेनालकारेण सुस्वादुसभोगशृङ्गाररसप्रवाही स्वीकृतशिखरिणीवृत्तादेशकल्पितपाद श्लोक एष सभोगरसतृष्णालूना रसिकाना मुदे सुष्ठु समलङ्क्रियत इत्यत्र न कोऽपि मेऽतिशयोक्तिगन्ध ।

देशैरन्तरिता शतैश्च सरितामुर्वीभृता काननै-
र्यत्नेनापि न याति लोचनपथ कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुध प्रोन्मृज्य सास्रे दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन् पुनर्वीक्षते ॥ ९७ ॥

अत्यन्तविप्रकृष्ट—देशान्तरे सविषाद वसति कुर्वतः समस्तबान्धवसुहृज्जनविरहितत्वान्निर्बन्धो प्रतिक्षणोपबृहत्कान्तासमागमौत्सुक्यातिरेकाध्मातान्तरङ्गस्यापि दुर्गमजनपदशतव्यवहितत्वेन दृष्टिश्रवणविषयसुदूरातिक्रान्ताया निष्ठुरतुषारमृदिताया पद्मिन्या इव निष्करुणविरहातुराया निर्बलाभा हृदयदयिताया सुचिराभिलषितकुशलवार्तावर्णनेऽप्यतिकचिरपीयूषसारायमाणदर्शनेऽपि निराशस्य निर्विण्णमनसोऽजस्रोद्भिद्यमानबाष्पोत्पीडदुर्दिनायमानाननस्यानल्पाध्वप्रयासस्यास्याध्वनीनस्य दुर्भरविषादोत्कण्ठाप्रतिवरकीलितदुरवस्थोपवर्णयिषया गाढानुरक्तदयिताविप्रयोगव्यथामरीमृद्यमानवागिमार्थमन्वु पुण्यश्लोकोऽमर सदयमभिदधाति यद् दुरास्पदैरनेकैर्विभिन्नैर्जनपदैश्च दुस्तराणा तरङ्गिणीना दुराक्रमाणा भूभृता शतैश्च दुरतिक्रमाभिर्गहनाटवीभिश्च व्यवहिता प्रियजाया प्रयत्नशतेनाप्यात्मनो दृष्टिगोचर नायातीति विद्वानपि तद्दिदृक्षातिशयपारवश्यात् कन्धरामुद्धृत्योच्छ्रितो भवितु पादाग्रेण भूमि निरुध्य वियोगशोकाश्रुसिक्ते नयने हस्तेन मृष्ट्वा तयापि

तद्विषयकं किमपि किमपि विचारयन्नध्वगस्तामेव तस्याः सङ्गमाशासमन्वितामाशां भूयो भूयोऽवलोकयतितराम् ।

ननु विरहे समधिकतरं वृद्धिं गच्छति प्रेमानुकूलस्य पथिकसार्थस्य प्रेमभाव इति निगूढाशयद्योतकं दुस्सहप्रवासविप्रलम्भपीडाविमृदितपान्थनिर्भरौत्सुक्यख्यापकं शार्दूलविक्रीडितवृत्तादेशसज्जीकृतचरणचतुष्टयं विरहिजनानुरागोद्रेकार्द्रीकृतकाव्यरसिकसमूहं प्रकृष्टमुक्तकमिदं विभूषयति कान्ताविरहितस्य तपस्विनोऽतिमृदुलस्वभावाभिव्यञ्जकः स्वभावोक्तिर्नामालङ्कारः ।

वस्तुतो दुर्गमानपि सकाननपर्वतनदान् बहून् विदेशान् कथमपि भार्यासिजिगमिषया समुल्लङ्घ्यमानः प्रज्वलितविश्लेषहुतभुग्दग्धकल्पोऽयं वराकः प्रवासविप्रलम्भजनितनिर्वेदक्षामक्षामाङ्गीं समागमोत्कलिकासहस्रविद्धहृदयपल्लवामुदश्रुनेत्रां तामचिरेण पुनर्दृष्ट्वा चिरकालानुपभुक्तत्वादुपचितस्नेहरसमधुरतरं संभोगसुखं तया सह यथातृप्ति निर्विश्यादिति प्रवासिन एकाकिनस्तस्य भृशं दयमानानामस्माकमाशा ।

> चक्षुःप्रीतिप्रसक्ते मनसि परिचये चिन्त्यमानाभ्युपाये
> रागे याते्ऽतिभूमिं विकसति सुतरां गोचरे दूतिकायाः ।
> आस्तां दूरेण तावत्सरभसदयितालिङ्गनानन्दलाभ-
> स्तद्गेहोपान्तरथ्याभ्रमणमपि परां निर्वृतिं संतनोति ॥९८॥

कदाचिद् यदृच्छया स्वदृष्टिपथे पतितां कमनीयवपुषं परकीयां विलासिनीं दृष्ट्वा सपदि समजातप्रथमचक्षूरागो निरङ्कुशमनसिजशरा-गुणनिपतितमानसो दुर्लभायास्तस्या अवाप्तिविषयकोपायचिन्तनव्याकुलः सन्निपुणा निजानुषङ्गानुगतं वर्णयन् विरहाग्निपात्रीभूतमानसमभिमानले सर्वे सर्वेति दुर्लभप्राप्तिमनसूचकाभिर्नायिन्दे

सति कथ नाम निर्भरप्रेमास्पदीभूता वरवर्णिनी ता लभेय कथकार वा दुष्प्रापायास्तस्या सस्तव प्राप्नुयामिति परिचयविषये निरन्तर विमृश्यमानविविधयोग्योपाये सति प्रेमभावे परा कोटिमधिरूढे सति तत्सङ्गमसपादनाय तादृग्विधव्यापृत्तिविशेषनिष्णाताया अघटित-स्त्रीपुरुषघटनाचतुराया दूत्या अधिकारविषये मदर्थेऽतिमात्र विलसति सति ससम्भ्रमप्रेयसीपरिरम्भणप्रहर्षप्रकर्षावाप्तिस्तावदधुना दूरतस्ति-ष्ठतु तदीयवेश्मनिकटवर्तिप्रतोलीपर्यटनमप्यत्युत्कृष्टा सतुष्टि जन-यति । एकानुरागातिशयाभिव्यञ्जकेऽत्र खलूत्तरार्धे यद्यपि नि सीम-स्नहभूमेस्तस्या वरारोहाया पीनस्तन्या परिचुम्बनालिङ्गनविधि परमानन्द नि सशय सजनयिष्यति तथापि निर्मर्यादरागोद्रेकवशा-द्विधीयमान तदीयसदनसमीपस्थराजमार्गपरिभ्रमणमप्यनिर्वचनीय प्रमोद मे सपादयतीति परकीयमत्तकाशिनीसभोगतृष्णान्धतामि-स्रनिमग्नमनसा चक्षूरागोद्रेकोन्मत्तप्रायेण कामुकेन व्याहृतत्वादति-शयोक्तिसज्ञकेनालकारेण स्रग्धरावृत्तविरचिताकृतिर्मैविप्यत्सभोग-शृङ्गारसूचकोऽय श्लोक परिभूष्यते।

कान्ते तल्पमुपागते विगलिता नीवी स्वय बन्धना-
द्वासो विश्लथमेखलागुणधृत किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि साप्रतमह तस्याङ्गसङ्गे पुन
कोऽय कास्मि रत नु वा कथमिति स्वल्पापि मे न स्मृति ॥९९॥

केन प्रकारेण त्व हृदयवल्लभेन साधं सुरतमहोत्सवमनुभव-सीति रम्यगोष्ठीप्रसङ्गे प्रियवयस्यया पर्यनुयुक्ता स्वायत्तभर्तृका काचिद् योषित् प्रतिवक्ति ह प्रियसहचरि ! निरुपमपीयूषसारा-यमाणमनिर्वचनीयमधुरिमविशेषानिह्नुयास्वाद मनोद्रावक निधुवन-विलसित यथेच्छ निर्वेष्टु मदीयसर्वस्वभूतेऽतिशयानुरक्ते भर्तरि

सर्वथातिरुचिकरानङ्गरङ्गानुरूपमुच्छृखलमान्मथसग्रामभूमिरूप विलासशयनीयकमारूढ सति वरस्पर्शमन्तरेणापि किंस्विच्चेतोमोहनकन्दर्पदर्पतन्मयसमर्दापेक्षयोताहोस्विन् निर्मर्यादरागोद्रेकसात्विकातिरेकेण ममाच्छादनाशुकस्य नीवी बन्धनादात्मनैव विस्रस्ता तदनन्तरमधोवसन शिथिल्तेिन काञ्चीदाम्ना निर्बल ध्रियमाण कान्तहस्तसपर्कलालसे पीवरे जघनस्थले दरावलम्बितमितीयन्मात्रमेवाहं केवल सप्रति स्मरामि, पुनर्हृदयद्रावके तस्य शरीरसस्पर्शे तु सर्वलोकचमत्कारिणा पुष्पधन्वना विमोहितसर्वाङ्गतया निर्वाच्यरतिसर्वस्वेन च सुतरा जडीकृतचैतन्यतया कोऽसौ का वाह कथभूतो वा निधुवनरस आस्वादित इ त स्मृतिगन्धोऽपि मे नास्तीति ।

अतिहृदयतृप्तिकरेणातिमात्ररोमहर्षणेन याथातथ्येन नि सारजीवलोकसारायमाणेन सर्वोत्तमामृतरसप्रायेन वर्णनशक्तिगोचरातीतेन सुरतेन रतेन माहजाड्यान्धकूपे नितम्बाशुकग्रन्थिविस्रसनसम कालमेवैकपदे निपातितैषा सर्वात्मना समूलोपसगृहीतसूक्ष्मतमभोग शृङ्गारामृतसारा वरवर्णिनी किरूप किमास्वाद कथभूत मनसिजयुद्ध कथकार स्वय समुपभुक्तमिति निर्वृत्तिप्रमोदातिशयमूलकेन स्मृति भ्रशेन वक्तुमपि न खलु शक्नोतितरामित्यत्रात्युल्बणसभोगशृंङ्गार प्रस्रवणस्नपितप्रमुदितरसिकनिवह स्वीकृतशार्दूलविक्रीडितवृत्तविरचितरम्याकृती प्रवृत्तश्लोक सुरतद्रवीभूतायास्तस्या वराराहाया कमनीयपीनस्तन्या स्वाभाविकचेष्टावर्णनोत्थो जात्यल्यारो निगूढमान्मथरहस्य प्रपञ्चयन्निव प्रतिभाति ।

अहो महदाश्चर्यमेतद यत् सुरससुरतशब्दमात्रश्रवणेनैव सजायते रोमहर्ष शरीरेषु वेपथुश्च हृदयेषु सर्वेषा तथाप्याशास्महे वास्तविक सुरत सर्वत्र सर्वदा च केवल न्यायमार्गस्थस्यैषु धर्माविरुद्धमेवास्तु ।

प्रासादे सा दिशि दिशि च सा पृष्ठत. सा पुर सा
पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य ।
हहो चेत प्रकृतिरपरा नास्ति मे कापि सा सा
सा सा सा सा जगति सकले कोऽयमद्वैतवाद ॥ १०० ॥

सर्वोत्तमप्रेमास्पदीभूतया कान्तया दैवदुर्विपाकवशाद्विश्लेपितत्वात् तद्दिदृक्षाभिभूतोऽद्वैतप्रेमभाववादीतस्तत सर्वत्र च परमात्मानमिव ता सभावनाया पश्यन स्वय निध्यायति यत्तस्या विश्लेपव्यथाविमृदितस्य मे तद्व्यतिरिक्ता कापि प्रकृतिरपरा न विद्यते यत सा प्रकृतिसदृशी मे कान्ता हर्म्येऽपि सा ककुभि ककुभि साम्रत सा च पृष्ठभागे सा पर्यङ्केऽपि सा मार्गे मार्गे सेहापि सा तत्रापि सा सर्वत्र सा सर्वस्मिन् भुवन च वोभवीति सा च मे मनसि सा मे समस्तेन्द्रियग्रामे सा मे चक्षुषि श्रवण वदने शरीरे च वरीवर्ति किं पुन सकलमपि जगत् तया सृष्टमिव तया व्याप्तमिव वितर्वयंत इत्यहो कोऽय प्रेमतन्मयोऽद्वैतवाद इति ।

इह खलु हृदयदयिताविरहानुशुक्षणिज्वालाजिह्वालेलिह्यमानान्त करणेन मुदृढावद्धानुरागैकतानमनसा वराकेण विरहिणा यूना परमार्थतोऽद्वैतो निर्द्वन्द्वोऽनुपाधिरनुपमय स्नहो दुर्विगाहात् स्वहृदयकूपाद्यथातत्त्व प्रादुर्भावित इति स्त्रीललामभूता सा विरहिण्यपि धन्या यामेवमेव निरुपमप्रेमपूर्व जीवितावस्थासु सर्वास्वपि निर्विकारेण मनसा सदैव बहुमन्यते, सा च नून सुकृतिनो या गाढानुरक्ते तस्मिन्नेवानुरक्ता भवति । पुनरत्र दुर्वहविप्रलम्भविषादमये मन्दाक्रान्तावृत्तभुजि मुक्तक ने योपित एकस्या एकस्येव युगपदनेकेषु स्थानेषु स्थितिवर्णनामनुत्थन 'एकात्मा युगपदवृत्तिरेकस्यानेकगोचरा' इति काव्यप्रकाशकारविमृष्टलक्षणोपेतेन विशेषालंकारेण

विशेषत कान्तावियोगशोककर्दथितस्य तपस्विनोऽतिविशिष्टः प्रेमभावोऽभिव्यज्यते । नन्वित्थकार कृत्स्ने जगति सर्वतो व्याप्ता प्रकृतिमिव निजवल्लभामुत्प्रेक्षमाणस्य प्रेमकैवल्यवादिनो वियोगिनो विरहावधिर्यथाशीघ्र परिसमाप्ति यदि न यायात् तर्हि न केवल तस्योन्माद किन्तु प्राणसशयोऽपि नि सशय समुत्पद्येतेति चिन्ताविह्वलेनातिदयितया स्वप्नेऽपि क्षणमप्यविस्मृतया स्वीयप्रियजन्मभूम्या वर्षदशकमधुनापि विश्लेपितेन कोरियादेशीयेनैनाममरुशतकलीला निर्विघ्नपरिसमाप्तिमथ नयता प्राञ्जलिना मया सस्नेहमाशिष्यते यच्छ्लाघ्यसौजन्यसौहृदयवात्सल्यनिघैवराकस्यास्य दयितासमागमोऽविलम्बेन सजनिपीष्ट, शश्वदविभाज्यस्यापि निकृष्टसाम्राज्यवादहतवेनदक्षिणोत्तरभागद्वये वलात्कारेण विभक्तस्य कोरियादेशस्य पुन सयोगोऽपि द्रुततर समुत्पत्सीष्टेति ।

परिसमाप्ता श्रीयुतकोरियादेशसमुत्पन्नविद्वद्वरेण्य-
पण्डितश्रीबाक्कन्वेप्रणीतेयममरुशतकलीला ।।

परिशिष्टम्

अमरुशतकश्लोकानुक्रमणी

पाठान्तरसहितममरुशतकमूलम्

परिशिष्टम्

अथ सुभाषितावल्यादिषु ग्रन्थान्तरेष्वमरुकविनाम्ना समुद्धृतानां पूर्वगतपद्यव्यतिरिक्तानां श्लोकानां व्याख्यानमपि श्रीचाककन्द्रेनाम्ना कोरियादेशीयेन मया सहृदयानां विदुषां मुदे मुद्राधाय च लघु विधीयते ।

नभसि जलदलक्ष्मीं सास्रया वीक्ष्य दृष्ट्या
प्रवससि यदि कान्तेत्यर्धमुक्त्वा कथंचित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
यदनु कृतवती सा तत्र वाचो निवृत्ताः ॥ १ ॥

विरहिमिथुनपरस्परसमागमोत्कण्ठातिरेकजनिकायां प्रावृषि गगने प्रेक्षणीयां वारिवाहशोभां कान्तवियोगासहिष्णुतयोद्गच्छमानबाष्पपूर्णया दृष्ट्या सखेदं निरीक्ष्य हे दयित ! प्रवासमनुतिष्ठसि चेदिति कथमप्यर्धं मा गास्त्वमित्याशयेन मे वसनं परिगृह्य पद्भ्यां भूमिं प्रकर्षेणोल्लिखन्ती तत्र पश्चात् सा मे दयिता यद्दीनं चेष्टितमकार्षीत्तत्रैवानिर्वचनीये चेष्टिते वचांसि व्यरंसिषुः । अत्र स्वकान्तप्रवासोद्यमनिषेधाय यदि प्रवससि नाहं जिजीविषामीत्यादिकं यद्यद्भाषितुमभिलषितं तत्तत् सर्वं तेनैव चेष्टितविशेषेण तया निःशब्दमुक्तमिति चरमपादेनावगम्यते । स्वभावोक्तिरलङ्कारः । मालिनीवृत्तम् ।

स्मररसनदीपूरेणोढाः पुनर्गुरुसेतुभि-
र्यदपि विधृतास्तिष्ठन्त्याराद्पूर्णमनोरथाः ।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः ॥ २ ॥

यद्यपि सावेगमनसिजरागरूपेण नदीप्रवाहेण हठात् प्रोढाः प्रज्वलितकामानलसंधुक्षिताः किन्तु भूयो गुरुजनरूपैः सेतुभिः प्रतिरुद्धाः प्रणयिनः स्त्रीपुरुषाः सुरतक्रीडाया अननुष्ठितत्वादसिद्धमनोभिलाषास्तिष्ठन्ति तथापि चित्रार्पितमूर्तिवन्निश्चलैर्गात्रैरत्यन्तोत्सुकान् परस्परमुन्मुखाः सन्तो दृष्टीन्दीवरखण्ड-

समानीतमतिमात्रसमीहितान्योन्यदर्शनपीयूषास्वादमेव निर्विशन्ति । ननु गुरुबन्धुजनसान्निध्ये मान्मथलीलाया अचिन्त्यत्वात् केवलं साभिलापपरस्परावलोकनेन मदनमदरसं पिबन्ति प्रणयिमिथुनानीत्यर्थः ।
रूपकमलंकारः । हरिणीवृत्तम् ।

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ ३ ॥

मादृक्षसुहृज्जनस्याविदितमानसिकव्यथालामे ! दूतिके ! पश्य ते पीवरवक्षोरुहकुम्भयुगं निरवशेषविगलितचन्दनावलेपनं, रदनच्छदः प्रमृष्टरक्तवर्णः, नयने दूरीकृताञ्जने, क्षामा तवेयं तनूः रोमाञ्चिता बोभवीति, स्थानादस्मात् स्नानार्थं दीर्घिकां यातासि, न तु मदर्थेऽतिदुष्टस्य तस्य कामुकस्य सकाशं गतासि। अत्र खलु वापीस्नानगलितचन्दनादिव्यपदेशेन दूत्याः संभोगचिह्नस्य नायिकया कथितत्वात् स्त्रीयकामुकस्याधमत्वख्यापनाच्च मत्समीपमानय तमिति मम मदेशवचनमङ्गीकृत्यापि तदन्तिकं रन्तुमयासीरिति व्यङ्ग्योऽर्थः ससूच्यते तेन हेतुना मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागम इति साभ्यसूयामर्षोपालम्भाभिहितं । व्याजोक्तिरलंकार आक्षेपोऽलंकारोऽपि । शार्दूलविक्रीडितवृत्तम् ।

आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो
भुग्नभ्रूरतिखण्ड्यमानमधरं धत्ते न केशग्रहे ।
अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष संप्रति पुनः कोपप्रकारोऽपरः ॥ ४ ॥

नूनं प्रणयकोपवशात् परिक्लिष्टा वामलोचना मे कामिनी रिरंसातुरेण मया स्रियमाणेऽशुकस्य विमोचनेऽपि प्रागिव सरोषं विरोधं न करोति, परिचुम्बनार्थं मया विधीयमाने तदीयशिरोरुहकर्षणेऽपि विरचितभ्रूकुटी सत्यनिमात्रदश्यमानमधरोष्ठं न धारयति किंच समागतृष्णार्तेन मयानुष्ठीयमानेऽपि सरभसपरिरम्भणे प्रतिकूला न भवति किन्तु हठालिङ्गनसौकर्यायैवात्मनैव गात्राणि मे

समर्पयति नलिनीत्थमिदानीं भूयोऽप्यमन्द कौचप्रपञ्चनप्रगल्भत्वाद्वङ्गया स्तया स्मितु परिशीलति ? । युक्तिरलंकारः । वृत्तं तु शार्दूलविक्रीडितम् ।

क्वचित्ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियो नानावस्थं प्रथयति रतं प्रच्छदपटः ॥५॥

कुत्रचिन्मार्जारकरणसंज्ञकेन निधुवनप्रकारेण ताम्बूलरसरक्तीकृतः कुत्रचित् चरितदनामकेन सुरतबन्धेन कृष्णागरुकर्दमलाञ्छनकलङ्कितः कुत्रचिद् धेनुकाह्वेन रतिप्रक्रमेण कर्पूरादिसौगन्धिकचूर्णोद्गारचिह्नितः कुत्रचिदपि च पुरुषायितसम्भोगविधिना चरणलाक्षारागलक्ष्ममुद्रितो विलासशयनप्रच्छादनपटो मन्मथयुद्धविमर्दातिशयक्षोभनिम्नतरङ्गितवलीभङ्गविस्तारैश्च केशपाशाद्विगलितैरितस्ततः समन्ताद्विकीर्णैः पुष्पैश्च प्रज्वलितरागानलपुलकितवपुषो निधुवनप्रमोदोद्रेकद्रवीभूतायाः कस्याश्चिद् योषितो विविधप्रकारमयं सुरतं विवृणोति । जातिरलंकारः । शिखरिणीवृत्तम् ।

पुष्पोद्भेदमवाप्य केलिशयनाद् रस्यया चुम्बने
कान्तेन स्फुरिताधरेण निभृतं भ्रूसंज्ञया याचिते ।
आच्छाद्य स्मितपूर्णगण्डफलकं चेलाञ्चलेनाननं
मन्दान्दोलितकुण्डलस्तबकया तन्व्यावधूतं शिरः ॥६॥

परिस्पन्दिताधरशालिना दयितेन भ्रूसंज्ञारूपेणेङ्गितेन त्वां परिचुचुम्बिषामीति निःशङ्कं परिचुम्बने प्रार्थिते सति मासिकर्तुकालारम्भे रजःप्रभेदं मत्वा प्राप्य मान्मथलीलानलं परित्यज्य दूरमिमं चुम्बनमननुमत्या स्मितनिर्भरपूर्णगम्भीरकपोलमिति वदनं परिधानप्रान्तेन प्रच्छाद्य शनैर्दरदोलायितकर्णाभरणभूतपुष्पगुच्छया तनुमध्यया दयितयास्मिन् समये नवीनपुष्पोद्गमवशात् परिचुम्बनमपि कर्तुं न शक्यत इति शीर्षमवधूतम् । सूक्ष्मालंकारः । शार्दूलविक्रीडितवृत्तम् ।

शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।

तवेतत्त्वयाचक्षे धृतमधुमयत्वद्बहुवचो-
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥७॥

हे कितव ! यस्मात् समालिङ्गन्नपि त्वमितरस्या प्रतिपक्षकामिन्या मेखलारत्न-शिञ्जितं कर्णे कृत्वा तद्गतमनस्कत्वाद् विश्लथीभूतबाहुपाशोऽभूस्तदेतत् ते दुर्ललितं कितव कुत्र कस्मै निवेदयामि ? विषसदृशेन सर्पि पुष्पासवमयमिवोपलक्षितं प्रियोक्तिनिपुणस्य ते प्राज्येन वचसा विमुह्यमाना मे सहचरी किमपि न श्रद्दधाति । आक्षेपोऽलङ्कारो रूपकमलङ्कारश्च । शिखरिणीवृत्तम् ।

अश्छिन्नं नयनाम्बु बन्धुषु कृतं चिन्ता गुरुष्वर्पिता
दत्तं दैन्यमशेषतः परिजने तापः सखीष्वाहितः ।
अद्य श्वः परनिर्वृतिं भजति सा श्वासैः परं खिद्यते
विस्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया ॥८॥

त्वत्समागमालाभजनितनिर्वेदातिशयमूर्च्छितकल्पया तया निरन्तरनिपतद् बाष्पाम्बु बान्धवजनेषु समर्पितं, चिन्ताभारो गुरुजनेषु निक्षिप्तो, दीनभावः साकल्येन पारिपार्श्वकगणे विश्राणितो, मानसिकसंताप सहचरीषु निहित इत्थं विश्लेषनिष्पादितं दुःखं तया विभक्तिं प्रापितं किञ्च यत् सा वियोगशोको-त्पादितैर्दीर्घैर्निःश्वासैः सततं परिक्लिश्यते ततोऽद्य वा श्वो वाचिरेण परमं सौख्यं लभते, तस्माद्धेतोस्त्वं व्यपेतचिन्तो भव । विरहजमन्युदुःखिता ता योषितं दर्शं दर्शं बन्धवोऽपि निरन्तरनयनाम्बुसंसिक्तदृष्टयो भवन्ति गुरवोऽपि चिन्ता-तत्परा भवन्ति परिजनोऽपि दैन्यमनुभवति सख्योऽपि तापेन संतप्यन्ते चेति पूर्वार्धेनात्र ससूच्यते तृतीयपादे चाद्य श्व परनिर्वृतिं भजति सेत्यनेन वाक्येन तस्या अचिरभावी मृत्युर्व्यज्यते ।
आक्षेपोऽलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

रोहन्तौ प्रथमं ममोरसि तव प्राप्तौ विवृद्धिं स्तनौ
सल्लापास्तव वाक्यभङ्गिमिलनान्मौग्ध्यं परं त्याजिताः ।
धात्रीकण्ठमपास्य बाहुलतिके कण्ठे तवासञ्जिते
निर्दाक्षिण्य करोमि किं नु विशिखाप्येषा न पन्थास्तव ॥९॥

प्रथमं मम भुजान्तराले रूढिं गच्छन्तौ मामकीनौ वक्षोरुहौ तव भुजान्तराले

. . . . यानि ममापणानि वक्रोक्तिचतुरस्य ते वाक्यभङ्गिमपक्वादिव नितरां मुग्धत्व मत्वाजितानि, धाम्न्या शिरोधर निराकृत्य मम बाहुलतिके तव शिरोधरेऽवलम्बिते स्त , सदाचारविहीन ! दूरीकृतदाक्षिण्य ! इय प्रतोल्यपि तव मार्गो न भवतीतीत्थमृतेऽत्र ननु कि करोमि?' आक्षेपोऽलङ्कार । वृत्त तु शार्दूलविक्रीडितम् ।

पराची कोपेन स्फुटकपटनिद्रामुकुलिता
प्रविश्याङ्गेनाङ्ग प्रणयिनि परीरम्भचतुरे ।
शनैर्नीविबन्ध स्पृशति समयत्याकुलकर
विधत्ते सङ्कोचालपितमवलग्न वरतनुः ॥१०॥

प्रणयकलहप्रसङ्गे रुषा विमुखी मुग्धकपटनिद्रानिमीलिताक्षी वरवर्णिनी सम्भोगरसास्वादलालसया गात्रेण गात्र प्रविश्य समाश्लेषकोविदे प्रणयिनि प्राणेश्वरेऽशुकग्रन्थि भवानैयविह्वलहस्त यथा स्यात् तथा विमोचनाय शनै सम्पृशति सति तदीयाङ्गस्पर्शोत्थरोमहर्षभारवश्यात् तनुमपि मध्यभाग सङ्कोचेन तनूकरोति । युक्तिरलङ्कार । शिखरिणीवृत्तम् ।

स्विन्नं केन मुखं दिवाकरकरैस्ते रागिणी लोचने
कोपात्तद्वचनोदिताद्विलुलिता नीलालका वायुना ।
भ्रष्टं कुङ्कुममुत्तरीयकषणात् क्लान्तासि गत्यागतै-
र्युक्तं तत्सकलं विमत्र वद हे दूति क्षतस्याधरे ॥११॥

स्वीयकान्तकृतसम्भोगविह्वलाङ्गिता प्रत्यागता दूती विलोक्य विलोकयेर्ष्यामर्षारुणाक्षी नायिका पर्यनुयुङ्क्ते हे मदेनहरि ! केन कारणेन तव वदन सजातस्वेदोद्गमम् ? साम्प्रतमापिणी दूती प्रतिवक्ति सहस्ररश्मिकिरणै , पुनरपि नायिका पृच्छति केन हेतुना ते दृष्टी रक्तीभूते ? दूती प्रतिवदति तस्य विनयस्यानिष्टवाक्यजनितात् कोपात् तथाभूते, नायिकानुयुङ्क्ते कृष्णवर्णास्तव केशपाश. केन विकीर्णं ? दूतिका प्रतिभाषते मरुता विकीर्णं , तच्छ्रुत्वा भूयो नायिका पर्यनुयोग कुरुते काश्मीरज केन हेतुना विगलितम् ? सा दूती प्रतिवक्ति मदुत्तरीयकघर्षणेन च्युतम्, नायिका पृच्छति केन विभ्रामि ? सा दूतिका प्रतिवक्ति गमनागमनैः । निशम्येति श्रुत्वा सा रोषेण नायिका व्याहरति

हे दूतिके ! समस्तं यत् त्वया निगदितं तद् युज्यते किन्तु तवाधरे दरीदृश्यमानस्य व्रणाङ्कस्य किं कारणमित्यत्र मे प्रश्ने प्रतिवचनं ब्रूहि । प्रश्नोत्तररूपः वाक्योत्तरमलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

नान्तःप्रवेशमरुणद्विमुखी न चासी-
दाचष्ट रोषपरुषाणि न चाक्षराणि ।
सा केवलं सरलपक्ष्मभिरक्षिपातैः
कान्तं विलोकितवती जननिर्विशेषम् ॥१२॥

कृतप्रणयापराधस्यापि प्रणयिनो वेश्माभ्यन्तरप्रवेशं सौजन्यविनयविभूषणा सा विदग्धा दयिता न न्यवीवरत्, तं प्रति च पराङ्मुखी नाभूत्, कोपेन निष्ठुराण्यक्षराणि च न व्याहार्षीत् परन्तु केवलमकुटिलाक्षिरोमशालिभिर्दृष्टिविक्षेपैः साधारणजनवत् स्वं प्रियमद्राक्षीत् । उत्तरार्धेनेह सानुरागवीक्षणराहित्येन सा नायिकाऽऽत्मनस्तटस्थ्यं व्यक्तीकृत्य दण्ड्यं कान्तं शिष्टोपचारपूर्वं दण्डयाञ्चक्रे इति व्यज्यते । आक्षेपोऽलङ्कारः । वृत्तं तु वसन्ततिलका ।

प्रियकृतपटस्तेयक्रीडाविलम्बनविह्वला
किमपि करुणालापा तन्वीमुदीक्ष्य ससंभ्रमम् ।
अपि विगलिते स्कन्धावारे गते सुरताहवे
त्रिभुवनमहाधन्वी स्थाने न्यवर्तत मन्मथः ॥१३॥

मनोहरसम्भोगलीलापर्यवसानसमये मान्मथकेलिनिरतेन प्रियतमेन विहिताया मध्यानांशुकपुनरपहरणक्रीडाया कालक्षेपेण सञ्जातवैक्लव्या किमपि किमपि करुणं प्रलपन्ती वरारोहा निरीक्ष्य सर्वदमनस्त्रिलोकैकवीरमहाधानुष्कः कन्दर्पः पुनरप्येतन्मिथुनस्य महासुरतसङ्ग्रामं प्रारभेतेति मनसि कृत्वा प्राथमिकेऽङ्गभूषणादिमदनविलासोपयोगिसामग्रीरूपे शिविरे भ्रष्टेऽपि प्रथमनिधुवनयुद्धे समाप्तेऽपि ससम्भ्रमं स्थाने स्वस्थाने न्यवर्तिष्टेति । हेतुरलङ्कारः । हरिणीवृत्तम् ।

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधा-
त्सोऽङ्गीकृतो भगवता मकरध्वजेन ॥१४॥

लाक्षारागरञ्जितनाभिनवकिसलयवत्सुकुमारेण मञ्जीरभूषितेनानङ्गराग-मन्थरेण चरणेन स्वस्वकान्तया या य प्रेमविषयकापराधादभिहन्यते स स पूज्यन् मीनकेतनेन स्वीकृता भवति । वसन्ततिलकावृत्तम् ।

प्रयच्छाहार मे यदि तव रहोवृत्तमखिलं
मया वाच्य घोच्चैरिति गृहशुके जल्पति शनैः ।
वधूर्बद्ध्वा व्रीडाभरनमितमर्त्तविहसितं
हरत्यर्धोन्मीलन्नलिनमनिलावर्जितमिव ॥१५॥

हे मन्मथविलासप्रसक्ते वरवर्णिनि ! बुभुक्षितास्मि, मह्यं भोजनं देहि, यदि न दास्यसि तर्हि सकलस्तं रहस्यवृत्तान्तो वा मयाच्चैर्व्याहर्तव्यः भविष्यतीति सतजयतीव गृहस्थे लीलाशुके मन्दमन्दं प्रलपति सति वधूर्वायुनम्रीकृतमर्धं विकसितं कमलमिव शुकजल्पिताकर्णनजनितत्रपातिरेकावनमितमन्तर्भरितमन्द-हासं वदनं हरति । उत्प्रेक्षालङ्कारः । शिखरिणीवृत्तम् ।

किंचिन्मुद्रितपांसवः शिखिगणैरुर्ध्वाक्षमालोकिता
जीर्णावासरन्ध्रदरिद्रगृहिणीनिश्वासानिलैर्जर्जराः ।
एते ते निपतन्ति नूतनघनात् प्रावृड्भरानन्दिनो
विच्छायीकृतविप्रयुक्तवनितावक्त्रेन्दवो बिन्दवः ॥१६॥

अधोनिपतनपनिवारितपांशूद्गमा सानन्दमयूरनिवहैरूर्ध्वीकृतकन्धरैरूर्ध्वीकृताननेन मया स्यात तयोर्द्वीक्षिता जीर्णेषु निवासवस्मस्वकिञ्चनतावशाद रोरूयमाणाना दरिद्रगृहिणीनाममहोर्ष्णोच्छ्वासादिभिर्निःश्वासमरुद्भिरिदचूर्णीकृता कान्तविरह-शोकविवर्णीकृतप्रोषितभर्तृकामुखचन्द्रा जलदागमप्रमोदिनस्ते एते सलिल-बिन्दवोऽभिनववारिवाहान्निपतन्ति । जातिरलङ्कारः । वृत्तं तु शार्दूलविक्रीडितम् ।

नीत्वोच्चैर्विक्षिपन्तः कृततुहिनकणासारसङ्गान्परागा-
नामोदानन्दितालीनतितरसुरभीन् भूरिशो दिङ्मुखेषु ।
एते ते कुङ्कुमाङ्कस्तनकलशभरास्फारनादुच्छलन्तः
पीत्वा सीत्कारि वक्त्रं हरिणशिशुदृशां हैमना वान्ति वाताः ॥१७॥

विहितनुषारकणवृष्टिसपानमपकोनि परिमलप्रमोदितषट्पदनिकुरम्बानि

प्रवृष्टसौगन्ध्यमयानि सुमनोरजांसि बहुश ऊर्ध्वं नीत्वा सर्वेषु दिशामुखेषु सर्वत्र विकिरन्त काश्मीरजावलिप्तपीनस्तनीकुचकुम्भोऽत्यायताडनादूर्ध्वं चलन्तो मृगशावाक्षीणां वनितानां शैत्यजनितसीत्कृतिमनोहरं वदनं संस्पृशन्त हेमन्तसमवा गन्धवाहा प्रवहन्ति । जातिरलङ्कार । वृत्त स्रग्धरा ।

पीतस्तुषारकिरणो मधुनैव सार्धं
मन्त प्रविश्य चषकप्रतिबिम्बवर्ती ।
मानान्धकारमपि मानवतीजनस्य
नूनं बिभेद यदसौ प्रससाद सद्य ॥१८॥

मद्यपानभाजने प्रतिबिम्बित मन मदिरमदिरयैव सह पीत कन्दर्पमदोद्दीपक- शिशिरदीधितिश्चन्द्रमा अन्तर्मनसि प्रवेश कृत्वेऽर्यालुमानिनीजनस्य प्रणय- कोपोत्पत्तिस्थानं नूनं खण्डशश्चिच्छेद यदसौ मानिनाजन सपदि प्रसन्नता जगाम । हेतुरलङ्कार । वृत्तं तु वसन्ततिलका ।

ललनालोलधम्मिल्लमल्लिकामोदवासिता ।
वान्ति रात्रौ रतक्लान्तकामिनीसुहृदोऽनिला ॥१९॥

निदाघकाले निशीथिन्या नितम्बिनीनां चन्द्रलेपु सयत्नकेशोच्चयेषु निहितानां जातिपुष्पाणां सुगन्धिना परिमलेन परिमलिता सम्भोगोपमर्दखिन्नानां प्रमदानां रमणीनामङ्गानुकूलत्वात् सुहृदमूना इव निरूपिता मातरिश्वानो वहन्ति । वृत्तमनुष्टुप् ।

वान्ति कह्लारसुभगा सप्तच्छदसुगन्धय ।
वाता नवरतिम्लानवधूसङ्गममन्थरा ॥२०॥

शरदि सौगन्धिकाह्वोत्पलपरिमलश्रेतिरस्कृतदिस्पृग सप्तच्छदपुष्पसौगन्ध्य- सुरभयो नूतननिधुवनक्षमदश्रमपरिक्लिन्नानां नवाङ्गनानां वधूनां सम्पर्केण शनैश्चरा गन्धवाहा समीरणा वहन्ति । अनुष्टुब्वृत्तम् ।

रामाणां रमणीयवक्त्रशशिन स्वेदोदबिन्दुप्लुतो
व्यालोलामलकावली प्रचलयश्चुम्बस्तिम्बाशुकम् ।

प्रातर्वाति मधौ विकृष्टविकसद्राजीवराजीरजो-
जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥२१॥

मन्मथसुहृद्भूते वसन्ते सुन्दरीणां मनोज्ञवदनेन्दौ स्वेदजलबिन्दुमिश्रितस्तासां दोलायमानं कुटिलकचहस्तमितस्ततः प्रचालयन् तासां श्रोणिपरिधानवस्त्रं परिचुम्बन् पुनश्च तासां सुरतनिर्बन्धजनितं परिश्रमं दूरीकुर्वन् व्याकृष्ट-विकासस्मेरकमलनिवहपरागपुञ्जपरिमलमनोरमो गन्धवहः पवमानः प्रभाते वहति । रूपकमलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

अङ्गं चन्दनपाण्डु पल्लवमृदुस्ताम्बूलताम्रोऽधरो
धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने ।
अन्तःपुष्पसुगन्धिराजिकबरी सर्वाङ्गलग्नाम्बरं
कान्तानां कमनीयतां विदधते ग्रीष्मेऽपराह्णागमे ॥२२॥

निदाघे सन्ध्याकाले प्रमदानां मलयजगन्धसारलिप्तं गात्रं नवकिसलयकोमल-स्ताम्बूलचर्वणरञ्जितोऽधरपुटो धारायन्त्रचूर्णितसलिलप्रपातस्नानकलुषे प्रक्षालितकज्जले नेत्रे मध्यस्थापितसुमनःसौगन्ध्यसुरभिः कबरीभारः सर्वाङ्गप्रसक्तं क्षौमं च तासां रमणीयतां संपादयन्ति । जातिरलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

वरमसौ दिवसो न पुनर्निशा
ननु निशैव वरं न पुनर्दिनम् ।
उभयमेतदपि व्रजतु क्षयं
प्रियतमेन न यत्र समागमः ॥२३॥

कापि योषिदेका व्याहरति यद्वासरः शोभनो न तु रात्रिरित्येव श्रुत्वा द्वितीया योषित् स्वमतं प्रकाशयन्ती ब्रूते निश्चयेन रात्रिरेव शोभना न पुनर्वासरस्तदनु तृतीया ययोपरिनिर्दिष्टं भिन्नमतद्वयमुपसंहरन्ती ब्रवीति यत्र वासरे यत्र रात्रौ चानुरक्तेन प्रियतमेन सङ्गमो न भवति तदेतद् द्वयमपि विलयं गच्छत्विति । द्रुतविलम्बितवृत्तम् ।

मन्दं मुद्रितपांसवः परिपतज्ज्ञातान्धकारा मरु-
द्वेगध्वस्तकुटीरकान्तनिपतच्छिद्रेषु लब्धान्तराः ।

कर्मव्यग्रकुटुम्बिनीकुचभरस्वेदच्छिदः प्रावृषः
प्रारम्भे मदयन्ति कन्दलदलोल्लासाः पयोबिन्दवः ॥२४॥

वर्षासमयस्य प्रस्तावे शनैर्निपिद्धभूतलपांसूद्गमा परितो निपतद्भिविततमसमीरणावेगापहृततृणकुटीराग्रभागविगलद्रन्ध्रेषु प्राप्तावकाशा गृहव्यापारव्याकुलगृहिणीपीवरस्तनकलशस्वेदकणतस्कर्यं कदलीपत्रोल्लासोत्पादिका जलदजलविप्रुषो ग्रैष्मिकसंतापसन्तप्तान् जनान् प्रमोदयति । जातिरलंकारः । शार्दूलविक्रीडितवृत्तम् ।

इयमसौ तरलायतलोचना
गुरुसमुन्नतपीनपयोधरा ।
पृथुनितम्बभरालसगामिनी
प्रियतमा मम जीवितहारिणी ॥२५॥

इयमसौ कातर्यलोलदीर्घाक्षी पीवरोच्छ्रितवक्षोरुहभारशालिनी बृहन्मांसलश्रोणिप्राग्भारमन्थरगजगामिनी प्राणदयिता मम जीवितहारिणी शोभते । अतिशयोक्तिगर्भस्वभावोक्तिरलंकारः ।

सालक्तकं शतदलाधिककान्तिरम्यं
रात्रौ स्वधामनिकराऽरुणनूपुराङ्कम् ।
क्षिप्तं भृशं कुपितया तरलायताक्ष्या
सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥२६॥

अपराधिनो भर्तुः प्रणयभङ्गकुपितया लोलायतनयनया कयाचिन्मानिन्या पादयोः प्रणिपतितस्य तस्य मस्तके निशि भृशं प्रणिहितं लाक्षारागारुणरक्तोत्पलाधिकशोभारमणीयं स्वकीयकान्तिमयूखच्छायापुञ्जारुणीकृतमञ्जीराङ्कितं चरणं भागधेयोदयलाञ्छनमिव शुशुभे । उत्प्रेक्षालंकारः । वृत्तं तु वसन्ततिलका ।

श्रुत्वाकस्मान्निशीथे नवघनरसितं विश्लथाङ्गं पतन्त्या
शय्याया भूमिपृष्ठे करतलधृतया दुःखितालीजनेन ।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटोपान्तदीर्णाश्रुबिन्दु
स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा ॥२७॥

अस्मात् तमिस्रायां तमिस्रायां प्रत्यग्रजलदस्तनितध्वनि श्रवणविषयीकृत्य प्रणयिभर्तृविरहव्यथातया दुर्बलयाच्छिद्यमानितगात्रं यथा स्यात्तथा गमनादूर्ध्वं निराकृत्यान एव नन्दमानदुर्गेन मत्प्रियेनेन गतरूपं हस्तनलोद्भूतया शोषितमनूंथया प्राणवल्लभस्य स्मारं स्मारं सोत्कं प्रमुक्तकण्ठं दृष्टस्तनांशुमान्तविनिर्गताश्रुबिन्दु गद्गदमृदुलवचनं यथा स्यात्तथाविरम्य रोरुद्यते । प्रणामनियतस्तनुस्पृहेव स्फोरे विलम्याऽस्य सोल्लासं मुक्तकण्ठं कठिनकुचतटोपान्तदीनाश्रुबिन्दु स्यन्दितमृदुवच इति क्रियाविशेषणपञ्चकम् । स्वभावोक्तिरलङ्कारः । स्रग्धरावृत्तम् ।

पीतो यतःप्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा ततःप्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रम् ॥२८॥

यतो दिवसात् प्रभृति कामपिपासितेन मया तस्याः प्रियायाः प्रचुरोऽधररस आस्वादितस्ततःप्रभृति मम तृष्णा सर्वप्रकारा द्विगुणतां याति, तत्र तस्यां भूरि लावण्यं (लवणमाधुर्यं सौन्दर्यं च) वर्तते इति किमत्राद्भुतम् ? यथा लवणभूयिष्ठ[illegible]स्वादनेन तृष्णा अतिशयेन वर्धते तथा लावण्यवदधररसास्वादनेनापि । अत्र तृष्णाधिक्ये [illegible] [illegible] । [illegible] । वसन्ततिलकावृत्तम् ।

प्रासादेऽस्मिन् पथि [illegible] [illegible]
[illegible] [illegible] प्रभुतो [illegible] ।
तेनोत्थाय [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] ॥२९॥

[illegible] । [illegible] [illegible] [illegible] निवसति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] । [illegible] ।

कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः ।
आयाता वयमागमिष्यसि सुहृद्वर्गस्य भाग्योदयै-
सन्देशं वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥३०॥

अयि प्रियतमे दृष्टी मुकुलयित्वा त्वं धैर्येण कतिपयानि दिनान्यतिवाहय, हे दयित ! स्वस्ति स्वस्ति तेऽस्तु यावत् त्वद्विरहेणाशा सर्वा न शून्यीभवन्ति तावदधुनैव नेत्रे मुकुलयामि, वयमायाता , मित्रबन्धुनिवहस्य सौभाग्योदयैस्त्व-मागमिष्यसि, सदेशं वद तीर्थेषु कस्तव समीहितो निवापजलाञ्जलिरिति प्रवासप्रयाणोद्यतस्य कान्तस्य विरहासहिष्णुतानिश्चितमरणाभिप्रायया कान्तया सह प्रस्थानसमये कृतं समापणम् । आक्षेपोऽलङ्कारः । वृत्तं तु शार्दूल-विक्रीडितम् ।

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै-
र्मह्यं समर्पय मदर्पितचुम्बनं च ॥३१॥

अयि नीलोत्पलसमानलोचने ! वामनेत्रे ! यदि प्रणयकोपो गूढं विहितस्त्वया तर्हि नाहं तव प्रियः किन्तु स कोप एव दयितत्वद्धृदये निहितत्वात् तव प्रियो भवतु किमपरमस्मिन् विषये करणीयमस्ति, न किमपि, यतोऽहमधुना न ते दयितोऽस्मि तत उच्चैर्मया दत्तपूर्वं परिरम्भणं प्रतिगच्छ मया च तेऽर्पितपूर्वं परिचुम्बनमपि मे प्रतिदेहि । आक्षेपोऽलङ्कारः । वसन्ततिलकावृत्तम् ।

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥३२॥

मनोजन्मजनितसंतापातिशयप्रशमनाय प्रयुज्यमानो मृणालहारोऽपि शीतल-सलिलक्षालितांशुकमपि शय्यायां निहितानि सरसीरुहपत्राण्यपि तुषारकण-वर्षणशीला सुधांशुकिरणा अपि प्रत्यग्ररसार्द्राणि मलयजान्यपेन्धनानि सर्वाणि

शीतलान्यपि प्रत्युत यस्य कामानलस्यैधांसि भवन्ति सोऽसौ कामानलः कथं निर्वापं यास्यति ? अतिशयोक्तिगर्भविषमालंकारः । वसन्ततिलकावृत्तम् ।

तन्वी शरत्त्रिपथगा पुलिने कपोले
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचाप-
चाण्डालपाशयुगलायित शून्यकर्णौ ॥३३॥

सा कृशाङ्गी शारदीयगङ्गानदीव तस्याः कपोलौ सैकत इव तस्यास्तरले नेत्रे रमणीयचञ्चलखञ्जनाख्यपक्षिणाविव तद्दृष्टिरूपविहङ्गमबन्धनाय तस्याश्च कर्णाभरणरहितौ श्रवणौ दीर्घकालधृतसुभ्रूचापमृगयुपाशाविव । उपमालंकारः । वसन्ततिलकावृत्तम् ।

पादाङ्गुष्ठेन भूमिं किसलयरुचिना सापदेशं लिखन्ती
भूयो भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे ।
वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यन्मां नोवाच किंचित्स्थितमपि हृदये मानसं तद्दुनोति ॥३४॥

प्रणयकोपवशाद् नविरपल्लववर्णेन चरणाङ्गुष्ठेन सव्यपदेशं भूतलमुल्लिखन्ती पौनःपुन्येन मयि सितासिते तरलतारे दृशौ विक्षिपन्ती त्रपावनतं दरत्स्फुरद्दोष्ठपुटमोष्ठं वाक्यगर्भितं वदनं दधानापि सा मे कान्ता यत् स्वहृदयस्थमपि विवक्षितमपि किंचिन्मात्रमपि नावोचत् तन्मे मनो दुनोति । जातिरलंकारः । वृत्तं स्रग्धरा ।

ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यं च वेदिरतुलः स्तनयुग्मभारात् ।
लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजजनैरभिषेचनाय ॥३५॥

[illegible] ऊरुयुगलं कदल्याः काण्डाविवान्यो मध्यभागः [illegible] निम्नः कठोरस्तनयुगं च सौन्दर्यजलपरिपूर्णं शोभनं [illegible] कामस्याभिषेकाय कल्पते । रूपकालंकारः । वृत्तं तु वसन्ततिलका ।

हारोऽयं हरिणाक्षीणा लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥३६॥

सौभाग्योदयाद् दिष्ट्याय मौक्तिकहारो मृगाक्षीणा सुन्दरीणा कमनीये कुचाभोगे परिवर्तनं करोतीति मौक्तिकानामपीदृशी दशा परन्तु के वयं कदर्पदासाः कीदृशी वास्माकमवस्था ? । अनुष्टुब्वृत्तम् ।

अन्योन्यग्रथिताङ्गुलिमत्पाणिद्वयस्योपरि
न्यस्योच्छ्वासविकम्पिताधरदलं निर्वेदशून्यं मुखम् ।
आमीलन्नयनान्तवान्तसलिलं श्लाघ्यस्य निन्द्यस्य वा
कस्येदं दृढसौहृदं प्रतिदिनं दीनं त्वया स्मर्यते ॥३७॥

परस्परगुम्फितरक्ताङ्गुलिनखकरयुग्मस्योपरि दीर्घेनि श्वासतरलिताधरपल्लवशालि दौर्मनस्येन शून्यं समन्तान्मुकुलितदृष्टिप्रान्तोद्गतबाष्पाम्बुसिक्तं वदनं निधाय प्रशंसनीयस्योताहोस्विन्निन्दनीयस्य कस्येदं दृढबद्धमनुरागं प्रतिदिवसं सदैन्यं त्वं स्मरसि हे सखि ! [illegible] । शार्दूलविक्रीडितवृत्तम् ।

असद्वृत्तो नायं न च खलु गुणैरेव रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।
गृहाणेमं मुग्धे व्रजतु निजकण्ठप्रणयिता-
मुपायो नास्त्यन्यस्तव हृदयसंतापशमने ॥३८॥

मुक्ताहारपक्षे—अयं मुक्ताहारो न विषमो न च खलु [illegible] पादमूले [illegible] मुग्धे ! प्रेक्षणीयमेन मुक्ताहारं [illegible] [illegible] [illegible] नायकपक्षे तु—[illegible] [illegible] प्रियतम [illegible] [illegible] पादयोः प्रति-[illegible] [illegible] [illegible] [illegible] [illegible] मानसिकव्यथानिवारणविषये न [illegible] [illegible] । [illegible] । वृत्तं शिखरिणी ।

आलोकयन्ति पयोधरमुपमन्दिरमभिनवाम्बुभरलोभम् ।
[illegible] ॥३९॥

गृह समया कश्चिदध्वनीन कुक्षिवृनप्रत्यग्रवारिभारश्याम वारिवाह कान्तया दुर्विषहविरहाग्निदग्धप्राय स्वदेह भस्मसात्कर्तुं नून निर्मितायाश्चित्याया अग्निधूमोद्गमाशङ्कया सशोक निरीक्षते। आर्याजाति । सदेहोऽलङ्कार ।

आश्लिष्टा रभसाद्विलीयत इवाक्रान्ताप्यनङ्गेन या
यस्या कृत्रिमचण्डवस्तुकरणाकूतेषु खिन्न मन ।
कोऽयं काहमिति प्रवृत्तसुरता जानाति या नान्तर
रन्तु सा रमणी स एव रमण शेषौ तु जायापती ॥४०॥

सुरतलीलाप्रसङ्गेऽनङ्गेन मनसिजेनाक्रान्तापि हठात्कान्तेनालिङ्गिता सती विलीनेव यस्या मन कपटचण्डवस्तुकरणाभिप्रायेषु दून भवति या च प्रवृत्तनिधुवना सती मनाविमोहिसुरतमदामत्तचित्तनया कोऽयं काहमिति रन्तुर्न्मारनम्य न जानीत, तदनु सैव कामिनी स एव कामी शेषौ तु दम्पती। जातिरलङ्कार । शार्दूलविक्रीडितवृत्तम् ।

किं बाले मुग्धतेयं प्रकृतिरियमथो रौद्रता किं नु कोप
किं वा चापल्यमुच्चैर्वसमुत किमु ते यौवनारम्भदर्प ।
यत्केशालापवक्त्रस्मितललितपुचभ्रूविलासावलग्नै
स्यस्थो लोपसवदोषैर्मनसि विनिहितैर्दह्यतेऽस्माभिरार्यं ॥४१॥

कश्चिद्युवा यौवनदर्पप्रतिपन्ना सौंदर्यलहरीरूपिणी काचित्तरुणी दृष्टिगोचरीभूतस्य प्रवीति हे पूनि ! किमिद ते मौग्ध्यमथवाय निसर्ग किमुताय रौद्रभाव किन्त्वयमपं उताहोस्विच्चापल्य किमूत्तना नियम किमुत तारुण्यप्रारम्भमदो यच्छिरोरुहपाणिमाषणवदनस्मितिविलसितस्तनभ्रूविलासेष्ववलग्नैश्चनास्थानिर्मोग्ध्यादिभिर्निन्दावकीनैरस्माभि स्वस्थोऽपि सर्व आर्यो जना दन्दह्यते। वृत्त स्रग्धरा ।

गच्छन्त्युन्नतया भूर्वेव गदिन मन्द वलन्त्या तया
तेनाप्यर्धेऽर्पितलोचनद्वयपुटेनाशा गृहीता शनै. ।
सर्वेताय बलवृता पिशुनिता ज्ञाना च हितप्रेयसा
गूढ सागमनिश्चयो गुरुपुरोप्येव युवभ्या कृत. ॥४२॥

निजकान्तगमोत्कण्ठ्यमानोऽभिमान भूचापन तत्र याहीति शनै परिवर्तमानया

तया कामिन्या निःशब्दमेव व्याहृत, वक्रीकृतनयनयुग्मपुटेन तेनापि कामिनी तादृशी तदीयाज्ञा शनकैरङ्गीकृता, सकेतार्थे परिवर्तमाननेत्रया तया सकेतस्थानं सूचित तेनापि चावगतमित्थ गुरुजनसान्निध्येऽपि निगूढ पारस्परिकसमागमाध्यवसायस्ताभ्या तरुणदपतिभ्या विहित । सूक्ष्ममलकार । शार्दूलविक्रीडितवृत्तम्।

चटुलनयने शून्या दृष्टि॰ कृता खलु केन ते
क इह सुकृती द्रष्टव्यानामुवाह धुर पराम् ।
यदभिलिखितप्रख्यैरङ्गैर्न मुञ्चसि चेतसा
वदनकमल पाणौ कृत्वा निमीलितलोचना ।।४३।।

अयि तरलनेत्रे! ते दृष्टि केन खलु शून्यीकृता? क सुभग पुण्यराशिस्त्वत्कृते द्रष्टव्याना पदार्थाना परा धुरमुवाह? क प्रेक्षणीयतया परा कोटिमधिरुरोह य चित्रार्पितकल्पैर्गात्रैर्मनसा मुखारविन्द हस्ते निधाय मुकुलितदृष्टिस्त्व न त्यजसि? । जातिरलकार । हरिणीवृत्तम् ।

चलतु तरला धृष्टा दृष्टि॰ खला सखि मेखला
स्खलतु कुचयोरुत्कम्पान्मे विदीर्यतु कञ्चुकम् ।
तदपि न मया सभाव्योऽसौ पुनर्दयित शठ
स्फुटति हृदय मानेनाग्नर्न मे यदि तत्क्षणम् ।।४४।।

प्रणयकोपादपराधिन प्रियमुद्दिश्य सरोष वाचिद्वायिदाह हे सहचरि! लाला प्रगल्भा मे दृष्टिर्वलता नितृष्टा काञ्चीगुणा विगलतु स्तनयोर्वेपथुवशादुत्तरीय शतधा विदलतु तथाप्यसौ धूर्तरूपा वल्लभो न पुनर्मया समाभाष्यो यद्यपि तत्क्षणमेवामर्षेणाग्तमम हृदय न स्फुटति । आक्षेपोऽलकार । हरिणीवृत्तम् ।

तैस्तैश्चाटुभिराशया किल तया यत्ते रतिव्यत्यये
लज्जामन्थरया तया निवसिते भ्रान्त्या मदीयाशुके ।
तत्पट्टांशुकमुद्वहन्नहमपि स्थिरया यदुक्तोऽधुना
येपो युज्यत एव एव हि तवेत्येतन्न विस्मर्यते ।।४५।।

तैस्तैश्चाटुभिरादरेण खलु तया पुरुषायितनिधुवने प्रवृत्ते सति अथान्यया तयात्मान पुरुष मत्वा भ्रान्त्या मामकीने वसने परिहिते सति स्थिरत्वाहमपि

तस्याः परिधानमुद्धरन् यत् त्वयाधुनायमेव वेपस्तेऽनुरूप इति निगदितोऽभूव तदानीं तदेतद् विस्मर्तुं न शक्यते मया । जातिरलङ्कारः । शार्दूलविक्रीडितवृत्तम्।

पत्रं न श्रवणेऽस्ति बाष्पगुरुणोर्नो नेत्रयोः कज्जलं
रागः पूर्वमिवाधरे चरणयोस्तन्व्या न चालक्तकः ।
वार्त्ताचिह्नितिषु निष्ठुरेति भवता मिथ्यैव संभाव्यते
सा लेखं लिखतु च्युतोपकरणा न्यायेन केनाधुना ॥४६॥

त्वद्विरहव्यथामनुभवन्त्यास्तस्याः कृशाङ्ग्या कर्णे पत्राभरणं न विद्यतेऽश्रुभरितयोर्लोचनयोरञ्जनं न भवति यथापूर्वमधरपल्लवेऽपि रक्तवर्णो नास्ति चरणयोरपि लाक्षारागो न दृश्यते तथापि वृत्तान्तप्रेषणविरामेषु भवतु सा निर्दयेति त्वयावमार्यते, त्वद्वियोगदुःखीकृतोपकरणसामग्री सा रमणी केन विधिना भवति ते पत्रं लिखतु ? ।
जातिरलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

यदि विनिहिता शून्या दृष्टिः किमु स्थिरकौतुका
यदि विरचितो मौने यत्नः किमु स्फुरितोऽधरः ।
यदि नियमितं ध्याने चेतः कथं पुलकोद्गमः
कृतमभिनयंर्दृष्टो मानः प्रमोद विमुच्यताम् ॥४७॥

[illegible] प्रणयकुपिता रमणी दृष्ट्वानुनिनीषुरभिदधाति हे कान्ते! त्वया दृष्टिस्त्वया विक्षिप्ता चेत् किमिति दृढोत्सुकया भवसि ? वाचयमत्वे त्वया प्रयत्न कृतश्चेत् किमित्यधरः परिस्फुरति ? ध्याने मनस्त्वया नियमितं चेत्तर्हि कथं रोमाञ्चः ? इतिमत्वा [illegible] यदि [illegible] मया [illegible] परित्यक्तव्यामिति । आक्षेपोऽलङ्कारः । हरिणीवृत्तम् ।

[illegible] स्वप्नेष्वपि [illegible]
[illegible] ।
[illegible] कथमपि [illegible] पुनो
[illegible] कथयितुमिदम् ॥४८॥

-यदेवान्ते ह्यस्तन्या क्षणदाया मदनरागोद्रेकवशात् परस्पर समभिलषितमनोहर-सुरतरसलाभार्थमजाततृष्ण समुल्लङ्घितविनयमर्याद प्रवृत्तमतिहृद्य यामिमिथुनस्य मान्मथलीलाशयनीय तत् सहर्षोन्योन्यमिलन्नेत्रस्य मिथुनस्य स्मृत्वा गुरुजनसमक्ष कथमपि स्मितिप्रादुर्भावप्रतिषेधान्मन्दमिलत्वनीनिक यथा स्यात् तथा कृच्छ्राद् विरतम् । तरुणदपतिभ्या निशि रागातिशयसरभसप्रवृत्त मैथुन स्मार स्मार तत्स्मरणप्रमोदाज्जायमानो हासोद्गमादिवाह्यानुभावो गुरुजनसन्निधये कथचिन्निरुद्ध इति भाव । स्मभावोक्तिरलकार । शार्दूलविक्रीडितवृत्तम् ।

याते गोत्रविपर्यये श्रुतिपथ शय्यामनुप्राप्य चिरं

निर्ध्यात परिवर्तनं हृदि पुनः प्रारब्धमङ्गीकृतम् ।

भूयस्तत्प्रकृत कृतं च वलितक्षिप्तैकदोर्लेखया

मानिन्या न तु पातितः स्तनभरो क्रोडे प्रियस्योरसः ॥४९॥

प्रियेण कृते प्रतिपक्षरमणीगोत्रस्खलिते [illegible] दयिताया श्रवणविषयं [illegible] [illegible] [illegible] [illegible] मूष [illegible] [illegible] [illegible] तत् प्रकृत परिवर्तितप्रक्षिप्तैकबाहुलतेन [illegible] कृतम्, तया कोपनया तु प्रियस्य भुजान्तरालात् [illegible] [illegible] । शार्दूलविक्रीडितवृत्तम् ।

सा यौवनमदोन्मत्ता [illegible] ।

तस्या लावण्यमङ्गेषु [illegible] विजृम्भते ॥५०॥

सा [illegible], तथाभूता सा [illegible] [illegible] [illegible] सौन्दर्य विजृम्भते [illegible] [illegible] [illegible] [illegible] ।

शशि प्रदोषे [illegible] [illegible] [illegible] ।

विरामे [illegible] जगत् ॥५१॥

[illegible]

सुरतविरतौ व्रीडावेशश्लथहस्तया
रहसि गलितं तन्व्या प्राप्तुं न पारितमंशुकम् ।
रतिरसजडैरङ्गैरङ्गं पिधातुमशक्तया
प्रियतमतनौ सर्वाङ्गीणं प्रविष्टमधृष्टया ॥५२॥

मन्मथक्रीडापर्यवसाने लज्जाभिनिवेशपरिस्वेदशिथिलहस्तया कृशाङ्ग्योपांशु विगलितं वस्त्रं हस्ते प्राप्तुं न शक्तं तदा मन्मथरसजडीभूतैर्गात्रैर्गात्रं प्रच्छादयितुमसमर्थया तदा प्रियतमस्य शरीरे सर्वाङ्गीणं प्रविष्टम् ।
जातिरलङ्कारः । हरिणीवृत्तम् ।

शठयस्तानि वचांसि यानि बहुशोऽधीतानि युष्मन्मुखा-
द्धृदयेऽहं बहुशिक्षिता सखिजनैर्ति स्थातव्यापि मौनं श्रिता ।
धर्तैनैत्य च मण्डलीकृतभुजं गाढं परिष्वज्य मां
पीतान्येव सहाधरेण हसता यत्रस्थितान्येव मे ॥५३॥

इत्यधरपानरताय प्रियमुद्दिश्य मानं प्रकाशयितुं प्रौढमहीमिः शिक्षितापि मया-ऽनुरक्तया यानि वाक्यानि युष्माकीणमुखाद मुखाग्रमध्यस्थानि तानि बहुशिक्षिताऽऽह बहुयामीनि मुहूर्तं विचिन्त्यापि वाचयम-नाम्नाश्रिता, तदानी च दयितेन शिवेनागत्य वर्तुलीकृतमस्तनकुम्भं यथा स्यात् तथा सुदृढं ममालिङ्ग्य हसता तत्र मन्मुखस्थानि तान्येव वाक्यानि मदीयाधरेण सार्धं सत्वरं पीतानीति । जातिरलङ्कारः । शार्दूलविक्रीडितवृत्तम् ।

उत्कम्पो हृदये स्खलन्ति वचनान्यावेगलोलं मनो
गात्रं सीदति चातुरश्च हृदयं चिन्ता मुखं शुष्यति ।
सर्वथा तानि पूर्वरङ्गरचना मानं स मुग्धो मया
चन्द्रारम्भा अपि योगिनः शिक्षितानि मामामय समम् ॥५४॥

[illegible] गात्रमवसीदति काचिद् इतो गमनमिच्छति ह सखि ! स हृदि [illegible] सर्वथा [illegible] मम [illegible] दृष्टि मुखं [illegible] चिन्ता वदन [illegible] (अथवा चिन्ता निष्ठा-[illegible]) [illegible] पूर्वरङ्गरचना न मानो मम [illegible] दृढ [illegible] सुरतार्थ [illegible]

यासा मानो मृतले बहुमतो वरीवर्तीति । जातिरलङ्कार । शार्दूल विक्रीडितम ।

> **मानव्याधिनिपीडिताहमधुना शक्नोमि तस्यान्तिक**
> **नो गन्तुं न सखीजनोऽस्ति चतुरो यो मा बलान्नेष्यति ।**
> **मानी सोऽपि जनो न लाघवभयादभ्येति मातः स्वय**
> **कालो याति चल च जीवितमिति क्षुण्ण मनश्चिन्तया ।।५५।।**

हेऽम्ब! प्रणयकोपरूपेण रोगेण मर्दिताहमिदानी तस्य समीप गन्तु न पारयामि, मादृक्षविघटितजनघटनानिपुण सखीवर्गोऽपि नास्ति यो मा तस्य सकाश बलात्कारेणापि नेष्यति, सोऽपि म दयितो मानग्रस्त सन् लाघवभयात् स्वय मत्समीप नागच्छति, कालश्च गच्छति जीवितमपि न भङ्गुरमिति मे मनश्चिन्तासन्तानेन विदलति ।

सहेतुहेतुरलङ्कार । शार्दूलविक्रीडितवृत्तम् ।

> **कान्ते कथचिद्गदितप्रयाणे क्षण विनम्रा विरहार्त्तिताङ्गी ।**
> **ततस्तमालोक्य कदा गतोऽसीत्यालिङ्गय मुग्धा मुदमाससाद ।।५६।।**

प्रवासाय जनपदान्तर गच्छामीति प्रियतमे कथमपि व्याहृतप्रस्थाननिश्चये सति मुहूर्तमधोमुखी भाविवियोगशोकमर्दिततनुर्मुग्धा ततस्त निशाम्य कदा गतोऽसीति परिष्वज्य प्रमोद लेभे । स्वभावोक्तिरलङ्कार । उपजाति ।

> **यद्गम्य गुरुगौरवस्य सुहृदो यस्मिल्लभन्तेऽन्तरं**
> **यद्दाक्षिण्यवशाद्भयाच्च सहते मन्दोपचारानपि ।**
> **यल्लज्जा निरुणद्धि यत्र सपर्यस्त्पाद्यते प्रत्यय-**
> **स्तत्कि प्रेम स उच्यते परिचयस्तत्रापि मानेन किम् ।।५७।।**

यत् प्रेम गुरुगौरवस्य गम्य यस्मिन् प्रेम्णि मित्राण्यवकाश प्राप्नुवन्ति यत् प्रेम विनयवशाद्भीतिवशाच्च स्वल्पचारानपि क्षमते यत् प्रेम त्रपा नियमयति यत्र प्रेम्णि प्रत्यय शपर्न समुत्पाद्यते तत् प्रेम कि परिचय उच्यते तत्रापि मानेन कि कार्यम् ।। शार्दूलविक्रीडितवृत्तम् ।

> **दृष्टे लोचनयुग्मनात्मकुरुमिन पार्श्वस्थिते वक्त्र-**
> **न्यग्भम बहिरासिन पुनश्च स्पर्श समानन्शम ।**

नीवीबन्धवदागतं शिथिलतां संभाष्यमाणे क्षणा-

न्मानेनापसृतं ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥५८॥

सापराधे प्रियतमेऽवलोकिते सति मानेन नेत्रवद्दूरनिमीलित तस्मिन् पार्श्वस्थिते सति मानेन वदनवद्वक्रीभूत तस्मिन् स्पृशति सति मानेन रोमाञ्चवदङ्गे स्थित तस्मिन् वदति सति मानेन वस्त्रग्रन्थिवच्छिथिलीभूत तस्मिंश्चानुनिनीषया चरणस्पृशि सति निमेषाल्लज्जावशादिव तस्या सुन्दर्या मानेनादृश्यता गतम् । उत्प्रेक्षास्वभावोक्तिरलङ्कारौ । वृत्तं तु शार्दूलविक्रीडितम् ।

ललितमुरसा तरन्ती तरलतरङ्गौघचालितनितम्बा ।

विपरीतरतासक्तेव दृश्यते सरसि सा सख्या ॥५९॥

सलीलं वक्षसा सरोवरं तरन्ती तरङ्गिणोर्मिसङ्घातपरिचालितश्रोणिफलका सा पुरुषायितसुरतप्रसक्तेव तत्र सरोवरे वयस्यया निरीक्ष्यते । उत्प्रेक्षालङ्कारः । आर्या जातिः ।

कान्तामुखं सुरतकेलिविमर्दखेद-

संजातघर्मकणविच्छुरितं रतान्ते ।

आपाण्डुरं विलसदर्धनिमीलिताक्ष

संस्मृत्य रे हृदय किं शतधा न यासि ॥६०॥

हे कठिनहृदय! मन्मथयुद्धोत्पन्नसंभ्रमजाते. स्वेदबिन्दुभिर्भरित सुरतावसाने ईषत्पाण्डु विलसदर्धमुकुलितलोचनशोभि दयिताया वदनमनुस्मृत्यापि शतधा किं न विदलसीति कस्यचिद्विरहिण सखेदोक्तिरियम् ।

वसन्ततिलकावृत्तम् ।

गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा

द्वित्राण्येव पदानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ।

संसारे घटिकाप्रणालविगलद्वारा समे जीविते

को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः ॥६१॥

कान्ताविरहार्ताङ्गना. कस्यचिद् प्रवासिनो मत्तः प्रतिष्ठमान वल्लभस्यानि हे हृदयवल्लभ! त्वया यदि नाम गन्तव्यं स्यादहो! निश्चयेन गमिष्यसि, केयं

गमने त्वरा? तावत् कतिपयान्येव पदानि त्व तिष्ठ यावदहं यथातृप्ति तवान-नमवलोकयामि, असारे जीवलोके घटिकाप्रणालात् पतता वारिणा समाने जीवने त्वया सह मम पुन समागमो भवेन्न वेति को वेत्तीति । प्रयाणनिषेधा त्मय आक्षेपोऽलङ्कार । शार्दूलविक्रीडितवृत्तम् ।

। इति समाप्त परिशिष्टम् ।

श्लोकानुक्रमणी

श्लोकारम्भः	श्लोकाङ्कः
(अ)	
अङ्गं चन्दनपाण्डु	परिशिष्टे २२
अङ्गानामतितानवं	४८
अङ्गुल्यग्रनखेन	३
अच्छिन्नं नयनाम्बु	परिशिष्टे ८
अज्ञानेन पराङ्मुखीं	१५
अथारभ्य यदि	९१
अनन्तचिन्ता	६३
अनालोच्य प्रेम्णः	७८
अन्योन्यग्रथिता	परिशिष्टे ३७
अलसवलितैः	२
अगद्भुतो नाथ	परिशिष्टे ३८
अह तेनाहूत।	९६
आदृष्टिप्रसरात्	७४
(आ)	
आयस्ता कलहं	परिशिष्टे ४
आयाते दयिते	७५
आलम्ब्याङ्गण	७६
आलोकयन्ति	परिशिष्टे ३९
आलोलामलकां	१
आशङ्क्य प्रणतिं	८५
आश्लिष्टा रभसा	परिशिष्टे ४०
आस्तां विश्वसनं	६१
(इ)	
इति प्रिये	१४
इदं कृष्णं कृष्णं	९२
इयमसौ तरला	परिशिष्टे २५
(उ)	
उत्कम्पो हृदये	परिशिष्टे ५४
उरसि निहितः	२९
(ऊ)	
ऊरुद्वयं मृगदृशः	परिशिष्टे ३५
(ए)	
एकत्रासनसंस्थितिः	१६
एकस्मिन् शयने पराङ्मुख	२१
एकस्मिञ्छयने विपक्ष	२०
(क)	
कठिनहृदये	५१
कथमपि कृते	७३
कथमपि सखि	१३
कपोले पत्राली	७१
करकिसलय	८८
काञ्च्या गाढतरा	१९
कान्तामुख मुक्त	परिशिष्टे ६०
कान्ते कत्यपि	परिशिष्टे ३०
कान्ते कथंचिद्	परिशिष्टे ५६

(इति पद्यानुक्रमणी)

अमरशतकलीलानाम्ना श्रीराय्-
बन्धेप्रणीतोऽय ग्रन्थ. समाप्त ।

पाठान्तरसहितममरुशतकमूलम्

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः[1] ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥प्रारम्भे॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥प्रारम्भे॥

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः[2] शीकरैः ।
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरस्कन्दादिभिर्दैवतैः[3] ॥१॥

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ॥२॥

पाठा

१. मृगन्या २ स्वेदाम्भसां जालकैः
३. हरिहरब्रह्मादिभिर्दैवतैः.

अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं
तूष्णीं रोदिषि कोपने बहुतरं फुत्कृत्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥३॥

दत्तोऽस्याः प्रणयस्त्वयैव भवतैवेयं[1] चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम् ।
मन्युर्दुःसह एष[2] यात्युपशमं नो सान्त्ववादैः स्फुटं
हे निस्त्रिंश विमुक्तकण्ठकरुणं तावत्सखी रोदितु ॥४॥

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै—
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥५॥

नार्यो मुग्धशठा हरन्ति रमणं तिष्ठन्ति नो वारिता—
स्तत्किं ताम्यसि किं च रोदिषि मुधा तासां प्रियं मा कृथाः ।
कान्तः केलिरुचिर्युवा सहृदयस्तादृक्पतिः कातरे
किं नो बर्बरकर्कशैः प्रियशतैराक्रम्य विक्रीयते ॥६॥

पाठा

१. भवता नेय २. एव

कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढ
नीत्वा वासनिकेतन[1] दयितया सायं[2] सखीनां पुर ।
भूयोऽप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टित
धन्यो हन्यत एव निह्नुतिपर प्रेयान्रुदत्या हसन् ।।७।।

याता किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचित ।।८।।

तद्वक्त्राभिमुख मुख विनमित दृष्टि कृता पादयो—
स्तस्यालापकुतूहलाकुलतरे[3] श्रोत्रे निरुद्धे मया ।
पाणिभ्यां च तिरस्कृत सपुलक स्वेदोदगमो गण्डयो
सख्य किं करवाणि यान्ति शतधा यत्कञ्चुके[4] सधय ।।९।।

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्य देश प्रियस्य यियासतो
हरति गमन बालालापै[5] सबाष्पगलज्जलै ।।१०।।

पाठा

१ मोहनमन्दिर २. स्वैर ३ तमल्लाप
४ मतञ्चुलीमधय ५. परेऽयवा
६ यालावाक्यैं सबाष्पयत्ज्यत्रै

धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्‌वासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता।
अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैः पुनरध्वगस्य वसतिर्ग्रामे निषिद्धा यथा ॥११॥

कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनवत्यानतिमति[1]।
न दृष्टे[2] शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपा[3] कठिनहृदये संवृतिरियम् ॥१२

कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयः शय्यां[4] त्यक्त्वा बलाद्गत एव सः।
इति सरभस[5] ध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां
पुनरपि हतव्रीडं चेतः करोति करोमि किम् ॥१३॥

दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच
स्तत्प्रातर्गुरुसन्निधौ निगदतः श्रुत्वैव[6] तारं वधू।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्चूपुटे[7]
व्रीडार्ता प्रकरोति[8] दाडिमफलव्याजेन वाग्बन्धनम् ॥१४॥

पाठा

१. प्रतिवचनमप्याननमि म २ दृष्टि शैथिल्य मजन·
३. कोपे ४ त्यक्त्वा शय्या
५. सरभसध्वस्त ६. तस्याशिमात्र वधू
७ चञ्चू पुटे ८ विदधाति

अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मा दुःखिता
किं लब्धं शठ दुर्नयेन नयता सौभाग्यमेतां दशाम् ।
पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं[1]
वक्षस्ते मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम्[2] ॥१५॥

एकत्रासनसंस्थितिः[3] परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलाहरणच्छलेन[4] रभसाश्लेषोऽपि संविघ्नितः[5] ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥१६॥

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य[6] विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकंधरः[7] सपुलकः[8] प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥१७॥

चरणपतनप्रत्याख्यानप्रसादपराङ्मुखे[9]
निभृतकितवाचारेत्युक्ते[10] रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनार्पितहस्तया[11]
नयनसलिलच्छन्ना दृष्टिः[12] सखीषु निपातिता ॥१८॥

पाठा

१ व्यतिकरासक्ताङ्ग २ मम तैलपङ्कमलिनैः
३ सङ्गतिः ४ ताम्बूलानयनच्छलेन ५ सङ्गतः
६ पिधाय ७ तिर्यग्वलित ८. सपुलकप्रेमो
९ प्रत्याख्यानात् १० त्युक्त्वा ११ स्तनाहित १२ क्लिन्ना

काञ्च्या गाढतरावनद्धवसनप्रान्ता किमर्थं पुन-
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति ।
मातः स्वप्तुमपीह[1] वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोऽवकाशस्तया ॥१९॥

एकस्मिञ्छयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं[2] ग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा-[3]
न्मा भूद्ग्लान[4] इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥२०॥

एकस्मिञ्छयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं[5] हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं[6] व्यावृत्तकण्ठग्रहः ॥२१॥

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु[1] मुक्तस्तया ॥२२॥

पाठाः

१. सुप्तिमर्हति २. पराङ्मुखमुखान्तरितया ३. [illegible]
४. [illegible] ५. [illegible]
६. सहासरभसव्यावृत्तकण्ठग्रहम्

परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
¹तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथितः ॥२३॥

तस्याः सान्द्रविलेपनस्तनयुगश्लेषमुद्राङ्कितं²
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते³ ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्सम्प्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तस्याश्च⁴ तद्विस्मृतम् ॥२४॥

एवं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि⁵
शय्योपान्तनिविष्टसस्मितवधूनेत्रोत्सवानन्दितो⁶
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥२५॥

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥२६॥

पाठा.

१. तदा पक्ष्मप्रान्तव्रजपुट २. स्तनतट
३. गोपायते ४. तन्व्या च ५. तद्वेणिका
६. सखी

सा[1] पत्यः प्रथमेऽपराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः[2] ॥२७॥

भवतु विदितं व्यर्थालापैरलं प्रिय गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥२८॥

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमभिसरस्येव मुग्धे त्वमाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्प[3] दिशः समुदीक्षसे ॥२९

मलयमरुता व्राता याता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटय[4] न त्वं निःस्नेह य एव निवर्तने
प्रभवति गवां किं नश्छिन्नं स एव धनञ्जयः ॥३०॥

पाठा

१ प्रागेवप्रणयापराधसमये २. लुठल्लोलार्द्रैः
३ मार्गोत्कम्पा ४. घटयितुं त्वं

प्रातःप्रातरुपागतेन जनिता निर्निद्रता चक्षुषो-
र्मन्दाया मम गौरवं[1] व्यपगतं प्रोत्पादितं लाघवम् ।
किं तच्छठ कृतं त्वया मरणभीर्मुक्ता मया गम्यतां
दुःखं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तच्छ्रोष्यसि ॥३१॥

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतम् ॥३२॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं[2] व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे[3] समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥३३॥

मन्दष्टेऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥३४॥

पाठ

१ गौरवस्थानमप्युत्पादितं
२ मुग्धेन कृतं त्वया रमणार्थी
३. क्षणमासितं ४ सर्वे सम प्रस्थिता

सुप्तोऽयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावेशितया मया तर[1]लया न्यस्तं मुखं तन्मुखे ।
ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः ॥३५॥

कोपो यत्र भ्रुकुटिरचना निग्रहो[2] यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः[3] प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः ॥३६॥

सुतनु जहिहि मौनं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥३७॥

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा[4]
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा[5] ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥३८॥

पा.

१. सरलया २. विग्रहो ३. यत्र दृष्टि. प्रसाद
४. प्रोद्गम ५. काञ्चीप्रदेशाम्बरा

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न¹ शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥३९॥

नापेतोऽनुनयेन यः प्रियसुहृद्वाक्यैर्न यः संहृतो
यो दीर्घं दिवसं विषह्य विषमं² यत्नात्कथंचिद्धृतः ।
अन्योन्यस्य हृते मुखे ³निहितयोस्तिर्यक्कथंचिद्दृशो
स⁴ द्वाभ्यामतिविस्मृतव्यतिकरो मानो विहस्योज्झितः ॥४०॥

गते ⁵प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्
जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥४१॥

चिरविरहिणोरत्युत्कण्ठाश्लथीकृतगात्रयो⁶-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः ।
⁷कथमपि दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः ॥४२॥

पाठ० १. अलमथ चाख्यातुं २. दुःखं
३. विलितयो ४. [illegible]
५. प्रेमाबन्धे ६. [illegible]
७. कथमिव

दीर्घा चन्दनमालिका विरचिता दष्टचैव नेन्दीवरै
पुष्पाणा प्रकर स्मितेन रचितो नो कुन्दजात्यादिभि ।
[1]दत्त स्वेदमुचा पयोधरभरेणार्घो[2] न कुम्भाम्भसा
स्वैरेवावयवै प्रियस्य विशतस्तन्व्या कृत मङगलम् ॥४३॥

कान्ते सागसि [3]शापिते प्रियसखीवेष विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदित तत्सगमाकाङ्क्षया ।
मुग्धे [4]दुष्करमेतदित्यतितमामुद्दामहास बला
दाश्लिष्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥४४॥

आशङ्क्य प्रणति पटान्तपिहितौ पादौ करोत्यादरा
द्व्याजेनागतमावृणोति हसित न स्पष्टमुद्वीक्षते ।
मय्यालापवति प्रतीपवचन सख्या [5]सहाभाषते
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदय ॥४५॥

[6]यावन्त्येव पदान्यलीकवचनैरालीजनै पाटिता
तावन्त्येव कृतागसो द्रुततर सलप्य[7] पत्यु पुर ।
[8]प्रारेभे परतो यथा मनसिजस्येच्छा तथा वर्तितुम्
प्रेम्णो मौग्ध्यविभूषणस्य सहज कोऽप्येष कान्त क्रम ॥४६॥

पाठा

१. दत्तम् २ अर्घ्य ३ यापित
४ दुष्कर एष दृष्यनितगामुक्त्वा महास प्रसादात्रिहृष
५ सम नापन ६ या यावन्ति
७ व्यहृत्य ८ प्रागल्भ्या

दूरादुत्सुकमागते विवलित सभाषिणि स्फारित
सश्लिष्यत्यरुण गृहीतवसने [1]कोपाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षण[2]
चक्षुर्जातमहो प्रपञ्चचतुर जातागसि प्रेयसि ॥४७॥

अङ्गानामतितानव कुत इद [3]कस्मादकस्मादिद
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिद स्वभावत इति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया [4]वलितया नि श्वस्य मुक्तोऽन्यत ॥४८॥

पुरस्तन्व्या गोत्रस्खलनचकितोऽह नतमुख
प्रवृत्तो वैलक्ष्यात्किमपि लिखितु दैवहतक ।
स्फुटो रेखान्यास कथमपि स तादृक्परिणतो
गता येन व्यक्ति पुनरवयवै सैव तरुणी ॥४९॥

ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रूढप्रणयसहमोद्गद्गदगिरा ।
अहो चित्र चित्र स्फुटमिति निगद्याश्रुकलुष
रुषा ब्रह्मास्त्र मे शिरसि निहितो वामचरण ॥५०॥

पाठा

१. मदुञ्चितभ्रूलताम् २. पूर्णेक्षणम्
३. कस्मात् कस्मादिदं ४. दलितया

कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रितां[1]
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम् ।
किमिदमथवा सत्यं मुग्धे त्वयाद्य विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यताम् ॥५१॥

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्मवियोगदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥५२॥

त्वं दृष्टया करजक्षतं मधुमदक्षीबाविचार्येर्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सबाष्पनयना मां[2] मुञ्च मुञ्चेति सा
कोपप्रस्फुरिताधरा यदवदत्तत्केन विस्मार्यते ॥५३॥

चपलहृदये किं स्वातन्त्र्यात्तदा गृहमागत-
श्चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातानां सहस्व रुषां फलम् ॥५४॥

पा. १. कथापरां २. गा. मुद्र. मुञ्चेति, मा.

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान्सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥५५॥

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविनतिः किं कृता किं न दृष्टः ।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥५६॥

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्तात्
दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहनिकटपदस्थायिनि प्राणनाथे
भग्ना मानस्य चिन्ता भवति मयि[1] पुनर्वज्रमय्या कथंचित्[2] ॥५७॥

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥५८॥

पाठा. १. मानेऽस्तु २. मम ३. कदाचित्

रन्यास्ता[2] विनिवारयन्ति कृपणा प्राणेश्वरं प्रस्थितम् ।
पुण्याहं[3] व्रज मङ्गलं सुदिवसं[4] प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रिय[1] मया तन्निर्गतः श्रोष्यसि ॥५९॥

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता
नो वा पादयुगे स्वयं[5] निपतितं तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदालिमलिने गन्तुं प्रवृत्तः शठ-
स्तन्व्या बाष्पजलौघकल्पितनदीपूरेण रुद्धः प्रियः ॥६०॥

आस्तां विश्वसनं सखीषु विदिताभिप्रायसारे जने
तत्राप्यर्पयितुं दृशं सुरचिता[7] शक्नोमि न व्रीडया ।
लोकोऽप्येष परोपहासचतुरः सूक्ष्मेङ्गितज्ञोऽप्यलं
मातः कं शरणं व्रजामि हृदये जीर्णोऽनुरागानलः ॥६१॥

न जाने सम्मुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि किं यान्ति नेत्रतां किमु कर्णताम् ॥६२॥

पाठ. १ [illegible] २ [illegible] ३. [illegible]
४. [illegible] ५. [illegible]
६. [illegible] ७. [illegible]

अनल्पचिन्ताभरमोहनिश्चला
विलोक्यमानैव करोति साध्वसम् ।
स्वभावशोभानतिमात्रभूषणा
तनुस्तवेयं वद किं नु सुन्दरि ॥६३॥

इति प्रिये पृच्छति मानविह्वला
कथंचिदन्तर्धृतबाष्पगद्गदम् ।
न किंचिदित्येव जगाद यद्वधूः
कियन्न तेनैव तयास्य वर्णितम् ॥६४॥

विरहविषमः कामो वामस्तनूकुरुते[1] तनुं
दिवसगणनादक्षश्चायं[2] व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥६५॥

पादासवने गुर्विदमिह ते वामता दैव[3] मुग्धे
मन्दारम्भे प्रणयिनि जने कोऽपराधोपरोधः[4] ।
इत्थं तस्याः परिजनकथाकोमले[5] कोपवेगे
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रवृत्तम् ॥६६॥

पाठा. १ वामः तनु कुरुते २. [illegible]
३. दैव [illegible] ४. कोपने [illegible]
५. परिजनविरा कोपवेगे [illegible]

तथाभूदस्माकं[1] प्रथममविभक्ता[2] तनुरियं
ततो[3] न त्वं प्रेयानहमपि हताशा प्रियतमा ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
मयाप्तं[4] प्राणानां कुलिशकठिनानां फलमिदम् ॥६७॥

मुग्धे मुग्धतयैव नेतुमखिलः[5] कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं[6] प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥६८॥

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको[7] वसति यत्र जनः[8] प्रियो मे ।
एकाकिनी वत[9] कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥६९॥

लीलातामरसाहतोऽन्यवनितानि:शङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा[10] कुड्मलिताननेन्दु ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाथवा[11] नतिमृते तेनानिशं[12] चुम्बिता ॥७०॥

पाठा. १. पुरा २. अविभिन्नात्मा ३. ततोऽनु त्वं प्रेयान्
वयमपि हताशा प्रियतमा ४. हताशा
५. अखिलः ६. सख्येदं ७. प्राणेश्वर
८. मम प्रियो ९. वद
१०. बाला कुड्मलिताननेन ११. नत
१२. तेनानिशं

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि चपलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानावेशादुदीर्य[1] वचस्तया
रमणपदवी सारङ्गाक्ष्या निरन्तरमीक्षिता[2] ॥७१॥

गाढाश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादिय[3]
शय्या सम्प्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।
गाढोष्ठग्रहपूर्वमाकुलतया[4] पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥७२॥

कथमपि कृतप्रत्याख्याने[5] प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम् ।
असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं[6]
विगलितदृशा[7] शून्ये गेहे समुच्छ्वसितं पुनः ॥७३॥

आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छिन्नेषु[8] पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति ।
दत्त्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन्क्षणे
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥७४॥

पाठा. १ [illegible] २ [illegible]°
३ [illegible]° ४ [illegible]
५ [illegible] ६ [illegible] विगलित [illegible]
७ [illegible] ८. [illegible]

आयाते दयिते मनोरथशतैर्नीत्वा कथञ्चिद्दिन
वैदग्ध्यापगमाज्जडे[1] परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरपद व्याधूय चीनांशुक[2]
तन्वङ्ग्या रतिकातरेण मनसा नीत प्रदीप शमम् ॥७५॥

आलम्ब्याङ्गणवाटिकापरिसरे[1] चूतद्रुमे मञ्जरीं
सर्पत्सान्द्रपरागलम्पटरटद्भृङ्गाङ्गनाशोभिनीं[4] ।
मन्ये स्वा तनुमुत्तरीयशकलेनाच्छाद्य बाला स्फुर-
त्कण्ठध्वाननिरोधकम्पितकुचश्वासोद्गमा रोदिति ॥७६॥

यास्यामीति समुद्यतस्य गदित विस्रब्धमाकर्णित
गच्छन्दूरमुपेक्षितो मुहुरसौ व्यावृत्य तिष्ठन्नपि ।
तच्छून्ये पुनरास्थितास्मि भवने प्राणास्त एत दृढा·
सख्यस्तिष्ठत जीवितव्यसनिनी दम्भादहं रोदिमि ॥७७॥

अनालोच्य प्रेम्ण परिणतिमनादृत्य सुहृद-
स्त्वयाकाण्डे मान किमिति सरले[5] सप्रति कृत ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखा
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितै ॥७८॥

पाठा १ गत्वा वागगृह जडे २ चलाञ्चलं
३ वाणिना ४ रणद् ५ सरले

कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं[1]
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥७९॥

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला[2] चिरं चुम्बिता ॥८०॥

लोलद्भ्रूलतया[3] विपक्षदिगुपन्यासेऽवधूत[4] शिर-
स्तद्वृत्तान्तविवीक्षणे[5] कृतनमस्कारो विलक्षः स्थितः ।
कोपात्ताम्रकपोलभित्तिनि[6] मुखे दृष्ट्या गतः पादयो-
रुत्सृष्टो गुरुसंनिधावपि विधिर्द्वाभ्यां न कालोचितः ॥८१॥

जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणान्वितं न सहसा यावच्छठेनामुना ।
दृष्टेनैव मनो हृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनात्र निरूप्यमाणनिपुणो मानः समाधीयताम् ॥८२॥

पाठा १ स्तनतटी २ बालामवच्चुम्बिता
३ लोलभ्रूलतया ४ विधूत
५. निरीक्षणे ६ ईषत्ताम्रकपोलकान्तिनि मुखे
दृष्ट्या नता

दृष्टः कातरनेत्रया चिरतरं बद्धवाञ्जलि[1] याचितः
पश्चादंशुकपल्लवेन[2] विधृतो निर्व्याजमालिङ्गितः ।
इत्याक्षिप्य[3] यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥८३॥

तप्ते म‍्‌ाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनतटे हृदये प्रियायाः ।
मन्मार्गवीक्षणनिवेशितदीनदृष्टे-
र्नूनं छमच्छमिति बाष्पकणाः पतन्ति ॥८४॥

चिन्तामोहविनिश्चलेन[4] मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः[5] प्रियतमो गन्तुं प्रवृत्तोऽधुना[6] ।
सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैरीक्षणैः
श्वासोत्कम्पिकुचं[7] निरीक्ष्य सुचिरं जीवाशया वारितः ॥८५॥

म्लानं पाण्डु कृशं वियोगविधुरं लम्बालकं सालसं[8]
भूयस्तत्क्षणजातकान्ति रभसप्राप्ते[9] मयि प्रोषिते ।
साटोपं रतिकेलिकालसरसं[10] रम्यं किमप्यादरा-
[11]द्यत्पीतं सुतनोर्मया वदनकं[11] वक्तुं न तत्पार्यते ॥८६॥

प्र. १ बद्धाञ्जलि २. पल्लवे च
३. इत्याक्षिप्य समस्तमवमघृणो
४. चिन्तामोहनिबध्यमानमनसा
५. प्रत्याख्यान ६. प्रवृत्त शठः
७. तन्वङ्ग्या स पुनस्तया तरलया तथान्तरे वार्ि
८. घान्तस्य ९. मधुर प्राप्ते १०. दत्तरयगं
११. त्पीतं यत् १२. मुग्धामिद नन्मेन विस्मार्यते

संयाहं प्रमदा नृणामधिगतावेतौ च तौ नूपुरा-
वेवास्माकमवर्त्तिरेव सहजग्रीडापनः स्त्रीजनः ।
इत्थं लज्जितया स्मृतेरुपगमे मत्वा तनुं संभ्रमा-
त्संभावः प्रथमं रतिव्यतिकरे मुक्तस्ततो वल्लभः ॥८७॥

करकिसलयं धूत्वा धूत्वा विमार्गति[1] वाससी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।
स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या[2] तन्वी मुहुर्मुहुरीक्षते ॥८८॥

सन्त्येवात्र गृहे गृहे युवतयस्ताः पृच्छ गत्वाधुना
प्रेयांसः प्रणमन्ति किं तव पुनर्दासो यथा वर्तते ।
आत्मद्रोहिणि दुर्जने[3] प्रलपितं कर्णेऽनिशं मा कृथा-
श्छिन्नस्नेहरसा भवन्ति पुरुषा दुःखानुवर्त्याः[4] पुनः ॥८९॥

निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते[5]
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुद्यते ।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः[6]
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥९०॥

पाठा १. विलम्बितमेखला २ रम्य तन्वी पुनः पुनरीक्षते
३. दुर्जनप्रलपित कर्णे भृश
४. दुःखानुवृत्या यत.   ५ उन्मथ्यते
६. तथा

अद्यारम्य यदि[1] प्रिये पुनरहं मानस्य वाऽन्यस्य वा
गृह्णीयां शठदुर्नयेन मनसा नामापि संक्षेपतः ।
तत्तेनैव[2] विना शशाङ्कधवला:[3] स्पष्टाट्टहासा निशा
[4]एको वा दिवसः पयोदमलिनो यायान्मम प्रावृषि ॥९१॥

इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथ किं
गमिष्यामो यामो भवतु गमनेनाथ भवतु ।
पुरा येनैवं मे चिरमनुसृता चित्तपदवी
स एवान्यो जातः सखि परिचिताः कस्य पुरुषाः ॥९२॥

चरणपतनं सख्यालापा[1] मनोहरचाटवः
कृशतरतनोर्गाढाश्लेषो हठात्परिचुम्बनम् ।
इति हि[1] चपलो मानारम्भस्तथापि हि[2] नोत्सहे
हृदयदयितः कान्तः कामं किमत्र करोम्यहम् ॥९३॥

तन्वङ्ग्या गुरुसंनिधौ नयनयोर्यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासायाससमाकुलालिसरणिव्याजेन धूमावली ॥

---

[1]पाठा. १. नहि प्रिये पुनरहं मानस्य वा मानन गृह्णीयां
विपरूपिण शठमनेनांमापि
२ वि तेनैव ३. शशाङ्करविरलस्पष्टाट्टहास
४. नैवोऽपि ५ मायान्मामः ६. बरष
७ च

भ्रूभेदो गुणितश्चिर नयनयोरभ्यस्तमामीलन
रोद्धु शिक्षितमादरेण हसित मानेऽभियोग कृत. ।
धैर्यं कर्तुमपि स्थिरीकृतमिद चेत कथचिन्मया
बद्धो मानपरिग्रहे परिकर सिद्धिस्तु दैवे स्थिता ॥९५॥

अह तेनाहूता किमपि कथयामीति विजने
समीपे चासीना सरसहृदयत्वादवहिता ।
तत कर्णोपान्ते किमपि वदताघ्राय वदन
गृहीता[१] धम्मिल्ले सखि स च मया गाढमधरे ॥९६॥

देशैरन्तरिता शतैश्च सरितामुर्वीभृता काननै-
र्यत्नेनापि न याति लोचनपथ कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुध[२] प्रोन्मृज्य सास्रे दृशौ
तामाशा पथिकस्तथापि[३] किमपि ध्यायन्पुनर्वीक्षते[४] ॥९७॥

चक्षु प्रीतिप्रसक्ते[५] मनसि परिचये चिन्त्यमानाभ्युपाये
रागे[६] याते ऽतिभूमि विकसति सुतरा गोचरे दूतिकाया ।
आस्ता दूरेण[७] तावत्सरभसदयितालिङ्गनानन्दलाभ-
स्तद्गेहोपान्तरथ्याभ्रमणमपि परा निर्वृति सतनोति ॥९८॥

पाठा १ गृहीत्वा धम्मिल्ल मम सखि निपीतोऽधररस
२ चरणाग्र ३ तथैव ४ मुहु
५ चक्षु प्रीत्या निषण्णे मनसि परिचयाच्चीन्त्यमाने
६ याते रागे विवृद्धि प्रविसरति गिरा विस्तरे
७ दूरे स

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना[1]
द्वासो विश्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि सांप्रतमहं[2] तस्याङ्गसङ्गे पुनः
कोऽयं कास्मि रतं नु[3] वा कथमिति स्वल्पापि मे न स्मृतिः ॥९९॥

प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा
पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य ।
हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा
सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥१००॥

ठा १ तत्क्षणात्तद्वासः [illegible]
२ केवलमहं ३ नु किं कथमपि

शान्तिरस्तु लोके ।

—— [illegible]ऽस्तु हिमाचलराज्य [illegible]